उक्तं—यत् किमपि कर्तुं शक्नोमि तत् सर्वं कर्तुं सन्नद्धोऽस्मि इत्यनन्तरं अखिल-भारतीयसंस्कृतविद्यापीठस्य स्थापनार्थं तैः यस्य कौशलस्य प्रदर्शनं कृतं वस्तुतः तद् अवर्णनीयमेव। सर्वप्रथमं दरियागंजक्षेत्रे समन्तभद्र-उच्चतरमहाविद्यालयस्य भवने रात्रिशालारूपेण अस्य विद्यापीठस्य १९६२ तमे ख्रिष्टाब्दे प्रारम्भः कृतः प्रथमं केवलम् आचार्यकक्षायाः कृते एव अध्यापनं प्रारब्धम् परंमण्डनमिश्रमहोदयाः गतिशीलाः आसन्। अतः उन्नतिक्रमेण तस्मिन्नेव वर्षे शास्त्रिकक्षायाः अपि अध्यापनं प्रारब्धम्, महामहोपाध्यायपरमेश्वरानन्दशास्त्रिणः, डॉ० मण्डनमिश्राः, पं० मणिनाथझाः, पं० शिवदासमिश्राः, एते आसन् अध्यापकाः प्रथमवर्षे। पंजाब-विश्वविद्यालयस्य अनेके शास्त्रिकक्षोत्तीर्णाः अध्यापकाः दिल्लीस्थितेषु विद्यालयेषु संस्कृतं पाठयन्तः आचार्यपरीक्षोत्तीर्णतार्थम् अस्मिन् विद्यापीठे आगताः तेषु उग्रसेनशास्त्री, सुरेन्द्रकुमारशास्त्री, महावीरशास्त्री, सदृशाः प्रमुखाः संस्कृता-ध्यापकाः प्रथमेषु आचार्यकक्षा-छात्रेषु अग्रगण्याः अभूवन्। प्रायः एते सर्वे एव दिल्लीसंस्कृतजगति कर्मठाः संस्कृतकार्यकर्तारः आसन् एतेषां माध्यमेन मण्डनमिश्र-महोदयैः संस्कृतस्य क्षेत्रे एकं नवीनं जीवनं नवश्चोत्साहः आपूरितः। विद्यापीठस्यो-पचारिकम् उद्घाटनं १९६२ तमे वर्षे तत्कालीनैः शिक्षामन्त्रिभिः श्रीकालूलाल—श्रीमालिभिः विजयदशम्यां विहितम्। तत्रत्यं स्थानमल्पं मत्वा डॉ० मण्डनमिश्रैः शक्तिनगरे नूतनं विस्तृतं गृहं विद्यापीठस्य कृते भाटकेन गृहीतम्। अस्मिन् वर्षे तेषां कौशलेन विद्यापीठे शिक्षाशास्त्रिपाठचक्रमस्यापि आरम्भः सञ्जातः। स्वराज-नीतिककौशलेन डॉ० मिश्रमहोदयैः तत्कालीनराजस्थानमुख्यमन्त्रिणः आदेशेन शिक्षाशास्त्रीतिपाठचक्रमस्य कृते राजस्थानसंस्कृताध्यापकाः पूर्ववेतनस्योपरि दश-प्रतिशतं प्रतिनियुक्तिधनेन चत्वारिंशदध्यापकाः शिक्षाशास्त्रप्रशिक्षणं प्राप्त्यर्थं प्राप्ताः। अयं क्रमः वर्षत्रयं प्राचलत्।

प्रारम्भिकेषु दिनेषु गृहराज्यमन्त्रिणः श्री बी०एन० दातारमहोदयाः विद्या-पीठस्याध्यक्षाः आसन्। तदनन्तरं विद्यापीठस्य कार्यवाहकाध्यक्षपदे स्थितानां श्रीमतां एन०वी० गाडगिलमहाशयानां तथा डॉ० सम्पूर्णानन्दमहोदयानाम् अनुरोधमङ्गीकृत्य श्रीलालबहादुरशास्त्रिभिः विद्यापीठस्याध्यक्ष्यं स्वीकृतम्। एतस्य सर्वस्य कार्यजातस्य मूले मण्डनमिश्रैः कृता व्यवस्था अवर्तत। एकं बालमन्दिरमपि प्रारब्धम्। तत्र प्रथमकक्षातः एव संस्कृतशिक्षणं प्रावर्तत। अयं विद्यालयः आगामि-सम्वत्सरे माध्यमिकविद्यालयरूपेण प्रवर्धितः यः कालान्तरेण केन्द्रीयविद्यालय-संगठनाय समर्पितः। असौ एव विद्यालयः अधुना एण्ड्रयूजगंजक्षेत्रे केन्द्रीयविद्यालय-रूपेण कार्यं करोति। अस्य विद्यालयस्य प्रथमा प्राचार्या डॉ० के०आर० मित्रा नियुक्ता आसीत्। अहं नई दिल्लीनगरपालिकायाः मन्दिरमार्गस्थे उच्चतर-माध्यमिकविद्यालये संस्कृतविभागाध्यक्षरूपेण कार्यं कुर्वन्नासम्। तेन सह एव विद्या-पीठस्य सेवा अपि मया अविरलभावेन क्रियते स्म। १९६५ तमे वर्षे अहं पूर्णतया

विद्यापीठस्य शिक्षाशास्त्रिविभागे नियुक्तः अभवम्। विद्यापीठस्य नैकविधानि कार्याणि प्राशासनिकानि, शैक्षिकाणि, प्रचारप्रसारसम्बन्धीनि मया आदिकालादेव सम्पाद्यन्ते स्म।

१९६७ वर्षपर्यन्तं विद्यापीठं दिल्लीप्रशासनतः अनुदानराशिं लभते स्म। अध्यापकाश्च अहर्निशं विद्यापीठस्य समुन्नत्यै कार्यं कुर्वाणाः अवर्तन्त। दुर्दैववशात् रूसदेशे ताशकन्दनगरे लालबहादुरशास्त्रिणां देहावसानानन्तरं विद्यापीठे आर्थिक-संकटं समुत्पन्नम्। दिल्लीप्रशासनेन एतदुक्तं यद् विद्यालयानां कृते एव अनुदान-सहायताप्रदानं दिल्लीप्रशासनस्य अधिकारक्षेत्रे वर्तते, महाविद्यालयानां कृते अस्माभिः साहाय्यं न दीयते। इमां स्थितिं दृष्ट्वा मण्डनमिश्रमहोदयाः केन्द्रसर्व-कारस्य दिल्लीप्रशासनस्य च अधिकारिभिः सह नैकबारं चर्चाः सम्पर्कांश्च अकुर्वन्। अहमपि प्रायः तैः सह स्थाने स्थाने अगच्छम्। मण्डनमिश्रमहोदयानां कर्मनिष्ठा, तर्कशैली, विषयप्रस्तुतिप्रकारः, सर्वमेव प्रभावपूर्णमभवत्। स्मरामि अहं तं विशिष्टावसरं यदा दिल्लीप्रशासनस्य मुख्यायुक्ताः श्री के० किशोरमहोदयाः अस्मिन् विषये चर्चामकुर्वन्। तदानीन्तनाः वित्तसचिवा अपि तत्र उपस्थिता आसन्। मण्डनमिश्रैः स्वीयानि सर्वाणि पत्राणि प्रदर्शितानि तत्रोक्तं च अस्माभिः सर्वं नियमपूर्वकमेव क्रियते। याः नियुक्तयः विहिताः ताः सर्वाः उचितप्रक्रियानुपालने कृताः चयनमण्डलेन साक्षात्कारेण अध्यापकानाम् अन्येषां कर्मचारिणां च चयनं कृतम्। एतस्य सर्वस्य स्वीकृतिः अस्माकमध्यक्षैः लालबहादुरशास्त्रिभिः कृता। अत्र विराजन्ते तेषां हस्ताक्षराणि। अधुना दुर्दैवविपाकात् ते स्वर्गताः सन्ति वयं तु हताः ते एव अस्माकं सर्वस्वम् आसन्। अधुना किं करवाम ? इत्युक्त्वा डॉ० मण्डनमिश्रैः लालबहादुरशास्त्रिणां प्रमाणस्वरूपेण हस्ताक्षराणि प्रदर्शितानि इति दृष्ट्वा वित्त-सचिवाः अवोचन् श्रीमन्! लालबहादुरशास्त्रिभिः एतानि हस्ताक्षराणि विद्या-पीठस्याध्यक्षरूपेण कृतानि न तु प्रधानमन्त्रिरूपेण। इत्युपरि श्रीमद्भिः के० किशोर-महोदयैः उक्तम् नहि नहि एतत् न युक्तम्, "लालबहादुर इज लालबहादुर"। यस्मिन् कस्मिन्नपि रूपे लालबहादुरशास्त्रिणां हस्ताक्षराणि अस्माकं सम्मानं भजन्ते। तैः वित्तसचिवः आदिष्टः यत् अखिलभारतीयसंस्कृतविद्यापीठस्य कृते अनुदानराशिः प्रदेयः। एतेन व्रणिताः मण्डनमिश्राः आर्थिकसंकटरोगस्य उपचाराय स्वीयान् प्रयत्नान् प्रारभन्त। तत्कालीनैः शिक्षासचिवैः श्रीमद्भिः लक्ष्मी ओंकार-जोशीमहोदयैः विद्यापीठस्य विशिष्टाः उपकाराः कृताः। विद्यापीठं तेषां प्रयत्नैः मार्गदर्शनेन च केन्द्रीयसर्वकाराधीनं स्वायत्तसंस्थानं संजातम्।

१९६७वर्षे अखिलभारतीयसंस्कृतसाहित्यसम्मेलनस्य स्वर्णजयन्तीसमारोहः डॉ० मण्डनमिश्रमहोदयानां महामन्त्रित्वे सम्पन्नः। एतस्मिन् समारोहे एव प्रधान-मन्त्रिपदे अधिष्ठितानां श्रीमती इन्दिरा गांधी महोदयानामुद्घोषणया स्वर्गीयाणां श्रीलालबहादुरशास्त्रिणां विद्यापीठं प्रति अनुरागातिरेकस्य पुष्ट्यर्थम् अस्य विद्या-

पीठस्य नाम श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठं कृतम्। विद्यापीठस्य कृते भूमेः भवनस्य च व्यवस्था श्री लालवहादुरशात्रिणां साहाय्येन नेपालनरेशाणाम् श्री ५ महेन्द्रवीर विक्रमशाह महोदयानां सान्निध्ये डॉ० मिश्रैः कारिता आसीत्। संस्थासु उच्चावचत्वम् आगच्छत्येव परं डॉ० मिश्रैः स्वीयेन कर्मकौशलेन सर्वासु अवस्थासु विजयः लब्धः, परिस्थितीनां च संस्कृतविकासाय आनुकूल्यम् विहितम्। १९७० वर्षे भारतसर्वकारेण राष्ट्रियसंस्कृतसंस्थानमितिनाम्ना एका स्वायत्तसंस्था स्थापिता। लालबहादुरशास्त्रीविद्यापीठम्, तिरुपतिस्थं केन्द्रीयसंस्कृतविद्यापीठम्, प्रयागस्थं गंगानाथझाकेन्द्रीयसंस्कृतविद्यापीठञ्चेति त्रीणि विद्यापीठानि संस्थानाधीनानि संजातानि। मम रीडररूपेण पदोन्नतिः संजाता तेन मुखेन मम स्थानान्तरणं तिरुपतिस्थे केन्द्रीयसंस्कृतविद्यापीठे १९७२ तमे वर्षे जातम्। आगामिवर्षे मण्डनमिश्राः अपि प्राचार्यत्वेन आगताः। तस्य विद्यापीठस्य विकासाय च तैः वहुकार्यं कृतम्। वस्तुतः विद्यापीठस्य नूतनभवनाधिग्रहणं डॉ० मिश्रमहोदयानाम् एव प्रशासनसामर्थ्येन संजातम्। तदनन्तरं जम्मूप्रयागविद्यापीठयोः प्राचार्यकार्यं सम्पाद्य पुनः दिल्लीविद्यापीठं समागच्छन्। अत्रागमनानन्तरम् डॉ० मिश्रमहोदयैः ततोऽपि विद्यापीठस्य अधिकाम् उन्नतिं चिकीर्षद्भिः अनेकाः योजनाः निर्मिताः याभिः विद्यापीठस्य विश्वविद्यालयत्वं साध्येत। विद्यापीठस्य कार्यकर्तारः इतस्ततः प्रेषिताः आसन्...... तेषां पुनः लालबहादुरशास्त्रीविद्यापीठे संग्रहः कृतः एतेषु अन्यतमः प्रयासः आसीत् येन अहमपि १९८० तमे वर्षे पुनः दिल्लीं प्राप्तः। डॉ० मिश्रमहोदयानां प्रयासैः अस्य विद्यापीठस्य १९८७ वर्षे विश्वविद्यालयत्वं भारतसर्वकारेण घोषितम्। वस्तुतः अस्यां दिशि सक्रियं कार्यं डॉ० मण्डनमिश्रमहोदयानां कुलपतिपदे घोषणया सह १९८९ वर्षे एव प्रारब्धम्। अनेकाः आसन् समस्याः आन्तरिक्यः बाह्याश्च। तासां समाधानार्थम् केवलं डॉ० मिश्राः एव समर्थाः आसन् यदि कश्चन अन्यः संस्थापककुलपतिः अभविष्यत् तदा अस्य विद्यापीठस्य विश्वविद्यालयस्य साधनं सम्भवतः हेममृगस्य जन्म इव एवास्थास्यत्।

संस्कृतवियति डॉ० मिश्रमहोदयानामुदयः संस्कृतस्य प्रकाशार्थं अतीवोल्लेखनीयः वर्तते। संस्कृतेन तैः राजनेतॄणां भूरिशः संयोगः कारितः—डॉ० राजेन्द्रप्रसाद—पं० जवाहरलालनेहरू—डॉ० राधाकृष्णन्—श्री लालबहादुरशास्त्री—एन० वी० गाडगिल—अनन्तशयनमंगार--श्रीमती इन्दिरागांधी—श्री के० आर० नारायणन्—श्री पी० वी० नरसिंहराव—श्री अर्जुनसिंह—श्री कृष्णचन्द्रपन्त—श्री बलरामजाखड़े'त्यादीनां स्थाने स्थाने संस्कृतस्य मञ्चेषु उपस्थापनं मण्डनमिश्राणां प्रगल्भतां प्रदर्शयति। एतेषां मुखेन संस्कृतस्य सम्बन्धे वाचयित्वा सामान्यजनानां मनःसु सत्प्रभावाः स्थापिताः। न्यायविद्भिः मुख्याधिकारिभिश्चापि डॉ० मण्डनमिश्राणां संयोजने संस्कृतस्योपकाराय योगदानं

दत्तम्। एतेषु सर्वोच्चन्यायालयस्य मुख्यन्यायाधीशा: न्यायमूर्तय: सर्वश्री सी० पी० रामास्वामी अय्यर--श्री आई० वी० चन्द्रचूड़—रंगनाथमिश्रमहोदया: प्रामुख्येन गणयितुं शक्यन्ते। विदुषामपि योग्यताया: लाभ: संस्कृतस्य विद्यापीठस्य च कृते एतै: प्राप्त:। एतेषु महामहोपाध्यायगिरिधरशर्मा चतुर्वेदी—पं० हनुमत्प्रसादशास्त्री—क्षेत्रेशचन्द्रचट्टोपाध्याय:—वी०वी० मिराशी—श्री एस०वी० सोहनी—डॉ० उमेशमिश्र:—पं० बदरीनाथशुक्ल—श्री सुब्रह्मण्यम् अय्यर—डॉ० हजारीप्रसादद्विवेदी—सुनीतिकुमारचटर्जी—रामधारीसिंह'दिनकर'—नाकामूराएता—दृशानां विदुषां नामानि विशेषत: उल्लेखनीयानि सन्ति। डॉ० रामकरणशर्मा—डॉ० सी० आर० स्वामीनाथन् तथा डॉ० मण्डनमिश्र एतेषां मुनित्रयत्वं तु अस्य कालस्य वैशिष्ट्यमभवत्। अहं मन्ये अस्मिन् त्रिके डॉ० मण्डनमिश्रा: एव संयोजने दक्षा: जतुभूता: आसन्।

न केवलं विद्यापीठे अपितु विभिन्नेषु संस्कृतकार्यक्रमेषु वैदिकेषु लौकिकेषु, सामाजिकेषु, धार्मिकेषु, शैक्षिकेषु च मण्डनमिश्रै: सर्वत्र प्राथम्यमेव लब्धम्। अनेकेषु प्रदेशेषु संस्कृत अकादमी संस्थानां स्थापने तेषां सहयोग: अवर्तत। राष्ट्रीयवेदविद्याप्रतिष्ठानस्य स्थापनेऽपि मूलरूपेण कारणभूता: एते एव। एतै: संस्कृतनगरसहकारि-आवाससमिति: स्थापिता यया संस्कृतज्ञानां कृते दिल्लीनगरे आवासा: निर्मापिता:। एतेषां शैक्षिकक्षेत्रे कौशलं विद्यापीठस्य प्राचार्यरूपेण अनेकेषां अमूल्यानां ग्रन्थानां सम्पादनेन प्रकाशनेन च सिद्धयति। प्राशासनिकं कौशल राष्ट्रीयसंस्कृतसंस्थानस्य निदेशकरूपेण, श्री लालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य मानितविश्वविद्यालयस्य कुलपतिरूपेण तथा राष्ट्रीयवेदविद्याप्रतिष्ठानस्य सदस्यसचिवरूपेण, राजस्थानसंस्कृत-अकादमी अध्यक्षरूपेण च कृतै: कार्यै: सिद्धयति।

सर्वेषां धर्माचार्याणां च आशीर्वाद: मण्डनमिश्रै: संस्कृतस्य कृते प्राप्त:। उत्तरप्रदेशस्य संस्कृत-अकादम्या एकलक्षरूप्यकपुरस्कारेण तेषां सम्मान: विहित:। कुन्दकुन्दभारती द्वारा आचार्यविद्यानन्दमहामुनीनां सान्निध्ये भारतसर्वकारस्य वित्तमन्त्रिणां डॉ० मनमोहनसिंहमहोदयानां हस्ताभ्यां एकलक्षसम्मानराशि: लब्ध: डॉ० मण्डनमिश्रमहोदयै:। संस्कृतजगति कार्यं कर्तुमवसरप्रदानार्थं साहू शान्तिप्रसादजैनप्रमुखानां श्रेष्ठीनां कार्तज्ञ्यं एतै: प्रदर्शितम्। विदेशेष्वपि मण्डनमिश्रै: वहुबारं गत्वा संस्कृतसम्मेलनेषु भागं गृहीत्वा संस्कृतकार्यक्रमाश्च सम्पादिता:।

अद्य भारतवर्षे विशेषत: यत्र कुत्रापि संस्कृतकार्यक्रम: प्रचलति तत्र मण्डनमिश्रमहोदयानाम् उपस्थिति: कांक्ष्यते। डॉ० मण्डनमिश्रमहोदयै: उच्यते यत् संस्कृतमाता तदुपासकेभ्यो वहुददाति परमहम् मन्ये श्रीमद्भि: मण्डनमिश्रैरपि संस्कृताय वहुदत्तम्। अद्य संस्कृतस्य या प्रकाशमयी स्थिति: वर्तते तस्या: सर्वाधिक्यं श्रय: डॉ० मण्डनमिश्रमहोदयेभ्य: दातव्यम्।

——:o:——

# श्रीमण्डनमिश्रशतकम्

—डा० शिवदत्तशर्माचतुर्वेदी

(१)

श्रीमन्मण्डनमिश्रं लोकोत्तरशेमुषीजुष्टम् ।
कस्तावत्सर्वेषां हृदये संस्थं न जानाति ।।

(२)

अयमेव मिश्रवर्यो मण्डननामास्ति तादृशो लोके ।
दैवी संस्कृतभाषा येन पुनर्दीपिता विश्वे ।।

(३)

देशस्वतन्त्रतायां संजातायां सुसंस्कृता भाषा ।
संसारेषु निकामं पुनरपि विद्योतिता येन ।।

(४)

विश्वे जीवनभूता सेयं सर्वत्र संस्कृता वाणी ।
तस्या ये सेवायां निरता लोके नितान्तधन्यास्ते ।।

(५)

अस्मन्नयनाग्रे यो नितान्तदीप्तां नु संस्कृतां कुरुते ।
तस्य श्रेष्ठतमत्वं केनात्र कथं विलोपितुं शक्यम् ।।

(६)

शीर्षे स्थित्वा सोऽयं वदति पुनः स्वस्य पूज्यतां रुचिराम् ।
पूज्यां कामपि शैलीं मण्डनमिश्रो विधारयते ।।

(७)

राजस्थानस्यायं केसरिरूपं समास्थाय ।
यां गर्जनां प्रकुरुते लोकोऽयं वशगतस्तया नित्यम् ।।

( ८ )

एतदुपस्थितिमात्रं जनतोत्साहांस्तरङ्गयति ।
देशे तथा विदेशे संस्कृतजगतामयं मान्यः ॥

( ९ )

राजस्थाने यो वै संजातस्तस्य वीरता सहजा ।
श्रीमान् मण्डनमिश्रः संस्कृतवीरः समाभाति ॥

( १० )

युद्धेषु वीरभावो राजस्थानेषु यादृशः ख्यातः ।
संस्कृतशत्रुनिकाये स्वीकृत एवात्र मण्डनैरेभिः ॥

( ११ )

क्षणे क्षणे सत्कार्यं कुर्वाणोऽयं तथाऽऽभाति ।
यथार्जुनोऽसौ युद्धे कृतकाया वीरतैव स्यात् ॥

( १२ )

हृतप्रभास्ते जाता ये वा शत्रुत्वमापन्नाः ।
संस्कृतविद्यावर्धनकर्मणि व्रतमेव धारितं तेन ॥

( १३ )

ये वै प्रतीकभूता इतिहासेषु प्रतीकसत्पुरुषाः ।
तेषामुज्ज्वलरूपं ह्यादायाऽसौ विनिर्मितः कश्चित् ॥

( १४ )

श्रीगिरिधरशर्माणो विख्याता ये चतुर्वेदाः ।
तेषां भाषणकलया दीप्तोऽयं मण्डनो मिश्रः ॥

( १५ )

श्रीरामेश्वरशिष्योरामेश्वरदत्तविज्ञानम् ।
सत् शिक्षणं तदीयं प्राणादूर्ध्वं सदा मनुते ॥

( १६ )

सेवितचिह्नस्वामी विद्वद्वर्यप्रकाण्डानाम् ।
सेवायां प्रविनम्रो नम्रत्वं स्वीकरोति गुणरूपम् ॥

( १७ )

विद्वत्प्रकाण्डमण्डलमध्यगतं श्रीबृहस्पतिं साक्षात्।
पट्टाभिरामवर्यं संसेवितवांश्चिराय धन्योऽसौ ॥

( १८ )

जयपुरनगरे दिव्ये सर्वविधं यत्नमास्थाय।
गुणगौरवसंघटनातेनकृता दिव्यरूपैव ॥

( १९ )

अध्यापकतां स्वीयामारभ्यात्रैव सेवार्थम्।
भारतसेवि-समाजः सम्यक् संसेवितोऽनेन ॥

( २० )

सुखाड़िया नामा यो मुख्यो मन्त्री विभावितसुरूपः।
तेन सहास्य च मैत्री कामपि कमनीयतां याता ॥

( २१ )

जयपुरनगरं चैतत्प्रतीकभूतं तु विश्वमात्रस्य।
तत्र स्थित्वा नूनं सर्वः सफलो भवति जीवः ॥

( २२ )

नगरी सेयं जयपुरसंज्ञां प्राप्ता जयं निखिलम्।
प्रगुणीकृत्य निवासं तस्यात्रैव प्रयोजयति ॥

( २३ )

तत्र नगर्यां ये वै संजातास्ते जयं प्राप्य।
यावज्जन्मा सुगौरवपूर्णे स्थाने सुशोभन्ते ॥

( २४ )

सन्त्येवाऽन्यनगर्यः किन्तु विशिष्टात्र जयपुराभिख्या।
नगरी समस्तविश्वे तुलनां नतमां विधारयति ॥

( २५ )

यद् हृदये गोविन्दोवंशीमेकामहर्निशं दिव्याम्।
राधासहितो गायति का वा तस्या हि तुलना स्यात् ॥

( २६ )

श्रीरामचन्द्रमन्दिरमादायात्रैव चैकदेशेषु।
संस्कृतविद्याशाला विश्वख्याता विराजिता यत्र।।

( २७ )

आंग्लानां विद्यानां विशालशाला: प्रतिष्ठिता यत्र।
ज्ञानानां तु समुद्र: कश्चन नित्यं तरंगितस्तत्र।।

( २८ )

यस्मिन् कालेऽन्यत्र च विज्ञानं स्वल्पतममासीत्।
तस्मिन् काले सेयं नगरी विज्ञानदीपितैवासीत्।।

( २९ )

राजस्थानप्रान्तं त्यक्त्वा किं वास्ति भारतं वर्षम्।
संसारो गतशोभो राजस्थानं विना ज्ञेय:।।

( ३० )

तस्यैव राजधानी जयपुरनगरी विभाति मूर्धन्या।
पुण्यमयीयं नगरी धन्या सर्वैर्विराजिता देवै:।।

( ३१ )

तत्र शिरोमणिभूतो मण्डनमिश्रोऽस्ति कामरूपोऽयम्।
सर्वान् संस्कृतकामान् पूरयितुं नित्यसंनद्ध:।।

( ३२ )

अभिनन्दनयोग्योऽयं सर्वेषां संस्कृतज्ञानाम्।
मान्यस्तथा वदान्यो भातितरां भूमिवलयेऽस्मिन्।।

( ३३ )

अद्यापि नित्यमसमो नेता संस्कृतसमाजस्य।
देहल्यां देहल्यां देहल्यां भाति सर्वत्र।।

( ३४ )

सर्वाभ्यो नगरीभ्यो गरीयसी देहलीनगरी।
भारतवर्षस्येयं विख्याता राजधानीति।।

( ३५ )

तस्यां नासीत्कश्चन संस्कृतविद्यालयोऽप्येकः।
गौरवसहितं किञ्चिन्नाम यदीयं ग्रहीतुमपि शक्यम् ॥

( ३६ )

महामहोपाध्यायः श्रीहरिनारायणः शास्त्री।
देहल्यामेवासीत्प्रख्यातो भारते वर्षे ॥

( ३७ )

प्रभुदत्तशास्त्रिवर्यो विचक्षणः कविवरो वापि।
देहल्यामेवासीत्प्रकाण्डपाण्डित्यपरिपूर्णः ॥

( ३८ )

विद्यालंकारोऽसौसीदिन्द्रः समीहितः सर्वैः।
केन्द्रीभूतं किन्तु स्थानं नासीत्तु संस्कृतायात्र ॥

( ३९ )

गमनागमनं त्वासीत्सर्वेषामेव धीराणाम्।
किन्त्वत्र राजधान्यां संस्कृतशिक्षा नगण्यासीत् ॥

( ४० )

श्रीगिरिधरशर्माणो नैकं वारं प्रकटयन्तः।
खेदं नैजं परमं मृशन्ति स्माथ विषयेऽस्मिन् ॥

( ४१ )

श्रीमान् नरहरिविष्णुर्गाडगिलो धारयामास।
संस्कृतविद्याशालानिर्माणं शीघ्रमेव संस्कर्तुम् ॥

( ४२ )

श्रीदेशमुखवरेण्यश्चार्थिकमन्त्री तु देशस्य।
विषयेऽस्मिन् सन्नद्धो मिलति स्मात्रैव सर्वदा दीप्तः ॥

( ४३ )

राष्ट्रपती राजेन्द्रप्रसादवर्योऽथ संस्कृते भक्तः।
विद्यालयस्य कायां समर्थयामास हृदयेन ॥

( ४४ )

बलवन्तो नागेशो दातारो दक्षिणस्वामी।
संस्कृतसेवाकार्ये सर्वैः संसाधितो यत्नैः॥

( ४५ )

श्रीमाँल्लालबहादुरशास्त्री प्राणोऽस्य देशस्य।
मण्डनमिश्रैरेभिः संस्कृतकार्ये समानीतः॥

( ४६ )

भारतदीप्तिः साक्षात्काचित्सा चेन्दिरागान्धी।
संस्कृतसमाजमध्ये संगतिमसमां करोति स्म॥

( ४७ )

राधाकृष्णन्वर्यो राष्ट्रपतिः पूजितः सर्वैः।
संस्कृतसंसेवायां शोभनभावैः समानीतः॥

( ४८ )

मण्डनमिश्रः सोऽयं मण्डयितुं सर्वसंसारम्।
संस्कृतभाषादीप्त्या सततंलग्नः समाभाति॥

( ४९ )

नित्यमसंख्यातानां हृदयानां यो विकासयिता।
मण्डनमिश्रः सोऽयं कथमिव संवर्ण्यतां नाम॥

( ५० )

यत्राऽस्ति गुणगणानामहमहमिकयैव संस्थितिः काचित्।
श्रीमान् मण्डनमिश्रः सोऽयं सर्वत्र वन्दनीयोऽस्ति॥

( ५१ )

संस्कृतविद्योन्नतये समर्पिताः सर्वनिःश्वासाः।
काव्यमयोऽयं पुरुषो मण्डनमिश्रो विनम्यते सर्वैः॥

( ५२ )

यस्य हि कृपाकटाक्षं सम्प्राप्तुं दूरदूरतरदेशात्।
आगच्छति जनतेयं वन्द्योऽसौ मण्डनो मिश्रः॥

( ५३ )

साहित्यस्य समुद्रं विलोडमानेन तेनैव।
ग्रन्थानां निर्माणं कृतमास्ते दिव्यतायुक्तम्॥

( ५४ )

आचामन्ति यदीयं पुण्योत्कर्षं जनाः सर्वे।
तादृशलोका निखिले संसारे वन्दनीयाः स्युः॥

( ५५ )

येषां यशसा धवलीकृतमेवेदं नभो निखिलम्।
तेषां पूज्यत्वं वा केनाधन्येन नो धार्यम्॥

( ५६ )

एतत्काव्यं शतकं यद्वर्णनलग्नमाभाति।
सोऽयं मण्डनमिश्रः सर्वेषां माननीयोऽस्ति॥

( ५७ )

केचित्क्वचित्कथंचिद् विख्याता यान्ति सफलत्वम्।
सूर्यसमोऽसौ राजति मण्डनमिश्रस्तु संस्कृताऽकाशे॥

( ५८ )

येन विना नो कार्यं संसिध्यति संस्कृतस्याद्य।
सोऽयं मण्डनमिश्रः कथं न संस्तूयतां नाम॥

( ५९ )

परंपरां यो रक्षति परिपालयते च नित्यशो नूत्नाम्।
तस्यास्यैव वरेण्यस्यात्र सभाजनमहो जातम्॥

( ६० )

नित्यमहोभावैरयमादीप्तः सर्वकार्याणाम्।
संचालनसंवर्धनसंयोजनकौशलं धत्ते॥

( ६१ )

मित्राण्याकारयते कार्ये कार्ये नियोजयति।
धनपूजां संमानं कुरुते कारयति चाह्वानैः॥

( ६२ )

पूज्यानां पूजायां व्यतिक्रमं नो कदापि यः कुरुते।
तेनैव वर्धितमना जयत्यसौ मण्डनो मिश्रः॥

( ६३ )

युगनिर्माता पुरुषः कश्चित्संजात एवाऽयम्।
देहल्यां येनाऽसौ संस्कृतसंसार आरचितः॥

( ६४ )

निखिलेऽस्मिन् सद्देशे प्रान्ते प्रान्ते विनिर्मितान्यत्र।
विद्यापीठान्यमुना पुण्यमिदं संस्कृतस्यैव॥

( ६५ )

केन्द्रप्रशासनानां ध्यानं सत्संस्कृते कर्तुम्।
दिवानिशं कार्याणां मध्ये सन्तिष्ठते शूरः॥

( ६६ )

संस्कृतजागरणानां दिव्यं कालं समानेतुम्।
दिव्यभविष्यत्कालं साधयितुं लग्न एवाऽयम्॥

( ६७ )

भारतराष्ट्रपतिश्रीवेंकटरामन् महाशयो नूनम्।
संस्कृतसेवाकार्ये सन्नद्धो नित्यमेवास्ते॥

( ६८ )

श्रीनरसिंहो रावः प्रधानमन्त्री तु देशस्य।
संस्कृतसेविसमाजे बद्धादर एव बाभाति॥

( ६९ )

श्रीमानर्जुनसिंहः शिक्षामन्त्रीमहोदयोऽनेन।
संस्कृतसेवाकार्ये समीकृतो यत्नमास्थाय॥

( ७० )

संस्कृतसेवायां ननु सर्वे बद्धादरा जाताः।
तेषां प्रबोधकार्ये संलग्नो मण्डनो मिश्रः॥

( ७१ )

यस्मिन् दिव्ये कर्मणि सर्वेषां वै मनो लग्नम् ।
संयोजनाख्यकार्यं सुदुस्तरं दृश्यते लोके ।।

( ७२ )

संस्कृतसेवा सर्वेषासैषामान्तरे रचिता ।
गंगामवतारयितुं भगीरथो मण्डनो जातः ।।

( ७३ )

संस्कृतगंगां योऽसौ भूमाववतारयति नित्यम् ।
तस्याः प्रवाहममलं जनजननिकटे समातनुते ।।

( ७४ )

विद्वत्संघानेतान् प्रगुणीकुरुतेऽद्य निर्मलैर्यत्नैः ।
परिपूजयते विद्वत्संघानेतान् सदाह्वानैः ।।

( ७५ )

सर्वविधं श्रमजातं स्वीकृतमेतेन सेवार्थम् ।
अपमानान्यपि सोढान्यैतेनात्रैववन्द्येन ।।

( ७६ )

सुमहत्कार्यविलग्नैः पुरुषैर्यद्यत् प्रकल्प्यते पश्चात् ।
तत्सर्वं विज्ञातं येनात्रैवाथ पूर्वमेव ननु ।।

( ७७ )

मीमांसाकेसरिणां श्रीमत्पट्टाभिरामाणाम् ।
शिष्यत्वं समवाप्यह्यासादितमेव जीवनं तत्त्वम् ।।

( ७८ )

वाराणस्यामपि वा दिव्यं संस्थानमद्य निर्माय ।
वैदिकलौकिकसेवाकर्मणि निरतो विराजते सोऽयम् ।।

( ७९ )

कामं सन्तु सुविपुला विद्वांसो वाथवाचार्याः ।
कर्मसु कर्मसु कुशलः किन्त्वेको मण्डनो मिश्रः ।।

( ८० )

ते ते ते विद्वांसस्तिष्ठन्तस्तत्र तत्रैव।
सर्वेषामपि पार्श्वे तिष्ठत्येकस्तु मण्डनो मिश्रः॥

( ८१ )

बाधादूरीकरणे वृत्तीनां सम्प्रदाने वा।
सम्पूर्णं सद्यत्नं कुर्वन्नाभाति भव्यतां यातः॥

( ८२ )

भास्करराजितगेहो वाचस्पतिमण्डितस्वान्तः।
श्लोकैः संस्तवनीयो नित्यमयं मण्डनो मिश्रः॥

( ८३ )

विद्या विनीतकायो नित्यं सत्यं विगतमायः।
दिव्यभारतीजायो मण्डनमिश्रस्य संकायः॥

( ८४ )

श्रीमद्धनुमत्सेवासंधारितभक्तिसारोऽयम्।
भक्तिमये साम्राज्ये विनीतवेशो विभाति मधुराभः॥

( ८५ )

नम्रं भावं नित्यं भजमाना देशनेतारः।
भारतवर्षसमुन्नतिकर्मणि सफला विलोक्यन्ते॥

( ८६ )

श्रीनरसिंहोराव: प्रधानमन्त्री विनम्रताभरितः।
आशासंचाराणामद्यतनी मूर्तिरेवाऽस्ते॥

( ८७ )

संस्कृतमेव नितान्तं भारतवर्षस्य सर्वस्वम्।
आत्मा भारतवर्षस्यास्ते सा संस्कृता वाणी॥

( ८८ )

कामं संस्कृतभाषासंभाषणमौनतामाप्ताः।
लोकाः सन्तु, समस्तां श्रद्धां तत्रार्पयन्ति हृदयेन॥

( ८९ )

अयमेवाद्य सुमिलितः कालस्त्वेतादृशो दिव्यः।
भारतवर्षस्यात्मा यास्मिन् नूनं विकासमायातः॥

( ९० )

कालस्य येऽपि लाभं स्वीकर्तुं नो विजानन्ति।
ते तु विफलताभरिता जन्मनि जन्मनि विजायन्ते॥

( ९१ )

कालेऽस्मिन् भाषेयं पूर्वं गौरवमनुध्याय।
सर्वैः प्रचारणीया संपोष्या सर्वभावेन॥

( ९२ )

संस्कृतसाहित्ये या श्रद्धा सर्वेषु देशेषु।
तस्या लाभं प्राप्तं यत्नान्यायोजनीयानि॥

( ९३ )

नो चेद् भारतवर्षस्यास्तित्वं नैव सन्तिष्ठेत्।
अन्योन्नतभावानामन्ये देशाः प्रवीणाः स्युः॥

( ९४ )

वैज्ञानिकोन्नतीनां योगः सत्संस्कृतेन संस्कार्यः।
तेन समुज्ज्वलरूपैर्भाषेयं द्योतितैव स्यात्॥

( ९५ )

अद्याप्यनेकलक्षं संख्या या संस्कृतज्ञानाम्।
कोटिमिता सा वर्धतु यत्नानुष्ठानवेलायाम्॥

( ९६ )

सर्वविधैर्नवयत्नैर्वर्धत एवाद्य संस्कृता वाणी।
जनतायां किन्तु तथा विज्ञानं संस्कृतस्य नैवास्ते॥

( ९७ )

जनतन्त्रात्मकशासनपद्धत्यां जनमनस्सु या तिष्ठेत्।
भाषा सैव नितान्तं संशोभितवैभवा भवति॥

( ९८ )

हेतोरस्मान्नित्यं मण्डनमिश्रादयो देशे ।
भ्राम्यन्तः परिचरणं प्रचाररूपं प्रकुर्वन्ति ।।

( ९९ )

कुलपतिपदास्थितानामेतेषां मण्डनाद्यानाम् ।
या दीप्तिः प्रस्फुटिता नूनं सा वन्दनीयैव ।।

( १०० )

संस्कृतविद्याशाला याश्चैता निर्मिता जाताः ।
तासां विभाविलासा देशोन्नतिरूपका एव ।।

( १०१ )

महामहोपाध्यायश्रीगिरिधरविद्वत्तनूजन्मा
शिवदत्तचतुर्वेदो मण्डनशतकं निवेदयते ।।

——o——

# वर्णमातृकामण्डन—डॉ० मण्डन मिश्र

—डॉ० शिवसागर त्रिपाठी

विद्याधिष्ठात्री वर्णमातृका देवी शारदा के परमोपासक विद्वन्मण्डलमण्डन डा० मण्डन मिश्र का अभिधान संस्कृत जगत् में सर्वश्रुत और विश्रुत है। आप में नैसर्गिकी प्रतिभा है, पर उसे श्रम निष्ठा और समर्पण भाव ने और भी प्रखर बना दिया है। आचार्य दण्डी ने ठीक ही लिखा है—'श्रुतेन यत्नेन च वागुपाश्रिता ध्रुवं करोत्येव कमप्यनुग्रहम्'। आपने अपना समग्र जीवन संस्कृति, विशेषतः संस्कृत के पर्युत्थान में लगाया और उसे अपने पैतृक गाँव हणूतिया किंवा अपरा काशी जयपुर नगरी से उठाकर राष्ट्रिय ही नहीं, उसे अन्तरराष्ट्रिय प्रतिष्ठा दी।

एक सामान्य ग्रामीण पण्डित-परिवार में जन्मे युवक मदनलाल शर्मा से डा० मण्डन मिश्र तक की यात्रा उनके उदीयमान एवं उत्तरोत्तर परिवर्धमान व्यक्तित्व का अनुकरणीय निदर्शन है। आपने उच्च शिक्षा आचार्य और एम०ए० के बाद पी-एच्०डी० तक प्राप्त की। विविध पुरस्कारों और विद्याभास्करादि उपाधियों की शृंखला में सर्वोच्च राष्ट्रपति पुरस्कार का सम्मान अर्जित किया। देश और विदेश में ख्यातनामा डा० मण्डन मिश्र में अहङ्कारज्वर लेश मात्र भी नहीं आया। ठीक ही है—'विद्वान् कुलीनो न करोति गर्वम्'।

संस्कृत पण्डित प्रायः सरल, प्रौढि सम्पन्न, अन्तर्मुखी और परम्परावादी हुआ करते हैं, पर मण्डन जी इस दृष्टि से कूटनीतिज्ञ और व्यवहारविद् भी हैं। समय के साथ चलना उन्हें आता है। प्रवञ्चनामय जगत् में वह सदा सचेत और जागरूक रहते हैं। तभी तो पूर्व प्रधानमन्त्री श्री लालबहादुर शास्त्री, अपने जयपुर आगमन पर मिश्र जी के घर पर, सहसा कह उठे थे कि मैंने ऐसा व्यवहार-कुशल और चतुर संस्कृत पण्डित नहीं देखा। 'विद्याविनयेन शोभते'—यह उक्ति भी उन पर पूर्णतः घटित होती है तभी तो वे मन्त्रियों, नेताओं, साधु-सन्तों और उच्चाधिकारियों से संस्कृत सेवार्थ कठिन कार्यों को भी सम्पन्न करा सके। वस्तुतः लेखनी पकड़कर काम करवा लेने की इनमें अपूर्व क्षमता है।

आपके उल्लेखनीय कार्यों में अ० भा० संस्कृत साहित्य सम्मेलन में महासचिवत्वेन सक्रियता, दिल्ली में राजेन्द्र संस्कृत पुस्तकालय तथा राजस्थान में मनोहरपुर, मानपुरी, महापुरा और मेड में संस्कृत विद्यालयों की स्थापना है। दिल्ली में दिल्ली संस्कृत विद्यापीठ की भी स्थापना की थी, जो आगे चलकर श्री लाल बहादुर शास्त्री केन्द्रीय संस्कृत विद्यापीठ और बाद में विश्वविद्यालय के स्तर

को प्राप्त कर सका। मिश्र जी क्रमशः इसके निदेशक, प्राचार्य और कुलपति बने और इसी पद से अवकाश प्राप्त किया।

मिश्र जी ने अपने प्रभावकौशल से प्रत्येक राज्य में केन्द्रीय संस्कृत विद्यापीठों की स्थापना की और संस्कृत-प्रौढि की रक्षा करने का प्रयास किया। यही नहीं दिल्ली और तिरुपति में संस्कृत विश्वविद्यालयों की भी स्थापना की। जयपुर में संस्कृत विश्वविद्यालय की स्थापना के लिए सतत प्रयत्नशील हैं। उच्चशिक्षामन्त्री की ओर से घोषणा हो चुकी है। अब कार्यान्वयन की प्रतीक्षा है।

जयपुर में राजस्थान संस्कृत अकादमी की स्थापना में भी आपका योगदान रहा, जिसके आप प्रथम अध्यक्ष बने। इससे राजस्थान में संस्कृत का चतुर्दिक् विकास हुआ। सारस्वत सर्जना के प्रोत्साहन हेतु त्रैमासिकी स्वरमङ्गला का प्रकाशन प्रारम्भ किया और लेखकों के लिए प्रकाशन सहायता की व्यवस्था की। साथ ही सर्वोच्च माघपुरस्कार, पन्नालाल जोशी पुरस्कार, आ० नवलकिशोर काङ्कर वेदाङ्ग पुरस्कार और गद्यलेखन में अम्बिकादत्त व्यास पुरस्कार प्रचालित किये। इसी योजना में व्यास पुरस्कार मुझे भी प्राप्त हुआ। अपनी पत्नी की स्मृति में महिलाओं के लिए भारती मिश्रा पुरस्कार प्रारम्भ किया। आज नाट्यविद्या, व्याकरण, काव्यशास्त्र, अनुसन्धान, विज्ञान आदि पर विविध पुरस्कार भी दिये जा रहे हैं। अस्तु,

डा० मिश्र का प्रिय विषय मीमांसा दर्शन रहा है, जो आपको अपने गुरु श्री पट्टाभिराम शास्त्री से विरासत में मिला है। आपने इस गुरु-गरिमा को बनाए रखा तथा छात्रों में निहित व्युत्पत्ति को जागृत करने और स्तरीय ज्ञान के सम्पादन में दत्तचित्त रहे हैं। लगभग १५ छात्रों को पी-एच्०डी० उपाधि के लिए निर्दिष्ट किया। लगभग ५० शोधपत्र, ५५ आकाशवाणी या दूरदर्शन कार्यक्रम तथा ४० रचनाओं के लेखन या सम्पादन के रूप में साहित्य सेवा की है। इसके अतिरिक्त सभा-चातुर्य, वाक्पाटव, सौम्यता, सदाशयता और उदारता आदि आपके व्यक्तित्व के गुण हैं। आप मित्रों और विद्वानों के प्रति आत्मीय भाव रखते हैं और उनका समादर भी करते हैं।

मिश्र जी से मेरा परिचय बहुत पुराना है। १९५६ में राजकीय महाविद्यालयीय सेवा में ब्यावर आने के बाद एक विशाल सारस्वत समारोह के रूप में चित्तौड़गढ़ में आयोजित अ०भा० संस्कृत साहित्य सम्मेलन में मैं प्रथमतः सम्मिलित हुआ। इसमें मेरा देश के विशेषतः राजस्थान के विद्वानों से सम्पर्क हुआ। वहीं विद्वन्मूर्धन्य पं० गिरिधर शर्मा चतुर्वेदी के दर्शन किये और ओजस्विनी वाग्मिता सुनी। वहीं मैंने देखा कि एक छरहरे शरीर का कृशकाय युवक मञ्च-सञ्चालन का गुरुतर भार वहन किये हुए है और धाराप्रवाह संस्कृत बोलकर एक चुम्बकीय

आकर्षण पैदा कर रहा है। यह युवक और कोई नहीं मिश्र जी ही थे। यहीं से मेरो परिचय-यात्रा प्रारम्भ हुई। विभिन्न सम्मेलनों, समारोहों, संगोष्ठियों और समितियों में यह प्रगाढ़तर होती गयी। मैंने पाया उनमें सहयोग, उपकार और परहित की भावना कूट-कूट कर भरी हुई है। साथ ही पिछली पंक्ति को आगे बढ़ाने और साथ में लेकर चलने का दायित्व भी वे निभाते हैं। संस्कृत के नाम पर कहीं कुछ हो रहा हो, उसे तन, मन, धन से प्रोत्साहित करने का लक्ष्य आपका रहता है, अतः आपकी उपस्थिति से गरिमा के साथ 'रौनक' भी बढ़ जाती है।

संस्कृत विभागाध्यक्ष, (राजस्थान विश्वविद्यालय, जयपुर) के रूप में मैंने समारोहों या विभागीय कार्यों के लिये जब-जब स्मरण किया, तब उन्होंने सद्यः सहयोग प्रदान किया। इस समय आपने संस्कृत-विभाग के संस्थापक डा० पुरुषोत्तम लाल भार्गव की अध्यक्षता में और डा० रामचन्द्र के आतिथेयत्व में जिस संस्कृत-शोध-परिषद् का उद्घाटन किया था, वह आज भी यथावत् चल रही है।

डा० रामचन्द्र द्विवेदी आप के अभिन्न थे—एक और एक ग्यारह थे। इन दोनों की ही संस्कृत-सेवा अविस्मरणीय है। अतः २७ सितम्बर '९३ को जब डा० द्विवेदी का रेल दुर्घटना में आकस्मिक निधन हो गया तो जैसे आपको पक्षाघात हो गया। अतः जब आपने प्रस्ताव रखा कि डा० द्विवेदी की स्मृति में कोई आयोजन होना चाहिए, तो मैंने इसे तत्काल स्वीकार कर लिया, क्योंकि हमारे विभाग पर तो वज्रपात ही हुआ था। योजना बनी और 'शैवागम की वेदमूलकता और डा० द्विवेदी का वेद, दर्शन और साहित्य को अवदान' विषय पर एक द्विदिवसीय राष्ट्रिय संगोष्ठी करने का मानस बना। डा० मिश्र ने महर्षि सान्दीपनि वेदविद्या प्रतिष्ठान (उज्जैन) से तथा तत्कालीन कुलपति डा० टी० के० एन्० उणित्तान ने विश्वविद्यालय से आर्थिक अनुदान की व्यवस्था की।

इस संगोष्ठी की सफलता के लिए आप सदा सचेत रहे। लगभग प्रतिदिन मुझसे दूरभाष पर दैनन्दिन प्रगति से अवगत होते रहे तथा समस्याओं के समाधान में योग देते रहे। फलतः १५-१६ मार्च १९९४ को यह कार्यक्रम सम्पन्न हुआ, जिसमें देश के विश्वविद्यालयों, कालेजों, शोध संस्थानों से, तथा स्थानीय कुल मिलाकर लगभग ६० विद्वान् सम्मिलित हुए, जिनमें स्वयं डा० मण्डन मिश्र (कुलपति ला०शा०रा०सं० विद्यापीठ मानित विश्वविद्यालय, दिल्ली), डा० वेङ्कटाचलम् (कुलपति डा० सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी), डा० रमारञ्जन मुखर्जी (कुलाधिपति, राष्ट्रीय संस्कृत विद्यापीठ मानित विश्वविद्यालय, तिरुपति), डा० सी० आर० स्वामिनाथन् (वरिष्ठ शिक्षाविद्) डा० आर्० एन्० सिंह (वर्तमान कुलपति, राजस्थान विश्वविद्यालय, जयपुर) डा० दयानन्द भार्गव (संस्कृत विभागाध्यक्ष, जोधपुर विश्वविद्यालय) डा० राधावल्लभ त्रिपाठी (संस्कृतविभागाध्यक्ष, सागर विश्वविद्यालय) आदि के नाम विशेष उल्लेखनीय हैं।

इस प्रकार डा० मण्डन मिश्र की बहुमुखी कार्यावली प्रशस्य है। शोध-प्रभा के इस विशेषाङ्क के लिए यह संस्मरणात्मक लेख लिखते हुए परम हर्ष का अनुभव हो रहा है, साथ ही मन भी पवित्र हो रहा है—'विद्वत्संस्मरणान्नूनं पूतं भवति मानसम्'।

इस अवसर पर मैं डा० मिश्र के दीर्घायुष्य और सुस्वास्थ्य की कामना करता हूं, साथ ही उस वन्दनीय की वन्दना करता हूं, क्योंकि—

वदनं प्रसादसदनं सदयं हृदयं सुधामुचो वाचः।
करणं परोपकरणं येषां केषां न ते वन्द्याः॥

# कश्यपमीरे १९६२ ईस्व्यां डॉ० मण्डनमिश्रमहोदयानाम् ऐतिहासिकीयात्रायाः वर्णनम्

--डॉ० बदरीनाथकल्ला

"अहो सुन्दरमुद्यानं कुङ्कुमपुष्पवासितम् ।
वसन्ततौं कथं नष्टं झञ्झावातेन सांप्रतम् ।।"

मीमांसादर्शनमर्मज्ञानां संस्कृतसेवाव्रतनिरतानां विविधशास्त्रनिष्णाता-नामनेकपुरस्कारप्राप्तलब्धयशसां देशेसंस्कृतविद्यापीठस्थापनाभिः [संस्कृतस्यलुप्त-महिमावर्धकानां भारतमानचित्रे संस्कृतातीतगौरवप्रतिष्ठितानां श्रीलालबहादुर-शास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य पूर्वकुलपतीनां डॉ० मण्डनमिश्रमहोदयानां नाम संस्कृत-जगति को न वेद ?

एभिः सह मदीयः प्रथमः साक्षात्कारो वितस्ताविमलजलधारापवित्रिते श्रीनगरे मईमासस्य विंशतितारिकायां १९६२ ख्रिस्ताब्दे जातः । तदानीमहं 'कश्मीर संस्कृत साहित्य सम्मेलनस्य' महामंत्री आसम् । श्रीनगरस्थ-गणपतिविहारे (वर्तमान-गणपतयार) मद्गृहे आगत्य डॉ० मण्डनमिश्रमहाभावानां व्यक्तित्वेन मत्परिवारस्य सर्वे सदस्याः प्रसन्नमनस्काः जाताः विशेषतः कर्मकाण्डविशारदा मत्पितृपादाः पण्डितविदलालकल्ला, एषामल्पे वयसि संस्कृतोद्धारप्रयासं दृष्ट्वा आश्चर्यचकिता बभूवुः । तदानीं पितृपादैः कश्मीरीभाषायामहं कथितः 'यत् सुरभारतीसमुपासका डॉ० मण्डनमहोदया अवश्यं स्वनिष्कामकर्मणः फलं प्राप्स्यन्ति' । तस्मिन् काले तत्कथनस्याभिप्रायो मया न ज्ञातः । अधुनाहं चिन्तयामि तत्कथनन्तु सत्यमेवसिद्धम् । यतः "सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरण-प्रवृत्तयः" इत्युक्तेः ।

पश्चात् मिश्रमहोदयानां कार्यप्रणालीमनुसृत्य मया कार्यक्रमस्य रूपरेखा निर्मिता । द्वितीयदिवसे २१ तारिकायां कश्मीरसंस्कृतसाहित्यसम्मेलनस्य कार्य-कर्तृणामेकाऽन्तरङ्गसभा, एषामाध्यक्ष्ये सम्पन्ना यस्यां डॉ० मिश्रमहोदयैः संस्कृत-शताब्दीग्रन्थयोजनायाः कार्यपद्धतिः विस्तारेणास्माकं समक्षं समुपस्थापिता । तृतीयदिवसे श्रीनगरस्थे सत्थू बरबर शाहे 'महिलामहाविद्यालये' विशेषाधिवेशनं सम्पन्नम् । मिश्रमहोदयानां सम्माने मया पूर्वं कवितापाठो विहितः । पश्चात् स्वागतभाषणं महामंत्रिरूपेण दत्तम् । अत्र तत्साररूपं प्रस्तूयते—'अखिलभारतीय संस्कृतसम्मेलनस्य महान्तमुत्तरदायित्वपूर्णं कार्यभारं स्वीकृत्य, विविधप्रान्तपर्यटन-

कार्यक्रमे सर्वप्रथममत्रभवद्भिः भारतललामभूते कश्यपमीरे (कश्मीरे) पदार्पणं कृतमस्ति। तदर्थं काश्मीरिका वयं संस्कृतभाषाप्रेमावर्जितहृदयाः श्रीमतां महान्तमाभारं मन्यामहे। विशेषतः महानुभावेन भवता यदद्य निजसमयमूल्यमपरिगणय्य स्वपुण्यागमनेन अस्य कश्मीरसंस्कृतसाहित्यसम्मेलनस्य गौरवं संवर्धितमस्ति, तेन वयमत्रभवतो महान्समुपकारमङ्गीकुर्वन्तोऽत्रभवत शतशो धन्यवादान् वितरामः, श्रीमतांदर्शनसौभाग्यं प्राप्य च वयमात्मानं परमसौभाग्यशालिनं मन्यमानाः, प्रेम्णा हर्षेण च तत्र भवतोऽभिनन्दनं कुर्वतः श्रीमते सविनयं सश्रद्धं च हार्दिकं स्वागतं व्याहरामः"। पश्चात् सं० सा० सम्मेलनस्य अध्यक्षैः जगद्धरभट्टसदृशैः प्रो० जगद्धरज़ाडूशास्त्रिभिः स्वागतभाषणमकारि—"विदितमेव एतत् अत्रभवतां महोदयानां यत् कश्मीरदेशस्य गरिमापूर्णमतीतं सर्वथा श्लाघनीयं कौतुकवर्धकञ्च वर्तते। सरस्वतीवरदपुत्र! श्रूयते च यत् यथा भवन्नामसादृश्यमावहतः मीमांसकस्य मण्डनमिश्रस्य गृहे शुकसारिका देववाणीं व्याहरन्तिस्म। तद्वदेवात्रापि काश्मीरेषु गृहे गृहे स्त्रियोऽपि मातृभाषावत् संस्कृते प्राकृते च विलासयुक्तं वाक्चातुर्यं निरर्गलं प्रकटीचक्रुः"।

"आस्तां तावदेतावदेवाधुनाऽन्ये च सन्ति अस्यां संसदि संस्कृतज्ञाः बहवः पण्डिता ये अस्मिन् विषये निजानल्पप्रज्ञया प्रकाशपुञ्जं परिक्षिप्य, इतिहासगर्भस्थितं तथ्यञ्चानावृत्य प्रचुरां सामग्रीमुपस्थापयितुं शक्नुवन्ति।"

"निखिले भारतेवर्षे प्रतिप्रान्तं संस्कृतसम्मेलनस्य शाखाः संस्थापयता श्रीमताविरतेनाश्रान्तेन च देवभाषायाः प्रचारो विधीयते। सत्पात्राणां साहाय्यसम्मानदान-समुत्साह-संवर्धनेन समद्भूतं श्रीमतः शीतकर-कर-सन्दोह शुभ्रं यशः प्रतिदिशं विद्योतते। सद्विवेक-सद्गुणग्राहित्व-सदाचारसौजन्यादिगुणगण-मण्डितस्य मण्डनमिश्रस्येव भवतोऽनन्तगुणकीर्तनं कियत् पर्यन्तमस्माभिः प्रस्तोतुं पार्यते।"

"श्रीमतः शुभागमनेन वयं नितान्तंकृतकृत्याः स्मः। अस्यां संसदि च यदद्यभवतः पदार्पणं तस्य स्मृतिः चिरकालमस्माकं हृदयपटलेषु उट्टंकिता स्थास्यति। भविष्यत् काले च नवसंततयाः कृते उत्साहवर्धयित्री भविष्यति। विद्वन्मानसहंस! अल्पकालीनमेव इदं संस्कृत-साहित्य-सम्मेलनम्। मदीयं प्रधानत्वञ्चास्य नैव वर्षाधिकम् अतोऽत्रभवन्तः श्रीमत्स्वागतसमारोहार्थमायोजितायाः अस्याः सभायाः सभापतित्वं भजन्तः, श्रीमण्डनमिश्रवर्याः सविनयं प्रार्थ्यन्ते यत् अत्रभवान् स्थानीय सं० सा० सम्मेलनस्य संरक्षणं, पथप्रदर्शनं सम्मानोत्साहवर्धनञ्च कृपया विदधातु, येन सम्मेलनस्य कार्यकर्त्तारोऽत्रभवतः सुहृत्स्नेहं सोदरस्नेहं वा लब्ध्वा चिरकालप्रमुदिताः सन्तोऽस्मिन् पुण्यकार्ये दत्तचित्ताः भवेयुः।"

अनन्तरञ्च सभाया अध्यक्षैः डॉ० मण्डनमिश्रमहोदयैः स्वकीयं सारगर्भितं

भाषणं प्रदत्तम् । स्वभाषणे तैः संस्कृतस्य वर्तमानस्थितौ भारतीयगणराज्य द्वारा संस्कृतोन्नत्यै दीयमानानुदानप्रदानादिषु संतोषः प्रकटितः। अन्ते च जम्मूकश्मीर-राज्याय तैः धन्यवादो दत्तः येनास्याः संस्कृतयोजनायाः कृते पञ्चदशसहस्रमुद्रानुदानं विहितम् ।

चतुर्थे दिवसे डॉ० मण्डनमिश्रमहाभागानां कथनेन मया स्थानीयविदुषामेका गोष्ठी समाहूता तत्र डॉ० मिश्रमहोदयैः शताब्दीग्रन्थस्य काश्मीरभागलेखनाय सुप्रबन्धाय चैका समितिः निर्मिता । समितेः समक्षं श्री मण्डनमिश्रमहाभागैः 'विश्वसंस्कृत-शताब्दीग्रन्थ' योजनायाः पूर्णः परिचयो दत्तः । ततो योजनायाः काश्मीरे प्रचालनाय स्वकीया कार्यप्रणाली प्रदर्शिता या सर्वैरनुमोदिता । तदनन्तरं जम्मू कश्मीरराज्यस्यैका समितिः स्थापिता यस्याः संयोजनभारः डॉ० गङ्गादत्त 'विनोदे' पातितः ।

एवञ्च डॉ० मण्डनमिश्रमहोदयानां कार्यकुशलतया इदं राष्ट्रियकार्यं समारब्धम् । तदनु अनेकाभिः संस्थाभिरेषामभिनन्दनायोजनानि सम्पादितानि तासु संस्थासु संस्थाद्वयं 'ब्राह्मणमहामण्डलं' तथा 'श्रीरूपादेवी शारदापीठ'मुल्लेखनीयम् । तत्रागतैर्विद्वद्भिर्यथा श्रीगोविन्दभट्ट शास्त्री, आचार्य श्रीदीनानाथ शास्त्री, श्रीत्रिलोकीनाथ भट्टशास्त्री, डॉ० राधाकृष्णकावादिभिः 'विश्वसंस्कृत-शताब्दी-ग्रन्थ' लेखने पूर्णसहयोगाय प्रतिज्ञातमेतादृशमहत्त्वपूर्णकार्य-सम्पादनकृते चाखिल भारतीयसंस्कृत-साहित्यसम्मेलनम्" भूरि भूरि प्रशंसितम् ।

जम्मूकश्मीर-राज्य प्रमुखैः श्री डॉ० कर्णसिंह महाराजैः सहापि डॉ० मण्डन-मिश्रस्य वार्तालापः राजभवने संजातः । यत्र श्रीमिश्रमहोदयैः शताब्दीग्रन्थ-योजनायाः सकलः कार्यक्रमः तेषां सविधे समुपस्थापितः । श्रीमहाराजमहोदयैरपि स्वकीयसहयोगप्रदानायाश्वासनं प्रदत्तम् ।

एतत् योजनायाः कार्यक्रमविषये स्थानीयशिक्षा-विभागाधिकारिणां समक्षमपि श्री मिश्रमहोदयैः सर्वमुपपादितम् । तेऽपि हृष्टमनस्काः सन्त एनां संस्कृत-योजनां प्रशंसितवन्तः । ग्रन्थसंपादने तदुपयुक्तकरणादीनां समुच्चयने विशेषसूचना-दीनां समुपग्रहणे च विभागेन स्वकीयसहयोगप्रदानमङ्गीकृतम् ।

एषां सर्वेषां कार्यक्रमाणां सूचनाः स्थानीय दैनिक 'मार्त्तण्ड' पत्रिकायां 'नवभारतटाइम्स' प्रभृतिष राष्ट्रिय समाचारपत्रेषु च विशेषतः डॉ० मण्डनमिश्राणां भाषणानि प्रकाशितान्यभवन् ।

२८ तारिकायां डॉ० मण्डनमिश्रा जम्मूभागस्य कार्यं पार्थक्येन सम्पादनाय जम्मनगरं प्रस्थिताः । २९ तारिकायां रात्रौ गीताभवने भाषणादि कार्यक्रमो जातः । तत्र विदुषां पुरस्तात् सर्वप्रथमं डॉ० मिश्रमहाभागैः विश्वसंस्कृत-शताब्दीग्रन्थ-योजनायाः जम्मू-कश्मीर राज्यसमितेश्च कार्यकलापस्योद्देश्यस्य च पूर्णः परिचयो

दत्तः। तत्रैव च जम्मू-कश्मीर-समितेरूपसमितिरपि संघटिता यस्याः संयोजिका डॉ० वेदकुमारी महोदया सर्वसम्मत्या निर्वाचिता। शताब्दीग्रन्थस्य जम्मूभागस्य लेखकानां विनियोजनं समये समये उपसमिति-सभायाः समायोजनं लेखकानां प्रगति विवरणादीनां समेषां कार्याणामुत्तरदायित्वं संयोजिकायै समर्पितम्। एवं जम्मू-काश्मीरराज्ये डॉ० मण्डनमिश्रमहोदयानामागमनेन प्रयासेन च तेषामैतिहासिकी यात्रा सफला जाता।

### काश्मीर प्रादेशिकसंस्कृतसाहित्यसम्मेलनान्तः—
### सङ्घटिता काश्मीरप्रदेशसमितिः

* १. श्री गङ्गादत्तशास्त्री 'विनोदः' (संयोजकः) संस्कृतप्राध्यापकः श्रीनगरस्थ-राजकीय एस०पी० कालेजस्य।

* २. श्री जगद्धर जाडू शास्त्री, एम०ए० भूतपूर्वनिदेशकः पुरातत्त्वविभागस्य, अध्यक्षः, महिलामहाविद्यालयस्य।

३. डॉ० शिवनाथ शर्मा शास्त्री, डो०ओ०सी० भूतपूर्वप्रधानपण्डितः जम्बू-कश्मीरानुसन्धानविभागस्य।

४. श्री काशीनाथ दरः, एम० ए० हिन्दी संस्कृतविभागाध्यक्षः, श्रीनगरस्थ एस० पी० कालेजस्य।

* ५. श्री अयूबखानः, एम० ए० हिन्दी प्राध्यापकः, श्रीनगरस्थकाश्मीरविश्व-विद्यालयस्य।

६. श्री सूर्यनारायण द्विवेदी शास्त्री, भूतपूर्वाध्यापकः, श्रीरूपादेवीशारदा-पीठस्य।

७. श्री मुकुन्दराम शास्त्री, सनातनधर्मोपदेशकः, आकाशवाण्या गीता-पाठकश्च।

* ८. डॉ० विष्णुदत्त शर्मा, एम० ए० पी-एच० डी० भूतपूर्वसंस्कृतप्राध्यापकः, कठुआ राजकीय कालेजस्य।

९. श्री ब्रदरीनाथ शास्त्री (कल्ला) संस्कृताध्यापकः, श्रीनगरस्थराजकीय-विद्यालयस्य।

१०. श्री त्रिभुवननाथ शास्त्री, संस्कृताध्यापकः श्रीनगरस्थराजकीय-विद्यालयस्य।

*११. श्री पृथ्वीनाथ पुष्पः, एम० ए० प्राचार्यः, पुञ्छस्थ राजकीयकालजस्य।

---

* एतच्चिह्नाङ्किता महानुभावाः काश्मीरराज्यसम्पादकमण्डलस्यापि सदस्या अभूवन्।

१२. श्री जियालालकौल:, एम० ए० भूतपूर्वः संस्कृतप्राध्यापक:, श्रीनगरस्थ एस० पी० कालेजस्य ।

१३. श्री मोतीलालपुष्करः शास्त्री, संस्कृताध्यापक:, श्रीनगरस्थ राजकीय-विद्यालयस्य ।

*१४. श्री दीनानाथयक्षः शास्त्री, भूतपूर्वप्रधानपण्डित:, जम्मूकाश्मीरानुसन्धानविभागस्य ।

**विश्वसंस्कृतशताब्दीग्रन्थे जम्बूकाश्मीरसम्बद्धस्य प्रथमभागस्य मूललेखका:**

**जम्बूवास्तव्याः**

१. श्री काकारामशास्त्री, 'द्वैगर्तिकविद्वद्विवरणावतरणिका' "अस्य शतकस्य संस्कृत विद्वांसः" इति लेखयो: ।

२. श्री रामकृष्णशास्त्री, 'जम्बूस्थश्रीरणवीरसंस्कृतानुसन्धानविभागीय-श्रीरघुनाथसंस्कृतमहापुस्तकालयविवरण'मिति लेखस्य ।

३. श्री अनन्तरामशास्त्री, 'जम्बूकाश्मीरराजवंशस्य संस्कृतेऽभिरुचि:' इति लेखस्य ।

४. श्री जयरामशास्त्री, 'श्रीरघुनाथ संस्कृत महाविद्यालय:' धर्मार्थविभागीया अन्ये विद्यालयाश्च' इति लेखयो: ।

५. श्री रामनाथशास्त्री, 'अध्ययनाध्यापनसर्वेक्षणम्' सर्वकारकृता: संस्कृतसेवा: स्वयंसेविनीनां संस्कृतसंस्थानां कार्याणि, इति लेखानाम् ।

**काश्मीरवास्तव्याः**

१. डॉ० विष्णुदत्त शास्त्री, एम० ए० पी-एच०डी०, अनुसन्धानेन गवेषणया वा प्राचीनग्रन्थानां पाण्डुलिपीनां चोपलब्धि:, इति लेखस्य ।

२. श्री दीनानाथ यक्ष शास्त्री, 'प्राचीनग्रन्थानामस्मिन् शतके कृता: संस्कृत-व्याख्या' इति लेखस्य ।

३. श्री गङ्गादत्त शास्त्री 'विनोद:' एम०ए० वेदाचार्य:, संस्कृतग्रन्थानां टीकानुवादो वा सम्पादिता: काव्यमालाग्रन्थाश्च इति लेखस्य ।

४. श्री त्रिभुवननाथ शास्त्री, 'काश्मीरस्य वृत्तपत्राणां विवरणम्' इति लेखस्य ।

५. श्री बदरीनाथ शास्त्री (कल्ला) बी०ए० 'अस्य शतकस्य संस्कृतविद्वास:' इति लेखस्य ।

६. श्री चमनलाल सप्रू: 'श्रीरामाश्रमश्रीशैवाश्रम-धर्मार्थट्रस्ट, श्रीरूपादेवी-

शारदापीठ-विद्याधराश्रमादीनां परिचयः, इति लेखस्य ।

७. श्री मोतीलाल पुष्करः 'स्वयंसेविनीभिः संस्थाभिः कृता संस्कृतसेवा' इति लेखस्य ।

८. श्री सत्यपाल शास्त्री, एम० ए० 'संस्कृतपोषकाः' इति लेखस्य ।

९. श्रीराधाकृष्ण ज्राडूः 'अस्मिन् शतके लिखिताः संस्कृतग्रन्थाः' शिक्षा-संस्थानाम् अनुसन्धानशालानां, संस्कृतपुस्तकालयानां, संस्कृतानुरागिणां, परिचय इति लेखस्य ।

१०. श्री राधाकृष्ण कावः 'कश्मीरस्य कुङ्कुमकस्तूरिकादिजन्मभूमित्वम्, प्राकृतिकः परिचयश्च' इति लेखस्य ।

इत्थं डॉ० मिश्रमहाभागानां कर्मठव्यक्तित्वेन विश्वसंस्कृतशताब्दीग्रन्थ-मालायाः जम्मू कश्मीर राज्यभागस्य प्रथमः खण्डः १९६६ ख्रिस्ताब्दे प्रकाशितः । अस्य ग्रन्थस्य सम्पादकीये डॉ० मण्डनमिश्राणामभिव्यक्तिः—

"सम्मेलनस्य योजनायाश्च कृतेऽयं सुवर्णमयः समयो वर्तते, यद् योजनाया अस्य प्रथमप्रयासस्य साफल्यावसरे श्रद्धेयः श्रीलालबहादुरशास्त्री सम्मेलनसभा-पतिपदं विभूषयति । तस्मै एव च महानुभावायास्या ग्रन्थमालाया इदमादिमं पुष्पं समर्प्यमाणं विद्यते । तस्य नेतृत्वे संस्कृतेन सम्मेलनेन च यदभिनवं जीवनमधिगतम्, तस्यैकं प्रत्यक्षं निदर्शनं शताब्दी ग्रन्थस्यायं भागो वरीवर्ति । सम्मेलनपरिवारस्य प्रधानाय तस्मै भागमिमं समर्प्य वस्तुतो वयं सर्वेऽपि कार्यकर्त्तारः कृतकृत्यतामनु-भवामः, विश्वसिमश्च यत् तेन महानुभावेन दीयमानं प्रोत्साहनमवलम्ब्य ग्रन्थस्य भागान्तराणां प्रकाशने भूयसी प्रगतिः सेत्स्यति इतिशम् ।" संप्रति प्राच्यसभ्यता-धारिधौरेयः डॉ० मिश्रो व्यवहारेण संस्कृतसंस्कृतिमयो भूत्वा समृद्ध साहित्ययशः-सौरभेण संस्कृतसाहित्योद्यानं सुरभिमण्डितं विदधन् स्वकीयैर्विद्वत्ता-विनम्रता-सौम्यता कार्यकुशलादिगुणग्रामैः संस्कृतविद्वत्समाजमौलिमुकुटायमानः संशोभते ।

यथा एषां व्यक्तित्वं प्रभावशालि तथा कृतित्वमपि । सत्यं डॉ० मण्डन-मिश्राणां संस्कृतसाहित्ये योगदानं महत्त्वपूर्णमेवनापितु स्वर्णाक्षरैरितिहासे समुल्लेखनीयञ्च ॥

# मधुराः स्मृतयः

—अमीरचन्द्र शास्त्री साहित्याचार्यः

देव्या शारदया स्वयं स्वचरणालङ्कारमञ्जीरयोः
बाह्याभ्यन्तरनादपूरितदिशोः श्रीमण्डनामीरयोः।
एकेनाखिलभारतीय विदुषामुद्बोधना साधिता—
त्वन्येनामरभारती पठितिषु प्रोत्साहिता साहिती ॥१॥

श्रीमद्दीनदयालुशर्मचरितं काव्यात्मनालेखितुं
वाञ्छत्तत्सुतयुग्मकानुनयतः श्रीमण्डनो मार्गयन्।
मां तद्गेहकदेहलोस्थिततनुः प्रत्यैक्षताभ्यागतं
तन्मुद्रापितवृत्तपत्रमददात्तत्कर्तुमावेदयन् ॥२॥

तस्मिन्नादिमदर्शने विनयवानप्येष तेजस्वितां
नो मुञ्चन्मम रोचते स्म मतिमान्मदस्मितो मञ्जुवाक्।
अङ्गीकृत्य वचस्तदीयमवदं तस्मै निजां योग्यतां
भावज्ञश्चपलं विधास्यति स मां वक्तारमित्यब्रवीत् ॥३॥

घस्रैः कैश्चन् चेरितोऽस्मि मिलितुं श्री एल्०ओ० जोशिनम्
तद्दत्ते च नियुक्तिपत्रपुटके वृत्तिप्रसादं वहन्।
विद्यापीठमुपागतः सहृदयैः स्वश्रोतृभिः संयुतः
आद्यां संस्कृतिमत्र पाठयितुमेवाबालवृद्धं जनम् ॥४॥

दातारस्मृति संस्कृतिप्रवचने नूत्नेपदेऽस्मिन् स्थितो
मासान् कांश्चिदयापयन् कवितया प्राकाश्यमासादयम्।
यो योऽभ्यागमदत्र तं च तमहं पद्यैरवद्येतरै-
रभ्यानन्दयमेष तोषमभितः संसाधयन् श्रीमताम् ॥५॥

विद्यापीठपदे प्रतिष्ठितिमगां साहित्यमध्यापयन्
यत्रच्छात्रतया कृतार्थमभवत् विद्वद्वरूथं महत्।
व्याख्याताऽभवमेषवर्षयुगलात्तो सांख्ययोगावपि
प्राच्यं व्यकरणंस्वपाठयमथो ताण्ड्यं महाब्राह्मणम् ॥६॥

येन श्रीमणिशङ्करादि विदुषां सत्संगतिः सार्थिता
वेदव्याकरणाद्यधीतिफलतां याभ्याञ्च यातोऽस्म्यहम्।
दिल्यां तिष्ठति मण्डने मतिमतां श्रीमण्डने चिन्तया,
विद्यापीठ-विकाससाधनविधावुत्पन्नया सन्ततम् ॥७॥

एकस्मादपरत्र पर्यटति वै कार्यालये मन्त्रिणाम्
प्राचार्यः परमेश्वरो मम गुरुः सम्भालयन्नास्त सः।
मार्त्तण्डे हनुमत्प्रसादविदुषि प्राप्ते परं विश्रमं
विद्यापीठमलोकयं पदमहं प्राप्य प्रभार्यात्मकम् ॥८॥

दिल्लीतो बहिरुद्गते तिरुपत्तौ जम्ब्वां प्रयागे तथा
विद्यापीठनिरीक्षणादिषु चिरं श्रीमण्डने नैकधा।
सामान्यं त्वनुशासनं मम करे प्रादात्तदत्रावहं
स्नेहो मय्यदसीय एव शमयन्नासीत्तदोपद्रवान् ॥९॥

यद्विश्वस्यशताब्दजातमखिलं गीर्वाणवाणीगतं
वृत्तं चेतुमकारयत्सुरचनां ग्रन्थस्य सम्मेलनम्।
यः काश्मीरसमन्वितोऽभवदयं दिव्यश्चभव्यः परो
राजस्थानसमन्वितश्च समभूत्तौ विस्मृतौ स्तां कथम् ॥१०॥

यच्चाभूदिह मासिकं सुरगिरो रत्नाकरेति श्रुतं
तस्याङ्काश्चतुरब्दसीमनि मया सम्पादितास्तेषु च।
यच्छ्रीनेहरुसंस्मृतैः परिभृतं यच्छास्त्रिसंस्मारकैः
यच्चान्यैरपि धन्यधन्य चरितैरासीत् स्वराष्ट्रोत्थितैः ॥११॥

तत्राहं नवगद्यपद्यरचना नानानवद्याः स्वयं
निर्मायात्यनुरूपमेव सकलं तद्वस्तु चालेखिषम्।
नूत्नं श्रीलजवाहरस्य चरितं प्रारब्धमासीच्च य-
त्सर्गस्तस्य तदाऽऽदिमः प्रकटितो रत्नाङ्कराङ्केऽभवत् ॥१२॥

भागद्वयं कृतमभूदाधिकारभूमेः
श्री स्नातकोत्तरविभाग प्रशासनस्य।
तां स्नातकोत्तरविभागगतां स्वसत्तां
भूयः स्मरामि किलषोडशवत्सरीयाम् ॥१३॥

धन्यः स नाम मणिनाथ बुधः किलासी
द्यः सौहृदेन समयं समयापयत्तम्।

सूर्यो दिवाप्रभवति प्रभवत्यथेन्दू
रात्रौ कथन्नु विवदेत तयोस्तु कोऽपि ॥१४॥

सामान्यशासनमहो सहते मदीय-
मित्यस्य सौहृदमहं मनसा स्मरामि ।
य द्वात्रमण्डनमतं न विमर्द्धितुं मे
शक्तिर्नचान्य विदुषः कथमप्यभूत्सा ॥१५॥

तत्राभवन्मणिशिवादि सुहृत्सखस्य
प्रीतिः प्रतीतिसहिता प्रियमण्डनस्य ।
पुष्पेन्द्र शर्मणि च शासति संशयेन
श्री स्वामिनाथ सुहृदप्यभवत्तुदे नः ॥१६॥

श्रीमण्डनो बहिरितोऽपि नियन्त्रयन्नः
पीठं स्म रक्षति निजैः सुमहानुभावैः ।
सेवानिवृत्तिमुपलभ्य पुनः प्रवृत्ति
त्रैवार्षिकीमुपगतः खलु मण्डनस्य ॥१७॥

प्रीतिर्निदानमिह मद्यशसो विताने
तस्याभवन्मम च शास्त्रसमाधिसिद्धिः ।
श्रीनेहरू द्युगमनस्य दिनान्मया यत्
प्रक्रान्तमत्र कविकर्म महिष्ठमासीत् ॥१८॥

तत्पूर्त्तिमाकलयतः किल मण्डनस्य
हर्षो महान् समभवन्मयि सौहृदेन ।
मुद्रापितं महदिदं मम भव्य काव्यं
ताः पञ्चविंशति सहस्रमिताश्चमुद्राः ॥१९॥

मह्यं प्रदाय जरतेऽतिशयोपकारं
श्रीमण्डनो यदकरोत्तदिहास्ति लेख्यम् ।
लेख्या च राष्ट्रपतिमानपुरस्कृतिः सा
या वर्धते शशिकलेव तदीय यत्नैः ॥२०॥

लेख्यं पुनस्तदपि यद्दशभिः सहस्रैः
साहित्यिकी समुदमार्च्चदकादमी माम् ।
अद्यापि मां नुदति लेखितुमेव नव्यं
भव्यञ्च किञ्चन सुहृन्मम मण्डनश्रीः ॥२१॥

# सोऽयं मण्डनमिश्रनामविबुधो विद्वत्कुले राजते

—डॉ० ओमप्रकाशपाण्डेय:

वीराणां जननी तथा प्रसविनी शौर्यस्य या कथ्यते,
यस्या जौहरमातनोति निखिले भूमण्डले विस्मयम्।
राजस्थानभुवा तया हि क्रियते शास्त्रार्चना साम्प्रतं,
पुत्रो मण्डनतामुपैति सकलामस्याः भुवो मण्डनः ॥१॥

यच्छिल्प-स्थपतित्वमद्य तनुते रम्यं बृहद् भास्वरम्,
भारत्या भवनं, विभाति भुवने यस्यापि सङ्कल्पना।
भूयस्यः कृतयः किरन्ति यशसो यस्यापि सौगन्धिकम्,
सोऽयं मण्डनमिश्रनामविबुधो विद्वत्कुले राजते ॥२॥

मीमांसा विरसापि यैस्तु तपसा सारस्यमुत्प्रापिता,
सर्वेष्वास्तिकहृत्सु जैमिनिनयो देदीप्यते साम्प्रतम्।
यस्यैकस्य गुरोः प्रयत्ननिकरैर्पट्टाभिरामस्य त-
च्छिष्यैर्मण्डनमिश्रनामविबुधैर्विद्या सुविद्या कृता ॥३॥

विद्यापीठततिं ततान विततामेतामनेकेषु यः,
सुख्यातेषु पुरेषु संस्कृतगिरः संस्थापितः शेवधिः।
भ्रामं भ्राममथापि वक्ति विभवं गीर्वाणवाण्याश्च यो
नित्यं दिक्षु स दीव्यते सुकृतिभिर्मिश्रो महीमण्डनः ॥४॥

मन्ये सम्प्रति भाति राजनगरी दिल्ली समालङ्कृता,
यत्रास्ते सुरभारतीमतिपरो विश्वस्य विद्यालयः।
यस्यैकस्य बुधस्य यत्ननिचयैरेषा प्रतिष्ठां गता,
गीर्वाणी, स हि वन्दनीयचरितो मिश्रो महीमण्डनः ॥५॥

वैदुष्येण परेण यस्य विदुषां सम्मोदते मानसं,
सौजन्येन तथैव तस्य सुजनो विश्वासमापद्यते।
उत्साहः सुकृतौ क्रतावभिरतिश्चित्ते प्रसादः सदा,
यस्मिन्नस्ति स एव पण्डितकुले निश्चप्रचं मण्डनः ॥६॥

यन्नाम्ना स्मृतिमापतत्यविकलो माहिष्मती-मण्डनो,
यन्नाम्ना स्मरणं करोति सुजनो भट्टस्य शिष्यं परम्।
यन्नाम्ना विलसत्यहो मधुमतो सा भारती भारते,
सर्वेषामपि संविभाति विभवं मिश्रेऽधुना मण्डने ॥७॥

# गौरवास्पदं सस्मरणम्

— डा० दीनानाथयक्षः

समयोऽयं तत्र भवतां श्रीलालबहादुरशास्त्रिणां भारते प्रधानामात्यत्वस्य यत्मत्पार्श्वेऽदृष्टपूर्वः प्रांशु'गान्धीशिरोवेष्टनधौताधरवासोवसानः सौम्याकृतिः कश्चन भद्रपुरुषः काश्मोरिकप्रत्नविद्याप्रकाशविभागे (J. K. Research Department) दृष्टिपथमवतीर्णोऽभूत्। महाभागोऽयं निरर्गलं निर्गलन्त्या धारावाहिन्या गीर्वाणगिरा मां सङ्केत्य प्राह यत् काश्मीरराज्ये कीदृशी दशा इदानीं देववाण्याः ? अथ मया नाभ्यस्तस्खलद् देवगिरा अस्फुटप्रायमेव प्रत्युक्तः यदीदृशी सा श्रीमतां नयनातिथित्वमेति इति। मदिङ्गितमात्रेणैवाऽसौ विदितवेदितव्यः अविकलाञ्च परिस्थितिं संवेद्योदतरत् सर्वं समये श्रेयः सम्पत्स्यते, युष्मदभीप्सित-मिष्टं च सेत्स्यति। इदानीमत्रागमनस्य ममेदं मुख्यमुद्देश्यमस्ति यद् भारतसर्व-कारे विंशतिशतकीयानां समेषां संस्कृतविदुषां पण्डितानाञ्च गीर्वाणगिरि स्वीयेन योगदानेन समुल्लसतां जीवतां स्वर्यातानां वा संस्कृते जीवनचरित्रनिबन्धनम्। न केवलं तेषां जीवनाख्यानवर्णनं प्रत्युत संस्कृतोद्दिधीर्षूणां समितीनां संस्थानाञ्च साकल्येन याथातथ्येन वर्णनं चापेक्षितं यत्तावन्नैकविधभागेषु भारतवर्षस्य सर्व-कारेण शताब्दीरूपेण ग्रन्थं सम्मुद्रच प्रकाश्य च जनतायाः समक्षमुपहरिष्यते। अथ श्रीनगरे लेखकानां-सङ्घं निर्धार्य नियोज्य च महानुभावोऽसौ पुनः देहलीं प्रत्या-वर्तत। अयं संस्मर्ताऽपि लेखस्यैकस्य लेखकत्वेन निर्धारितो निर्वाचितश्चाऽभूत्। ततः प्रतिसप्ताहं कर्मठो महानुभावोऽयं पत्रद्वारा लेखस्य प्रगतिं जिज्ञासते स्म। अयमेव प्राथमिको अभिनवः संस्तवः श्रीमण्डनमिश्रमहोदयानाम्।

एकदा संस्कृतमातृकाणां परिस्थितिं दशामननुकूलाञ्च मत्तो विभाव्य संस्कृतमातृकासंरक्षणाय स्वतन्त्रमेकं भारतसर्वकारायत्तमपरं शोधकार्यालयं समुद्घाटयितुकामो नितरां प्रायतत। किञ्चिन्मात्रमंशतश्च प्रयासं स्वं फलेग्रहितां निनाय। काश्मीरविश्वविद्यालयीयशैवागमसम्मेलने सोद्देश्यमेतद्विषये सुस्पष्ट-मज्जुघोष, फलतश्च श्रीनगरस्थराजवागाख्ये जम्मूदेशीयविद्यापीठायत्तमेकमुप-केन्द्रं स्वोद्देश्यपूर्तये समुद्घाटयितुं साफल्यमधिजगाम।

काश्मीरेषु तस्योपकेन्द्रस्योपक्रमसमये श्रीमिश्रमहाभागाः सुस्पष्टमुद्-घोषितवन्तः यदुपयुक्तः कालोऽयं संस्कृतमातृकान्वेषणाय चयनाय च।

'कालो हि सकृदभ्येति यं नरं कालकाङ्क्षिणम्।
अलभ्यः स पुनस्तेन काले कर्माचिकीर्षता ॥"

इत्याभाष्य मातृकाणां सङ्ग्रहायानुसन्धानाय चेत्थं नितान्तं स प्रोत्साहितवान् ।

षडशीत्युत्तरैकोनविंशतितमस्य ख्रिष्टहायनस्यागस्तमासे शैवसम्मेलनावसरे सिंहनादेन सुरभारत्यां समुद्घोषितवान् आमुखभाषणे यत्सम्प्रति संक्षीयमाण-शैवमातृकाणां (हस्तलेखानां) सम्पत्तिरस्माभिः संरक्षणीया परिमार्ज्य च मुद्रापणीया प्रकाशनीयेति ।

एतेनोक्तं यत्काश्मीरप्रदेशोऽयं भारतीयसभ्यतायाः संस्कृतेः विशिष्ट-शैवाद्वैतदर्शनस्य च जनक इति । किञ्चेयं कश्यपकाश्यपी नैकविधसुप्रसिद्धशैवा-चार्याणां प्रसवभूमिरिति । अतो हि 'लुप्तप्रायाणां प्रकाशितशैवशास्त्राभ्यन्तरे समुदाहृतानां ग्रन्थान्तराणां सायासमन्वेषणाय दर्शनस्यास्य पारिपूर्ण्येन सुप्रचा-राय च अभिनवमेकं संस्थानमचिरेण मया यावच्छक्यं समुद्घाटयितुं प्रयत्यते' ।

अनेन महापुरुषेण श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठ-श्रीलालबहादुरशास्त्री विद्यापीठ-श्रीगङ्गानाथझाविद्यापीठ-तिरुपतिसंस्कृतविद्यापीठानां प्राचार्यपदम-लङ्कुर्वता सुयोग्याध्यापकतायाः प्रशासनकुशलतायाश्च समीचीनः परिचयो दत्तोऽस्ति । अस्य महापुरुषस्य सततप्रयासानां फलस्वरूपोऽभिनवोऽचिरोद्-घाटितोऽखिलविद्यापीठानां सञ्चालको विख्यातो राष्ट्रियसंस्कृतसंस्थान-कार्यालयो नवदेहल्यां राराजते । यस्यनिदेशकत्वस्य श्रेयो भागित्वमेभिः प्रापि ।

## संस्कृतज्ञानां समुन्नायकाः

—पं० श्रीसुधाकर दीक्षितः

मान्याः श्रीमन्तो मण्डनमिश्रमहोदयाः सादरमभिनन्द्यन्त इत्याकर्ण्य प्रसीदतितमाम् ममान्तरङ्गम्। दृढमहं विश्वसिमि, प्रायः सर्वेऽपि संस्कृतिसमुपासका विशेषतः संस्कृतप्रणयिनः श्रीमिश्रमहोदयान् प्रति कृतवेदितावेदनस्यामुमवसरमासाद्य भृशं प्रमोदन्त एव। प्रमोदश्चायं स्वाभाविकः। श्रीमिश्रमहोदयाः संस्कृतजगत्समुन्नायकानां धुरि प्रतिष्ठिता इति को न वेत्ति। आत्मनोऽवबोधमपेक्ष्य निःसंशयमहं वच्मि—साम्प्रतं श्रीमिश्रमहोदया एवैतादृशा ये संस्कृतजीविनां मादृशाम् समुन्नयनाय संस्कृतसंस्थाः प्रतिष्ठाप्य ताश्च समयानुकूलं शासकीयाः सम्पाद्य प्रायः शताब्द्या अर्धांशं यावत् प्रशासनमाध्यमेनामूलचूडं दार्ढ्यञ्च तासां विधायास्माकं दृष्टचा कृतकार्या अपि नाधुनापि विश्रान्तिं कामयन्ते संस्कृतज्ञानां समुन्नयनसंविधानात्।

इदानीं संस्कृतजगति ये केचनान्येऽवतंसायमाना विशिष्टमहानुभावास्ते सर्वेऽपि परप्रकल्पितसंस्कृतसंस्थास्वेव प्रशासनकर्म कतिचिद् वर्षाणि यावदेवानुष्ठाय प्रायशोऽसमर्था इव दुष्कीर्तिभाज इव वा ततो विरता अकृतकार्या इव संस्कृतप्रणयिभिः स्मर्यन्ते। स्वयमेव प्रकल्प्य संस्कृतप्रतिष्ठानानि तेषु च सर्वतो वरिष्ठं प्रशासकपदमधिष्ठाय बहूनि वर्षाणि यावत् तत्र बिभ्राजमानः अत एव पुरुषधौरेयः कश्चन महानुभावस्तानि प्रतिष्ठानानि समुन्नतिपराकाष्ठां प्रापय्य यदि तत्प्रतिष्ठानसदस्यैरेवाधिकाधिकैः हृदयेन सम्मान्यते, समादरातिशयेनाभिनन्द्यते, तत्प्रतिष्ठानजीवातुरूपेणाहर्निशं चर्च्यते चेत् तदिदं सर्वं प्रशस्ततमस्यानुकरणीयस्य महीयसो महोदयस्य प्रशासनकौशलं व्यवहारपाटवादिकं वरणीयं विविधं वैभवं विभावयत्येव।

एवंविधानां संस्कृतजगतो गौरवायमाणानां श्रीमतां मिश्रमहोदयानामधमर्णा वयं सर्वे कामयामहेऽनुकम्पया परेशितुः स्वास्थ्येन, प्रसादेन सहानन्तायुष्यसम्पन्नाः श्रीमिश्रमहोदयास्तथावश्यं सङ्कल्पयन्तु यथा वेदादिशास्त्राणामध्ययनाध्यापनयोस्तदधिकारिणामनुक्षणमभिरुचिः समेधेतेति।

## डा० मण्डनाभिधो बुधः संस्कृताय समर्पितः

—डा० गुञ्जेश्वरचौधरो

कीर्तिस्तोमसमस्तसोमविकसज्ज्योत्स्ना जगन्मण्डनम्,
दाक्षिण्यादिगुणैरुदारचरितैर्वन्द्यं जगन्मण्डनम् ।
श्रौतस्मार्तविधानपालनपरं सच्छास्त्रपारङ्गतम्,
तं वन्दे भुवि भारतीविलसितं साक्षाज्जगन्मण्डनम् ।।१।।

हर्षोल्लासलसन्महीसुरशतप्रोल्लास्यमानश्रुति-
ध्वान्तोध्वंसकदिङ्मुखो विजयते श्रीमण्डनो मण्डनः ।
दिल्यामेत्य विराजते सकलको राकेशतुल्यो बुधः,
दत्वा शीतलतां विदग्धहृदये साक्षान् महीमण्डनः ।।२।।

वन्दे कल्पतरुं मुदा रसमयं ज्ञानालवालस्थितं,
भक्त्या कृष्णविहारिणं सुलतया संसेवितं सर्वदा ।
ज्ञानैस्तत्त्वविदां विशुद्धमनसां भृङ्गैः समालिङ्गितम्,
भक्तिज्ञानगुणैकतानहृदयं साक्षान्महीमण्डनम् ।।३।।

उवास यस्याब्जमुखे सरस्वती,
विशुद्धविज्ञाननिधिः सुकोमला ।
अवाप तत्पादरतेः समादरात्,
समुन्नतं विज्ञनुतं कुलाधिपम्[1] ।।४।।

मान्यो वदान्यो विदुषां हितैषी,
लेभे यदा लालबहादुराधिपम् ।
गीर्वाणवाण्याः समभूत् समृद्धिः,
सन्तोषभाजां विदुषां समाजे ।।५।।

श्रीकृष्णलीलाङ्कितपूतभूमौ
भाभारते तुष्टविदग्धमण्डलः ।
श्रीमण्डनः शं कुरुते सुभारते
सुरभारतीनां समुपासकानाम् ।।६।।

।। इति शिवम् ।।

---

१. कुलपतिमिति

# प्रेरणा पुरुष

—डॉ० रामशकल पाण्डेय

लगभग २९ वर्ष पहले सन् १९६५ की बात है। अपने एक शिष्य डा० जगदीश चन्द्र गौड़ के माध्यम से मैंने अपनी स्वरचित पुस्तक 'संस्कृत-शिक्षण' की एक प्रति डा० मण्डन मिश्र जी के पास भेजी थी जिसके उत्तर में मिश्र जी ने तत्काल मेरा उत्साहवर्धन करते हुये पत्र लिखा और साथ में मिलने की इच्छा भी प्रकट की। उसके कुछ समय पश्चात् जब मैं दिल्ली गया तो डा० मिश्र से मिलने चला गया।

डा० मिश्र जी से इस मुलाकात की छाप आज भी मेरे मन पर अमिट पड़ी हुई है। गौरवर्ण, उन्नत ललाट, भव्य मुखाकृति, देववाणी के तेज से दीप्त मुख-मण्डल, धोती-कुर्ता के भारतीय वेश में मिश्र जी को देखकर मैं उनकी बाह्य आकृति से बहुत प्रभावित हुआ। उनसे कुछ वार्तालाप प्रारंभ हुआ तो यह प्रभाव गहराता गया। उन्होंनें संक्षेप में मुझे अपनी योजना बताई और वे अखिल भारतीय संस्कृत-महाविद्यालय की शाखायें प्रशाखायें खोलनें की बात कर रहे थे। मुझे उस समय लगा कि यह व्यक्ति स्वप्न देखता है और स्वप्नों की दुनिया में रहता है किन्तु कालांतर में राष्ट्रीय संस्कृत संस्थान की स्थापना के पश्चात् मुझे लगा कि उनका स्वप्न साकार होनें जा रहा है।

डॉ० मिश्र के इस पुण्य का ही यह फल है कि उनके सभी प्रक्रम संसिद्ध होते हैं तथा सभी आयोजन भव्य, सफल एवं परिणाम-रमणीय बन जाते हैं। कभी कभी तो प्रतिकूल स्थितियों में भी आश्चर्यजनक ढंग से कार्यक्रम सफल होते देखे गये हैं। यहाँ मैं अगस्त १९९६ में सम्पन्न हुये संपूर्णानन्द संस्कृत विश्वविद्यालय के 'विशेष दीक्षान्त महोत्सव' का जिक्र करना चाहूंगा। इस 'विशेष दीक्षान्त महोत्सव' में महामहिम राष्ट्रपति डॉ० शंकर दयाल शर्मा जी पधारे थे। अगस्त मास वर्षा ऋतु का चरमोत्कर्ष होता है। दीक्षान्त महोत्सव के आयोजन तिथि से एक सप्ताह पूर्व से ही लगातार वर्षा चल रही थी, जिसके कारण जिला प्रशासन खुले मैदान में पण्डाल बना कर दीक्षान्त महोत्सव आयोजित करने का विरोध कर रहा था। डॉ० साहब ने बड़े आत्मविश्वास से जिला प्रशासन एवं उत्तर प्रदेश शासन के उच्चाधिकारियों को यह विश्वास दिलाया कि दीक्षान्त महोत्सव के दिन वर्षा जन्य विघ्न नहीं आयेगा। किन्तु उच्चाधिकारी अपनी आशंका पर दृढ़ रहे तथा इस शर्त के साथ पण्डाल लगाने की अनुमति दी कि उसके बगल के ही विश्वविद्यालय स्थित मुख्य भवन में भी समानान्तर सारी व्यवस्था रखी जायेगी ताकि वर्षा की स्थिति में पक्के भवन में दीक्षान्त महोत्सव सम्पन्न हो सके। तदनुसार दोनों जगह व्यवस्था रखते हुये तैयारियाँ शुरू हुईं। वर्षा का क्रम भी अनवरत चलता रहा। दीक्षान्त महोत्सव के दिन भी जब प्रातःकाल से ही अनवरत वर्षा का क्रम जारी रहा तब विश्वविद्यालय परिवार निराश हो गया और यह सर्वसम्मत धारणा बन गयी कि लाखों रुपयों की लागत से बने भव्य पण्डाल में दीक्षान्त महोत्सव नहीं हो सकेगा तथा विवश होकर अपेक्षाकृत अत्यन्त छोटे भवन में ही दीक्षान्त महोत्सव की औपचारिकता पूर्ण करनी पड़ेगी। इस परिस्थिति से सभी दुःखी एवं व्यग्र थे। जब कुलपति डॉ० मण्डनमिश्र जी के समक्ष यह बात पहुँची तो उन्होंने बड़े दृढ़ आत्मबल से कहा कि आप लोग चिन्ता न करें, ईश्वर ने चाहा तो पण्डाल में ही भव्यता के साथ दीक्षान्त महोत्सव होगा और वर्षा रुक जायेगी। विश्वविद्यालय परिवार को यह असम्भव सा प्रतीत हो रहा था। किन्तु उस समय लोगों के आश्चर्य का ठिकाना न रहा जब मध्याह्न ३ बजे वर्षा रुक गयी एवं सायं ६ बजे तक खचाखच भरे हुये

विशाल पण्डाल में महामहिम राष्ट्रपति जी की उपस्थिति में अभूतपूर्व भव्यता के साथ दीक्षान्त महोत्सव निर्विघ्न सम्पन्न हो गया। महामहिम राष्ट्रपति जी के प्रस्थान के आधे घण्टे बाद से पुनः वर्षा क्रम चालू हो गया और उस दिन रात भर वर्षा होती रही। मैं इस आश्चर्यजनक सुखद घटना को ईश्वर का अनुग्रह तो मानता ही हूँ, साथ ही कुलपति डॉ० मिश्र जी की ईश्वर के प्रति अविचल भक्ति, निष्ठा एवं श्रद्धा का फल भी मानता हूँ। यही कारण है कि वे जिस-जिस समय जिन-जिन संस्थाओं में रहे, उनका कार्यकाल यशस्वी रहा और संस्थाओं की सर्वाङ्गीण अभ्युन्नति हुई।

डॉ० मण्डन मिश्र जी एक कुशल प्रशासक, ओजस्वी वक्ता, विधुर काल में भी नगपति के समान अविचल, क्रियाविधिज्ञ, संस्कृत के प्रति समर्पित, ईश्वर एवं गुरुभक्त, प्रसन्नमना संस्कृत जगत् के तेजस्वी शलाका पुरुष हैं। संस्कृत जगत् उनका सदैव अधमर्ण रहेगा और वे संस्कृतानुरागियों के लिये कनिष्ठिका-धिष्ठित रहेंगे।

डॉ० मण्डनमिश्राणां विद्यागुरवो निर्मातारश्च पद्मभूषण-महामहोपाध्यायाः
श्रीपट्टाभिरामशास्त्रिणः।

डॉ० मण्डनमिश्राणां पितृपादाः पण्डितकन्हैयालालमिश्रमहोदयाः। (भगवत्याः जगदम्बायाः उपासकाः ज्योतिषकर्मकाण्डस्य विशेषज्ञाः)

डॉ० मण्डनमिश्राणां जननी धर्मस्य वात्सल्यस्य च प्रतिमूर्तिः स्वर्गीया श्रीमती मन्नीदेवी मिश्रा ।

श्रीदीनदयालुशताब्दीसमारोहस्योद्घाटनावसरे प्रधानमन्त्रिपंडितजवाहरलालनेहरूमहोदयानां स्वागतं कुर्वाणाः डॉ० मण्डनमिश्राः।

भारतस्य प्रधानमन्त्रिणां श्रीजवाहरलालनेहरूमहोदयानाम् अभिनन्दनं विदधानाः डॉ० मण्डनमिश्राः।

प्रधानमन्त्रिणां श्रीमोरारजीदेसाईमहोदयानां स्वागतं कुर्वाणाः डॉ० मण्डनमिश्राः।

बुद्धिजीविसम्मेलने प्रधानमन्त्रिश्रीमती इन्दिरागांधीमहोदयाभिः सह पण्डितपट्टाभिरामशास्त्रिणः डॉ० मण्डनमिश्राश्च।

पण्डितपट्टाभिरामशास्त्री अभिनन्दनग्रन्थस्य लोकार्पणावसरे
श्रीमतीइन्दिरागांधीमहोदयाभ्योऽभिनन्दनग्रन्थं समर्पयन्तः डॉ० मण्डनमिश्राः।

प्रधानमन्त्रिश्रीमतीइन्दिरागांधीमहोदयानां सान्निध्ये विद्वत्सु मध्ये विराजन्ते डॉ० मण्डनमिश्राः।

विद्यापीठस्य प्रांङ्गणे भारतस्योपराष्ट्रपतीनां श्री बी० डी० जत्तीमहोदयानाम् स्वागतं कुर्वाणाः डॉ० मण्डनमिश्राः।

भारतस्य राष्ट्रपतिभ्यः
श्रीज्ञानीजैलसिंहमहोदयेभ्यः
संस्कृतसेवासम्मानप्रमाणपत्रं
गृह्णन्तः डॉ० मण्डनमिश्राः।

विद्यापीठस्य भवने रेलमन्त्रिपण्डितकमलापतित्रिपाठिमहोदयस्य स्वागतं कुर्वाणाः
डॉ० मण्डनमिश्राः।

विद्यापीठीयप्रकाशनानां प्रदर्शनावसरे मानवसंसाधनविकासमन्त्रिभिः श्रीनरसिंहरावमहोदयैः सह डॉ० मण्डनमिश्राः।

प्रधानमन्त्रिभ्यः श्रीराजीवगांधीमहोदयेभ्यः उत्तरप्रदेशसंस्कृत-अकादम्याः ''विश्व संस्कृत भारती पुरस्कारम्'' गृह्णन्तः डॉ० मण्डनमिश्राः।

उपराष्ट्रपतिभ्यः श्री आर० वेंकटरामन्महोदयेभ्यः नेहरूचरितमहाकाव्यं समर्पयन्तः डॉ० मण्डनमिश्राः।

राजस्थानसंस्कृतअकादमी-समायोजिते डॉ० राधाकृष्णन्शताब्दीसमारोहे ''स्वरमंगला'' शोधपत्रिकायाः लोकार्पणावसरे श्री शंकरदयालशर्मम[illegible]यैः सह डॉ०मण्डनमिश्राः। पार्श्वस्थाः सन्ति डॉ० गिरिजाव्यासमहोदयाः।

राष्ट्रपतिभ्यः श्रीशंकरदयालशर्ममहोदयेभ्यः नवदिल्लीस्थराष्ट्रियसंस्कृतविद्यापीठस्य "वाचस्पतिः" इतिसम्मानितोपाधिम् समर्पयन्तो डॉ० मण्डनमिश्राः।

तिरूपतिविद्यापीठस्य मानितविश्वविद्यालयस्य घोषणावसरे राष्ट्रपति आर० वेंकटरमन्महोदयानां स्वागतं विदधानाः संस्थान निदेशकाः डॉ० मण्डनमिश्राः।

तिरुपतिस्थराष्ट्रियसंस्कृतविद्यापीठस्य दीक्षान्तसमारोहे महामहिमराष्ट्रपति डॉ० शंकरदयालशर्ममहोदयेभ्यो सम्मानितोपाधिं समर्पयद्भिः कुलाधिपतिभिः श्रीरमारंजनमुखर्जीमहोदयैः सह डॉ० मण्डनमिश्राः।

कांचीविद्यापीठाधीश्वेरभ्यः श्रीजयेन्द्रसरस्वतीमहास्वामिभ्यः सम्मानपत्रं समर्पयन्तः डॉ० मण्डनमिश्राः।

सौप्रस्थनिकाभिनन्दनसमारोहे शिक्षामन्त्रिश्रीअर्जुनसिंहमहोदयेभ्यः अभिनन्दनपत्रं गृह्णन्तो डॉ० मण्डनमिश्राः।

उपराष्ट्रपतिभ्यः श्री के० आर० नारायणन्महोदयेभ्यः "अनन्तगोपालशेवडे-पुरस्कारं" गृह्णन्तः डॉ० मण्डनमिश्राः।

आचार्यविद्यानन्दमुनीनां सान्निध्ये वित्तमन्त्रिश्रीमनमोहनसिंहमहोदयेभ्यः ''आचार्य कुन्दकुन्दपुरस्कारं गृह्णन्तः डॉ० मण्डनमिश्राः।

शृंगेरीशंकराचार्यश्रीश्रीभारतीतीर्थमहास्वामिनां दिल्लीयात्रायां रामलीलामैदाने स्वागतं कुर्वाणाः डॉ० मण्डनमिश्राः मञ्चस्थाः सन्ति श्रीअटलबिहारीवाजपेयी श्री टी० एन० चतुर्वेदी-श्री टी० एन० शेषन्महोदयाः।

शंकरविद्याकेन्द्रे प्रधानमन्त्रि श्री एच० डी० देवगौड़ामहोदयानां स्वागतं कुर्वाणाः शंकरविद्याकेन्द्रोपाध्यक्षाः डॉ० मण्डनमिश्राः।

# मीमांसकसम्मतं देवतातत्त्वम्

प्रो० वाचस्पति उपाध्यायः

नवमाध्याये प्रथमपादे तृतीयाधिकरणे विकृतौ सौर्येष्टौ मन्त्रयोः ऊहासिद्धये देवता मन्त्रं न प्रयोजयति किंतु अपूर्वमेव प्रयोजयति इति निर्णीतम्। तथाहि—प्रकृतौ दर्शपूर्णमासयोः द्वौ मन्त्रौ श्रूयेते। तयोः एकः स्वर्गप्रकाशनसमर्थः "अगन्म सुवः" इति। अपरः अग्निदेवताप्रकाशनपरः "अग्नेरहमुज्जितिमनूज्जेषम्" इति। तयोः क्रमेण स्वर्गाग्नी प्रयोजकौ इत्यङ्गीकारे सूर्यदेवताके ब्रह्मवर्चसफलके सौर्ययागे स्वर्गफल-अग्निदेवयोः मन्त्रप्रयोजकयोः अभावात् मन्त्रयोः प्राप्तिर्वा तत्र ऊहो वा न स्यात्। अतः अपूर्वमेव मन्त्रप्रयोजकम् अङ्गीकर्त्तव्यम्। विधिना यागः फलवत्वेन चोद्यते। यागस्य आशुविनाशित्वात् तत्स्थाने अपूर्वमेव वक्तव्यम्। तथा च चोदितस्य अपूर्वस्य फलवत्त्वेन अनुष्ठेयतया इतिकर्तव्यताकाङ्क्षा भवति। ततः विकृतौ सौर्येष्टौ अपूर्वप्रयुक्तत्वेन प्राप्तयोः मन्त्रयोः क्रमेण "अगन्मब्रह्मवर्चसम्" इति "सूर्यस्याहमुज्जितिमनूज्जेषम्" इति च ऊहः सम्भवति इति। नवमाध्यायगतप्रथमपादीयचतुर्थाधिकरणे पूर्वाधिकरणोक्तसिद्धान्तः आक्षिप्य समाधीयते। तथाहि—'यज देवपूजायाम्' इति धातुपाठाद्यागो नाम देवतापूजा। वस्तुतः यागः देवतायाः भोजनम्। देवता भोक्ष्यते इति भोज्यं द्रव्यं देवतायै प्रदीयते। देवतासम्प्रदानको यागः सम्प्रदानदेवताप्रधानः। "कर्तुरीप्सिततमं कर्म" इति पाणिनिसूत्रानुसारेण कर्तुः क्रियया आतुम् इष्टतमं कारकं कर्म भवति। कर्मकारकापेक्षयापि संप्रदानकारकं अभिप्रेततरम्। यतः 'ब्राह्मणाय गां ददाति' इत्यत्र दानक्रियया गोरूपं कर्मकारकं व्याप्येत, गवा कर्मकारकेण ब्राह्मणः संप्रदानं व्याप्यते। संप्रदानभूतां पूजनीयां देवतां प्रति देवपूजात्मको यागः गुणभूतः। तस्माद् यागे देवता प्रधानभूता देवतां प्रति गुणभूते द्रव्यकर्मणी। यथा लोके अतिथिसत्कारक्रिया भोजनीयातिथिप्रधाना। अतिथये भोज्यं दीयते, स भोज्यं स्वीकरोति, भुङ्क्ते तृप्यति, प्रसीदति तथा देवता दीयमानं हविः स्वीकृत्य भुक्त्वा, तृप्त्वा प्रसन्नो भवति। अतः मन्त्रकर्मादिकं सर्वं धर्मजातं प्रधानदेवताप्रयुक्तमेव इति धर्मप्रयोजिका देवतैव। किं च देवतायाः भोजनाद्यनुरोधेन लोकवद् विग्रहवत्त्वमङ्गीक्रियते। मन्त्रार्थवादाः देवतायाः विग्रह - हवि - स्वीकार - तद्भक्षण - तृप्तिप्रसाद - पञ्चकं प्रतिपादयन्ति। मन्त्रार्थवादमूलिकाः स्मृतयश्च देवतां विग्रहवतीं बोधयन्ति। लोके चेन्द्रं वज्रहस्तं, वरुणं पाशहस्तं, यमं दण्डहस्तं व्यवहरन्ति लिखन्ति च। यथा पुरुषविग्रहस्य सव्यदक्षिणौ हस्तौ भवतस्तथा देवताविग्रहवत्वसाधकाः दक्षिणहस्ताद्यवयवाः "जगृभ्मा ते दक्षिणमिन्द्र हस्तम्"

इत्यादिमन्त्रेषु दृश्यन्ते। यदि देवता भुञ्जीत तदा देवतायै दत्तं हविर्द्रव्यं क्षीयेत, न च क्षीयते, अतः न विग्रहवती देवता इति तु न शङ्कनीयम्। मधुमक्षिका यथा पुष्परसं भुङ्क्ते न पुष्पं खादति तथा देवता अन्नरसं भुङ्क्ते न अन्नं खादति। यतः देवतायै प्रत्तं हविः नीरसं भवति। तस्माद् विग्रहवती देवता भुङ्क्ते।

किं च देवता अर्थस्य पतिः=ईशाना। उपचर्यमाणा देवता प्रसीदति। स्मृतयः 'अर्थानाभीष्टे देवता' इति वदन्ति 'इदं देवक्षेत्रम्' 'अयं देवग्रामः' इति लौकिकव्यवहारोऽपि स्मृतिं उपोद्बलयति। देवतायाः विग्रहवत्त्वसाधकाः ईशितृत्वादयः "ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः" इत्यादिमन्त्रेषु दृश्यन्ते।

किं च यो देवतां इज्यया परिचरति तं सा फलेन योजयति। स्मृतयः 'देवता यष्टुः फलं ददाति' इति उद्घोषयन्ति। 'पशुपतिः अनेन उपचरितः। पुत्रः अनेन लब्धः' इत्यादिलोकव्यवहाराश्च स्मृतिं द्रढयन्ति। "तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति" इत्यादयः मन्त्राः पूर्वोक्तार्थसाधकाः दृश्यन्ते।

हविर्दानेन स्तुतिवचनैश्च देवता आराध्यते। सा प्रीता सती फलं प्रयच्छति। येन कर्मणा अग्निः आराधितः, यस्य फलस्य ईष्टे, तत्फलं कर्त्रे प्रयच्छति। तत्फलं सूर्यः न प्रदातुमर्हति। एतद् वचनादवगम्यते। अग्नौ वचनमस्ति, न सूर्ये—इति पूर्वः पक्षः।

**सिद्धान्तः**

यज्ञकर्मैव (=यागात् जातं अपूर्वमेव) प्रधानम्। देवता गुणभूता एव। फलदातारं प्रत्यक्षप्रमाणादिभिः न वयं अवगन्तुं शक्नुमः। शब्दप्रमाणादेव फलदातारं जानीमः शब्दश्च यागात् फलं वदति, न देवतायाः। "दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत" "ज्योतिष्टोमेन स्वर्गकामो यजेत" इत्यादयः दर्शपूर्णमासादेः एव फलकरणत्वं बोधयन्तः देवतायाः फलदातृत्वं निवारयन्ति। 'यद्यपि द्रव्य-देवताक्रियं यजत्यर्थः तथापि देवतायाः यागं प्रति गुणत्वेऽपि श्रुतिः उपपद्यते। साधनीयः यागः, द्रव्यदेवतं तु सिद्धम्। 'भूतं भव्यायोपदिश्यते' इतिन्यायेन साध्यार्थत्वात् सिद्धस्य देवता न प्रयोजिका, अपूर्वमेव सर्वधर्मप्रयोजकम्।

यदुक्तं ईप्सिततमात् कर्मकारकात् संप्रदानं अभिप्रेततरं इति देवतायाः प्राधान्यं इति तन्न शोभनम्। न वयं देवतायाः अभिप्रेतत्वं अपलपामः। किंतु श्रुत्या यागस्यैव करणत्वबोधनात् फलसाधकस्य यागस्यैव प्राधान्यं ब्रूमः। फलं च पुरुषार्थः। पुरुषार्थमुद्दिश्यैव अस्माकं प्रवृत्तिः। फलसाधकापूर्वप्रयुक्ताः प्रवर्तामिहे न देवताप्रयुक्ताः। फलवतो यागस्य (=अपूर्वस्य) साधनभावं भजमानाया देवतायाः अभिप्रेतत्वमपि युज्यते।

यदुक्तं यजतिः देवपूजा पूज्यमानप्रधाना अतिथिसत्कारवदिति तन्न-युक्तम्। लोके अतिथितृप्तेः मुख्योद्देश्यत्वेन अतिथिसत्कारः आराध्यातिथिप्रधानो युक्तः। इह तु यागस्य देवतार्थत्वेऽपि देवतातृप्तिमुद्दिश्य यागो नानुष्ठीयते, अपि तु फलमुद्दिश्यैव इति विषमः अतिथिदृष्टान्तः।

यदुक्तं स्मृति - व्यवहार - विग्रहवत्त्वानुकूलार्थप्रतिपादकमन्त्रभागैश्च देवता विग्रहादिपञ्चकयुक्ता इति तन्न साधीयः। मन्त्रेभ्यः अर्थवादेभ्यश्च आपाततः यद्विज्ञानमुत्पद्यते तत्प्रमाणीकृत्य विग्रहादिबोधकस्मृतयः प्रवृत्ताः। मन्त्रार्थवादाश्च न प्रतीयमानार्थपराः, अपि तु विधेयस्तुतिपराः। अतः मन्त्रार्थवाद-प्रामाण्याद्देवतायाः न विग्रहादिपञ्चकं युज्यते। अर्थानां सद्भावमन्तरेण स्तुत्य-संभवाद् विग्रहादिकं देवतायाः भवत्येव इति न शङ्कनीयम्। अविद्यमानैरपि अर्थैः स्तुतिसंभवात्।

यदुक्तं—फलादेः अर्थस्य ईशाना देवता। देवक्षेत्रं देवग्रामः इति लोक-व्यवहारोऽपि देवस्य क्षेत्रादिकं प्रति ईशितृत्वं बोधयत् स्मृतिं द्रढयति। सर्वेशाना देवता फलदात्री। सैव धर्मप्रयोजिकेति तन्न शोभनम्। मन्त्रार्थवादानां आपाततः प्रतीयमानानर्थान् प्रमाणीकृत्य प्रवृत्ताः याः स्मृतयः तन्मूलकाः 'देवक्षेत्रं' 'देवग्रामः' इति व्यवहारा न प्रमाणपदवीमर्हन्ति।

यदुक्तं—पुष्परसग्राहिणी मधुकरीव अन्नरसग्राहिणी देवता। देवतायै प्रत्तं हविः नीरसं भवति, नीरसत्वहेतुत्वादेव देवतायाः अर्थेशानत्वं इति तन्न साधु। वातोपहतमन्नं नीरसं भवति इति नीरसत्वापादको वातो न कस्यचनार्थस्य ईष्टे। तस्माद्विषमोऽयं मधुकरीदृष्टान्तः।

तथा च अपूर्वमेव धर्मप्रयोजकमिति विकृतिभूते सौर्ययागे अग्न्यादेः अभावेऽपि मन्त्रप्राप्तिः मन्त्रे ऊहश्च भवितुमर्हति।

# धर्मतत्त्वनिर्णायकत्वं मीमांसायाः

एन्० आर० श्रीनिवासन्

भगवान् जैमिनिमहर्षिः[1] "अथातो धर्मजिज्ञासा" इति सूत्रेण मीमांसाशास्त्रे धर्मविचारस्य कर्तव्यतां प्रतिज्ञातवानादौ। एतत्सूत्रघटकधर्मपदेन किमभिधीयते ? किं तस्य लक्षणं ? इति जिज्ञासायां स्वयमेवाह[2]—"चोदनालक्षणोऽर्थो धर्मः" इति। तस्यार्थः भाष्यकारेण भगवता शबरस्वामिना इत्थं प्रतिपादितः,[3] "धर्मः प्रसिद्धो वा स्यादप्रसिद्धो वा ? स चेत्प्रसिद्धो न जिज्ञासितव्यः। अथाप्रसिद्धः न तराम्। तदेतदनर्थकं धर्मजिज्ञासाप्रकरणम्।" इत्याशङ्क्य प्रकरणमिदमर्थवदेवेत्युत्तरयति। यतो हि "धर्मं प्रति हि विप्रतिपन्ना बहुविदः केचिदन्यं[4] धर्ममाहुः, केचिदन्यम्। सोऽयमविचार्य प्रवर्तमानो यं कञ्चिदेवोपाददानो विहन्येत। अनर्थं च ऋच्छेत्। तस्माद्धर्मो जिज्ञासितव्य इति।" चोदनालक्षण इति सूत्रघटकचोदनेतिपदेन क्रियायाः प्रवर्तकं वचनमभिधीयते। यागादिक्रियायाः प्रवर्तकं-प्रवृत्त्यनुकूलव्यापाररूपप्रवर्तनाबोधकलिङादिप्रत्ययघटितं वचनं 'यजेत स्वर्गकामः' इत्यादिरूपं वाक्यं इति "चोदनेति क्रियायाः प्रवर्तकं वचनमाहुः" इति भाष्येण प्रतिपादितम्। 'लक्ष्यते येन तत् लक्षणं' तया (चोदनया) यो लक्ष्यते सोऽर्थः पुरुषं निःश्रेयसेन संयुनक्ति। चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यवहितं विप्रकृष्टमित्येवं जातीयकमर्थं शक्नोत्यवगमयितुं नान्यत्' 'तस्माद् चोदनालक्षणोऽर्थः श्रेयस्करः। स एव धर्मशब्देनोच्यते। यो हि यागमनुतिष्ठति तं धार्मिक इति समाचक्षते। यश्च यस्य कर्ता स तेन व्यपदिश्यते। यथा पाचको लावक इति। तेन यः यागादिः स पुरुषं स्वर्गादिनिःश्रेयसेन संयुनक्तीति धर्मपदेनाभिधीयते।

अत्र चोद्यते प्रेर्यते पुरुषोऽनयेति व्युत्पत्त्या चोदनापदं विधिमात्रपरमिति

---

१. (मी० १-१-१) २. (मी० १-१-२) ३. शा० भाष्यं १, २-१-१ सूत्रयोः।

१. अन्तःकरणस्य वृत्तिविशेषं यागाद्यनुष्ठानजन्यं धर्मं साङ्ख्या आमनन्ति।

२. ज्ञानस्य ज्ञानान्तरजन्यां वासनां धर्मं बौद्धा आहुः।

३. जैनाः—पुद्गलाख्यान् देहारम्भकान् पुण्यविशेषोत्पन्नान् परमाणून्।

४. नैयायिकाः—अदृष्टापरपर्यायं विहितकर्मजन्यमात्मविशेषगुणम्।

५. मीमांसकैकदेशिनः-प्राभाकराः-अपूर्वम्।

भट्टकुमारिलः वार्तिके इममेवार्थं जग्रन्थ—

अन्तःकरणवृत्त्यादौ वासनायां च चेतसः।
पुद्गलेषु च पुण्येषु नृगुणेऽपूर्वजन्मनि॥ इति

केषांचित् पक्षः। तत्र च प्रमाणं "चोदनोपदेशश्च विधिश्चैकार्थवाचिनः' इति भट्टपादवचनम्।

अपरे तु प्रमाणाध्यायेऽर्थवादादीनामपि विध्येकवाक्यत्वादिना यथासम्भवं धर्मे प्रामाण्यस्य प्रतिपादितत्वात् चोदनाशब्दस्योपलक्षकत्वमङ्गीकृत्य विध्यर्थवाद-मन्त्र-नामधेयादिसाधारणो वेदमात्रपरश्चोदनाशब्द इति कथयन्ति। अत एव अर्थसङ्ग्रहादिग्रन्थे "वेदप्रतिपाद्यत्वेसति प्रयोजनवदर्थो धर्म" इति स्वोक्तलक्षणस्य चोदनालक्षणोऽर्थो धर्म इति सौत्रलक्षणेन विरोधमाशङ्क्य चोदनाशब्दस्य वेदमात्रपरत्वादिति परिहृतं सङ्गच्छते।

एवं स्थिते यद्यत्र सौत्रचोदनाशब्दो वेदमात्रपरस्स्यात् तदा कुतो वेदलक्षणोऽर्थो धर्म इति न सूत्रयामासेति केषाञ्चित्पर्यनुयोगस्तु विधिवाक्यवदितरेषामर्थवादादिवाक्यानां स्वातन्त्र्येण धर्मे प्रामाण्याभावात् तन्मध्ये विधिवाक्यस्यैव मुख्यत्वात् प्राथमिकत्वाच्च चोदनाशब्दं सूत्रे निवेश्य 'चोदनालक्षणोऽर्थो धर्म' इति उपापादीति परिहर्तव्यः।

एवं चैतत्सिद्धं यच्चोदनापदं मुख्यवृत्त्या विधिप्रत्ययघटितवेदभागमात्रवाचि, लक्षणया तु वेदसामान्यवाचीति पक्षद्वयमपि मीमांसकसम्मतमिति। तदिह—चोदना, लक्ष्यते ज्ञाप्यतेऽनयेति लक्षणं प्रमाणं यस्य स चोदनालक्षणः। यो धर्मः स चोदनालक्षणः, चोदनैव तस्य लक्षणं प्रमाणम्। चोदना च तस्य लक्षणमेवेति श्रुत्या प्रमाणविधौ अर्थाच्चोदनागम्य एवाग्निहोत्रादि धर्मो नातल्लक्षणश्चैत्यवन्दनादिरिति स्वरूपमपि सिद्ध्यति। तथा यश्चोदनालक्षणस्स धर्म इति स्वरूपविधावर्थात् प्रमाणसिद्धिश्च। इत्थं च अनेन सूत्रेण श्रुत्यर्थाभ्यां को धर्मः? किं लक्षणक? इत्येतद्द्वयं निरूपितम्। सौत्रस्यार्थपदेन अनर्थसम्बन्धराहित्यं विवक्षितं, तथा च वेदबोधितत्वे सति साक्षात् फलद्वारा वा यदनर्थाननुबन्धि इष्टसाधनं च तत् धर्मपदवाच्यमिति निर्गलितार्थः। उक्तं हि कुमारिलभट्टपादैः—

फलतोऽपि च यत्कर्म नानर्थेनानुबध्यते।
केवलप्रीतिहेतुत्वात् तद्धर्म इति गीयते।।इति।।

स्वर्गादिनिःश्रेयसमुद्दिश्य यागादिधर्मोऽनुष्ठेयतया "स्वर्गकामो यजेत" इत्यादिवेदवाक्येन प्रमितः। प्रमितस्य तस्य, कथमनुष्ठेय इति इतिकर्तव्यताकाङ्क्षा जायते। 'अग्निं प्रणयति' इत्यादिविधिना आदौ कानिचिदङ्गान्युपदिश्य "उच्चैः ऋचा क्रियते, उपांशुयजुषा, उच्चैः साम्ना" इति वाक्यैः ऋगाद्युद्देशेनोच्चैष्ट्वादि धर्मा विहिताः। तत्र ऋगादिशब्दाः ऋङ्मन्त्रपरा उत ऋग्वेदादिपरा इति सन्देहः। यदि ऋङ्मन्त्रपरास्तदा यजुर्वेदान्तर्गतमन्त्रा अपि 'उच्चैरृचा' इति विधिवशाद् उच्चैः स्वरेण वक्तव्याः स्युः, तथा सति "उपांशुयजुषा" इति वाक्ये यजुरुद्दिश्य विहितमुपांशुत्वं विहन्येत। अतः कथं कर्तव्यमित्याकाङ्क्षा यावन्निर्णयमनुपशान्तैव

भवति। निर्णयश्च "वेदो वा प्रायदर्शनात्" इति सूत्रेण मीमांसायां प्रदर्शितः। "उच्चैः ऋचा" इत्यादिवाक्येभ्यः पूर्वं 'अग्नेः ऋग्वेदः' 'वायोर्यजुर्वेदः' 'आदित्यात् सामवेदः' इति श्रूयते। तत्र उपक्रमगतानां ऋगादिपदानां तदानीमुच्चैष्ट्वोपांशुत्वादिविरुद्धधर्माणामनवभासात् असंजातविरोधित्वेन वेदपदसामानाधिकरण्यात् ऋग्वेदादिपरत्वे सिद्धे तदनन्तरवर्तिषु 'उच्चैः ऋचा क्रियते' इत्यादिवाक्येष्वपि ऋगादिशब्दाः ऋग्वेदादिपरा एव न ऋङ्मात्रपराः। अतश्च यजुरन्तर्गतानां ऋङ्मन्त्राणां नोच्चैः स्वरेण उच्चार्यत्वं किंतु उपांशुस्वरेणेति "उपांशुयजुषा" इत्यनेन न विरोधः इति।

एवं यजुर्वेदे तैत्तिरीयशाखायां 'वसन्ते ब्राह्मणोऽग्नीनादधीत" इति आधानकर्म विहितम्। तत्प्रकरणे 'वारवन्तीयं साम गायति' इति वाक्येन वारवन्तीयाख्यं साम गेयतया विहितं, आधानस्य यजुर्वेदाम्नातत्वात् इदं च वारवन्तीयं साम-याजुर्वैदिकस्वरेण उपांशुस्वरेण गेयमथवा 'उच्चैः साम्ना' इति वाक्यविहित-सामवैदिकस्वरेणउच्चैर्गेयमिति संशये वारवन्तीयसाम्नस्सामवेदे पठितत्वात् तदीयस्वरेण उच्चैर्गेयमिति पूर्वपक्षः, आधानकर्मोद्देशेन तत्प्रकरणे विहितत्वात् सामेदमाधानस्य गुणभूतं, प्रधानं चाधानं, गुणप्रधानयोर्मध्ये प्रधानस्य प्रबलत्वात् याजुर्वैदिकस्वरेणैव गेयमिति सिद्धान्तश्च प्रत्यपादि।

इत्थं—'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः' इति वाक्येन सूर्यदेवताकचरु-द्रव्यकब्रह्मवर्चसफलको यागो विधीयते। अत्र निर्वपेदिति लिङभिहितभावनायाः किं भावयेदिति साध्याकाङ्क्षायां ब्रह्मवर्चसरूपफलं साध्यत्वेनान्वेति, केन भावये-दिति करणाकाङ्क्षायां सौर्ययागः साधनत्वेनान्वेति, कथं भावयेदिति इतिकर्तव्य-ताकाङ्क्षायां विकृतिसन्निधौ प्रयाजादीनां अङ्गानां पाठाभावेन दर्शपूर्णमास-प्रकरणपठितानां प्रयाजादीनां तत्र क्लृप्तोपकारकत्वेन तादृशोपकारपृष्ठभावेन (प्रकृतिवद्विकृतिः कर्तव्येति) अतिदेश-प्रमाणेन तेषामन्वयः। ततश्च प्रयाजादि-प्राकृताङ्गैः सौर्ययागं भावयेदिति सिद्धयति। सौर्ययागे चरोः हविष्ट्वात् तत्प्रकृति-भूतनीवारद्रव्यस्य प्रकृतौ पुरोडाशप्रकृतिभूतव्रीहिद्रव्यस्येव निर्वापोऽतिदेशेन प्राप्यते। स च निर्वापः "अग्नये जुष्टं निर्वपामि" इति मन्त्रोच्चारणपूर्वकं क्रियते प्रकृतौ। मन्त्राश्च कर्मणां प्रयोगकाले द्रव्यदेवतादिप्रयोगसमवेतार्थस्मारकतया दृष्टार्थाः। प्रकृतौ यागीयदेवता अग्नेस्स्मारकस्सन् निर्वपामीति विनियोगवशात् निर्वापाङ्गं भवति। सौर्यं चरुं निर्वपेद् इति विकृतौ तु सूर्यो देवता। अग्नये जुष्टं निर्वपामीति निर्वापमन्त्रस्य सूर्यदेवताप्रकाशकत्वाभावेन निर्दिष्टयागीय देवता-प्रकाशनरूपदृष्टोपकारकत्वं न संभवति। अतस्तत्सिद्धयर्थम् अग्निदेवतावाचकपद-स्थाने सूर्यदेवतावाचकपदस्य सूर्यायेति ऊहः कर्तव्य इति मीमांसया निरणायि।

तथा—चयनप्रकरणे "अक्ताः शर्करा उपदधाति" इति श्रूयते। शर्करा इत्यस्य लोष्टखण्डविशेषा इत्यर्थः। अक्ताश्शर्करा उपदधाति इत्यनेन तेषामञ्जनं

कृत्वा कृताञ्जनेन चोपधानं कर्तव्यमिति गम्यते। उपधानं नाम राशिरूपेण घटनाविशेषः। तत्र लोष्टखण्डकासु इष्टकासु अञ्जनं द्रवद्रव्येण भवति। द्रवद्रव्याणि च तैलजलघृतादीनि बहूनि सन्ति, तेषु केन द्रव्येणाञ्जनं कर्तव्यमिति संदेहो भवति। तत्र 'संदिग्धे तु वाक्यशेषात्' इति सूत्रेणेत्थं निर्णयोऽकारि। अक्ताः शर्करा इति वाक्यानन्तरं 'तेजो वै घृतं' इति वाक्यशेषः श्रूयते। तत्र घृतस्य तेजस्त्वेन स्तुतिः क्रियते, स्तुतिर्हि तस्यैवापेक्षिता यस्यानुष्ठानार्थमपेक्षा। तथा च घृतस्य स्तुत्याऽवगम्यते घृतेन किमपि कर्तव्यमिति उपकार्याकाङ्क्षा, अञ्जनस्य च केन द्रवद्रव्येणेति उपकारकाकाङ्क्षा वर्तते। उभयोः परस्पराकाङ्क्षावशाद् घृतेनैवाञ्जनं कर्तव्यं न तैलादिनेति। इत्थमत्र स्थालीपुलाकन्यायेन द्वित्रा अधिकरणन्याया अस्माभिस्संग्रहेणोदाहृताः। संपूर्णेऽपि मीमांसाशास्त्रे प्रत्यधिकरणं यागानुष्ठानोपयोगिवेदवाक्यविशेषमधिकृत्य विचारं कृत्वा कश्चन निर्णयात्मको न्यायविशेषः प्रवर्तितः। अत एव 'पूजितविचारो मीमांसे'ति भामतीकारोक्तिः, अस्य शास्त्रस्य वाक्यशास्त्रमिति व्यपदेशश्च अन्वर्थः। यद्यप्यधीतपदन्यायादिशास्त्रस्य वेदवाक्यश्रवणानन्तरं कश्चिदर्थः प्रतीयते, तथाऽपि स किं बाधितोऽबाधितः? किं स एव तत्र विवक्षित उतान्य इत्यादि संशयनिरासो मीमांसाशास्त्रेणैव पूर्वोक्तरीत्या सिद्ध्यति। इत्थं च कथं यागोऽनुष्ठेय इति कथंभावाकाङ्क्षाया उपदर्शितपथा मीमांसाधीननिर्णयादुपशमनादस्या इतिकर्तव्यताभागपूरकत्वेन धर्मतत्त्वनिर्णायकत्वं वेदितव्यम्।

तदाहुः—

धर्मे प्रमीयमाणे हि वेदेन करणात्मना।
इतिकर्तव्यताभागं मीमांसा पूरयिष्यति॥ इति

# भाट्टनये प्रामाण्यवादः

—डॉ० सोमनाथ नेने

भारतीयदर्शनेषु स्वप्रमेयसिद्धयर्थं प्रमाणानां सर्वैरपि प्राथम्यमङ्गीकृतम्। दर्शनसम्प्रदायेषु न केवलं प्रमाणानां संख्यास्वरूपविषये पार्थक्यमुपलभ्यतेऽपितु प्रमाणजन्यं याथार्थ्यलक्षणं-प्रमात्वात्मकं यत्प्रामाण्यं वर्तते ज्ञानस्य, तस्य प्रामाण्यस्य तस्य स्वतस्त्वपरतस्त्वनिर्णयेऽपि एतेषु सम्प्रदायेषु पर्याप्तं वैभिन्यं बुद्धिपथं समायाति।

ज्ञानस्य प्रामाण्यमप्रामाण्यं वा उभयत्र स्वतस्त्वमेवाङ्गीक्रियते सांख्यैः।[1] न्यायनये वैशेषिकमते च उभयत्र परतस्त्वं स्वीक्रियते।[2] बौद्धानामेकदेशिनां मते अप्रामाण्यस्य स्वतस्त्वं प्रामाण्यस्य च परतस्त्वमभिमतम्।[3] एभिः सिद्धान्तैर्वैपरीत्यमुद्वहतां भाट्टमीमांसकानां विचारसरणौ प्रामाण्यमेव स्वतो निश्चीयते। अप्रामाण्यस्य निश्चयस्तावदेभिरपि नैयायिकानां रीत्या प्रवृत्तिवैफल्यादिभिर्हेतुभिः परत एव उररीक्रियते।

### प्रामाण्यस्य द्वैविध्यं स्वतस्त्वं परतस्त्वञ्च

उत्पत्तिज्ञप्तिगतभेदेन ज्ञानस्य प्रामाण्यमप्रामाण्यञ्च द्विविधम्। उत्पत्तिगते ज्ञप्तिगते च उभयत्र प्रामाण्याप्रामाण्यस्य परतस्त्वमेव संस्थापितं तार्किकैः। भाट्टविचारवोथिकायामुत्पत्तिगतस्य ज्ञप्तिगतस्य च ज्ञानस्य प्रामाण्यमेव स्वतस्त्वेनाङ्गीकृतम्। अप्रामाण्यं तावत् द्विविधेऽपि स्थले परतस्त्वेनैवानुमोदितम्।

प्रथमं तावत् किं नाम स्वतस्त्वं? किञ्च परतस्त्वमेतद्विचारणीयम्। यया कारणसामग्रया ज्ञानमुत्पद्यते तयैव सामग्रया प्रामाण्यस्याप्युत्पत्तौ प्रामाण्यस्योत्पत्तिगतं स्वतस्त्वमुच्यते। संक्षेपधिया एतदेव ज्ञानोत्पादिकातिरिक्तानपेक्षत्वं नाम प्रामाण्यस्योत्पत्तिगतं स्वतस्त्वमिति वक्तुं शक्यते। भेदे तु ज्ञानोत्पादिकायाः कारणसामग्रयाः प्रामाण्योत्पादिकया सामग्रया ज्ञानोत्पादिकातिरिक्तापेक्षत्वात्मकं परतस्त्वमुत्पत्तिगतस्य प्रामाण्यस्याङ्गीक्रियते विबुधैः।

---

१. 'प्रमाणत्वाप्रमाणत्वे स्वतः सांख्याः समाश्रिताः' सर्वदर्शनसंग्रहः पृ० ५५७, चौखम्बा विद्याभवनं, वाराणसी, १९६४।

२. "अथैवमप्यप्रामाण्यं परतस्तर्हि प्रामाण्यमपि परत एव गृह्यताम्।" तर्कभाषा, पृष्ठ संख्या १४१, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, १९८२।

३. 'सौगताश्चरमं स्वतः' —सर्वदर्शनसंग्रहः, पृ० ५५७।

**प्रामाण्यस्योत्पत्तौ स्वतस्त्वपरतस्त्वे**

तार्किकनये ज्ञानस्योत्पत्ताविन्द्रियाणां कारणत्वमङ्गीकृतम् । ज्ञानप्रामाण्यस्योत्पत्तौ इन्द्रियगतगुणानां कारणत्वाङ्गीकारात्[1] ज्ञानोत्पादिकया कारणसामग्र्या प्रामाण्योत्पादिकायाः कारणसामग्र्याः पार्थक्यात् परतस्त्वमुत्पत्तिगतस्य प्रामाण्यस्याभिमतं मतम् ।

उत्पत्तिगतस्य ज्ञानप्रामाण्यस्य परतस्त्वं निराकुर्वतां मीमांसकानां सिद्धान्ते इन्द्रियगतगुणजन्यत्वात्मके प्रामाण्ये गुणत्वं नाम दोषाभावात्मकत्वमेव वर्तते, अत एव येन दोषाभावात्मकत्वेन गुणवत्वेनेन्द्रियेण ज्ञानं जन्यते तेनैव तस्य ज्ञानस्य प्रामाण्यस्योत्पत्तेरप्यङ्गीकारात् ज्ञानोत्पादिकायाः सामग्र्याः प्रामाण्योत्पादिकया सामग्र्या सहाभेदत्वात्सिद्ध्यते स्वतस्त्वमुत्पत्तिगतस्य ज्ञानप्रामाण्यस्य ।

यदाकदाचिदवधृते ज्ञाने प्रवृत्त्यादिभिर्हेतुभिः अप्रामाण्यमुपलभ्यते तर्हि एतस्याप्रामाण्यस्येन्द्रियगतकाचकामलादि - दोषजन्यत्वादुत्पत्तिगतस्याप्रामाण्यस्य नैयायिकदिशानुरूपं परतस्त्वमनुमन्यते भाट्टैरपि ।

**प्रामाण्यस्य ज्ञप्तौ स्वतस्त्वपरतस्त्वे**

ज्ञानप्रामाण्यस्य ज्ञाप्तिगते प्रामाण्येऽपि नैयायिकभाट्टमीमांसकयोः महत् पार्थक्यमुपलभ्यते । ज्ञप्तिगतस्य प्रामाण्यस्य स्वतस्त्वं नाम ज्ञानग्राहकातिरिक्तानपेक्षत्वम् । ज्ञानोत्पादिकया सामग्र्या एव प्रामाण्यस्यापि ग्रहणं प्रामाण्यस्य ज्ञप्तिगतं स्वतस्त्वमुच्यते । एतद्विपरीतं यदि ज्ञानोत्पादिका सामग्री काप्यन्या प्रामाण्योत्पादिका च तदितरा चेदेतदेव ज्ञप्तिगतस्य प्रामाण्यस्य परतस्त्वं मन्यते ।

**ज्ञप्तौ प्रामाण्यस्य परतस्त्वम्**

नैयायिकास्तावत् ज्ञप्तिगतेऽपि प्रामाण्ये परतस्त्वमेवानुमन्यन्ते । एतेषां मते प्रथमं तावत् 'अयं घट' इत्याकारकं व्यवसायात्मकं ज्ञानं जन्यते । एतदनन्तरं घटमहं जानामि घटज्ञानवानहमिति वाऽनुव्यवसायो जन्यते अनुव्यवसायात्मकेन ज्ञानेन प्रथमं व्यवसायात्मकं ज्ञानं गृह्यते । गृहीते ज्ञाने विषयस्य ग्रहणादौ जातायां सफलीभूतायां प्रवृत्तौ 'इदं मे जलज्ञानं प्रमाणं, सफलप्रवृत्तिजनकत्वात्', इत्यनेन प्रवृत्तिसाफल्यमूलकेनानुमानेन गृहीतस्य ज्ञानस्य प्रामाण्यं निश्चीयते ।[2]

विफलीभूतायां प्रवृत्तौ 'अप्रमाणं मे इदं जलज्ञानम्' असमर्थप्रवृत्तिजनक-

---

१. प्रमां प्रति गुणः कारणम् । न्यायसिद्धान्तमुक्तावली पृ० ४२७ चौखम्भा-संस्कृत-संस्थानम् वाराणसी १९८३ ।

२. तथाहि—इदं ज्ञानं प्रमा, संवादिप्रवृत्तिजनकत्वात्, यन्नैवं तन्नैवं, यथाऽप्रमा ।' न्याय० सि० मु० पृ० ४३८ ।

त्वादित्यादिकेन प्रवृत्तिवैफल्यमूलकेनानुमानेन गृहीतस्य ज्ञानस्याप्रामाण्यञ्च गृह्यते।

एवं न्यायनये ज्ञानग्राहिकाया: अनुव्यवसायात्मिकाया: सामग्र्याः प्रामाण्याप्रामाण्यग्राहिकया प्रवृत्तिसाफल्यवैफल्यमूलकानुमानात्मिकया सामग्र्या सह भेदात् ज्ञानग्राहकातिरिक्तापेक्षत्वरूपमुभयोः प्रामाण्याप्रामाण्ययोः परतस्त्वं स्वीक्रियते।

**ज्ञप्तौ प्रामाण्यस्य स्वतस्त्वम्**

ज्ञानग्राहकसामग्रीग्राह्यत्वं ज्ञानग्राहकातिरिक्तानपेक्षत्वं वा ज्ञप्तिगतस्य प्रामाण्यस्य स्वतस्त्वमुच्यते[1]। गुरुमिश्रभट्टमतभेदेन त्रैविध्यमवाप्नुवद्भिः त्रिविधैरपि मीमांसामतावलम्बिभिः ज्ञप्तिगतस्य ज्ञानप्रामाण्यस्य समानसामग्रीग्राह्यत्वात्मकं स्वतस्त्वमेव संस्थाप्यते।

**गुरुमतम्**

गुरुमते ज्ञानस्य स्वप्रकाशतया ज्ञानोत्पादिका सामग्र्येव ज्ञानग्राहिका। अनया ज्ञानोत्पादिकया सामग्र्या तज्ज्ञानीयप्रामाण्यमप्यवगम्यते।

यदि ज्ञानोत्पादिका सामग्री ज्ञानग्राहिकया सामग्र्या भिन्नत्वेनाङ्गीक्रियते तर्हि उत्पत्तिक्षणेऽनिश्चयाद् ज्ञानस्य स्वप्रकाशत्वमनुपपन्नं स्यात्। अस्याऽनुपपत्तेर्निवारणार्थमेव त्रिपुटीप्रत्यक्षमङ्गीक्रियते प्राभाकरैः। अनेन त्रिपुटीप्रत्यक्षेण न केवलं विषयविषयिज्ञातॄणां त्रयाणां ज्ञानमुत्पद्यते गृह्यते च अपितु अनेनैव ज्ञानस्य प्रामाण्यमपि निश्चीयते।[2]

एवं त्रिपुटीप्रत्यक्षात्मिकया एकयैव सामग्र्या ज्ञानस्य प्रामाण्यस्य च ग्रहणात् समानसामग्रीग्राह्यत्वात्मकं प्रामाण्थस्यस्वस्तस्त्वं सिद्धचति।

**मिश्रमतम्**

मुरारिमिश्रास्तु अयं घट इत्याकारकं ज्ञानं घटमहं जानामीत्याकारकेन मानसेनानुव्यवसायात्मकेन ज्ञानेन गृह्यत इति मन्यन्ते। एतेषां मते अनुव्यवसायात्मिकया ज्ञानग्राहकसामग्र्यैव ज्ञानप्रामाण्यस्यापि ग्रहणात् समानसामग्रीग्राह्यत्वात्मकस्य ज्ञप्तिगतस्य प्रामाण्यस्य स्वतस्त्वमक्षुण्णमेव।[3]

---

१. 'तेन ज्ञानग्राहकातिरिक्तानपेक्षत्वमेव स्वतस्त्वं प्रामाण्यस्य। तर्कभाषा पृष्ठ संख्या १३६।

२. गुरवस्तु घटादिमात्रविषयकं न ज्ञानं सर्वज्ञानानां त्रिपुटीविषयकत्वाङ्गीकारात्। त्रिपुटी च ज्ञानात्मविषयरूपा, तेन सर्वज्ञानं घटं जानामीत्याद्यनुव्यवसायाकारमिति। स्वेनैव स्वस्य घटादिविषयकग्रहणात्ततः प्रामाण्यमित्याहुः।" भाट्टचिन्तामणि: पृ० १४, चौखम्बा-संस्कृत-आफिस-सीरिज, १९३३।

३. 'मुरारिमिश्रास्तु घटादिज्ञानोत्तरं घटं जानामीत्याद्यनुव्यवसायो जायते तेन घटत्ववद्विशेष्यकत्वे सति घटत्वप्रकारकत्वरूपप्रामाण्यग्रह इत्याहुः।' भाट्टचिन्तामणि, पृ० १४।

## भाट्टमतम्

भाट्टनये प्रथमं तावद् घटोऽयमित्याकारकं ज्ञानं जन्यते। एतदनन्तम् अनेन ज्ञानेन स्वविषये घटे ज्ञाततासंज्ञकः कश्चित् धर्मं उत्पाद्यते। ज्ञाततेयं घट-ज्ञानानन्तरं 'ज्ञातो मया घट' इत्याकारकेन मानसेन ज्ञानेन प्रतिसन्धीयते। अस्या ज्ञाततायाः घटज्ञानात्प्रागनवस्थानाद् ज्ञानोत्पत्त्यनन्तरमेव प्रतिसन्धानाच्च ज्ञायते यदियं ज्ञातता घटादिज्ञानजन्येव। अस्याः ज्ञाततायाः स्वकारणेन घटादिज्ञानेन विनोत्पत्तेरनुपपत्तिर्जायते। अत एवास्यानुपपत्तेर्निराकरणार्थमुपपादकीभूतया ज्ञातताऽन्यथानुपपत्तिप्रसूतार्थापत्त्या ज्ञातताजनकत्वेन ज्ञानं गृह्यते। अनेन ज्ञानेन सह याथार्थ्यलक्षणं प्रमात्वात्मकं ज्ञानप्रामाण्यमपि अनयैवार्थापत्त्या गृह्यते। एवं ज्ञानग्राहिकया सामग्रीभूतयार्थापत्त्यैव ज्ञानप्रामाण्यस्यापि ग्रहणात्[1] समानसामग्रीग्राह्यत्वं समानसंवित्संवेद्यत्वात्मकं[2] वा प्रामाण्यस्य स्वतस्त्वं निष्पद्यते।

भाट्टपादैस्तावत् श्लोकवार्तिके—

"स्वतः सर्वप्रमाणानां प्रामाण्यमिति गम्यताम्।
नहि स्वतोऽसती शक्तिः कर्तुमन्येन शक्यते॥"[3]

इत्यनया कारिकया सर्वेषां ज्ञानानां स्वतःप्रामाण्यं साधितम्। एवमेव पार्थसारथिमिश्रैरपि न्यायरत्नमालायां—

"विज्ञानस्य प्रमाणत्वं स्वतो निर्णीयते यथा।
परतश्चाप्रमाणत्वं तथा न्यायोऽभिधीयते॥"[4]

इत्यारभ्य "तस्मात्स्वतः सिद्धं प्रामाण्यं सर्वज्ञानानां तच्च वेदस्यानुमोदित-मित्यनया[5] पङ्क्त्या सर्वेषां ज्ञानानां स्वाभाविकं स्वतःप्रामाण्यं प्रतिपादितम्।

नूतनायां विचारधारायां सर्वपल्लिभिः डॉ० राधाकृष्णन्महाभागैरपि एवमेव प्रतिपादितम् "The Mimamsa theory of self validity prounts out that validity is a quality of all knowing insepara-ble from it."[6]

---

१. तस्मात् प्रवृत्तेः पूर्वमेव ज्ञातताऽन्यथानुपपत्तिप्रसूतयाऽर्थापत्त्या ज्ञाने गृहीते ज्ञानगतं प्रामाण्य-मप्यर्थापत्त्यैव गृह्यते।' तर्कभाषा पृ० १३७।

२. "प्रमात्वस्याननुमेयत्वात् ज्ञानानुमाने समानसंवित्संवेद्यतया ज्ञानत्ववत्प्रमात्वस्य स्वतस्त्व-सम्भवात्।" भाट्टचिन्तामणि, पृ० १३।

३. श्लोकवार्त्तिकम् अ० १, पा० १, सू० २, श्लो० सं० ४७।

४. न्यायरत्नमाला पृ० ३६ चौखम्बा-संस्कृत सीरीज, ई० १९००।

५. न्यायरत्नमाला पृ० ३९।

६. Indian Philosophy—Dr. S. Radhakrishnan, Volume II Blackee & Son publishers. Pvt. Ltd. Bombay, Calcutta, Madras, New Delhi, p. 406.

अस्मिन्सन्दर्भे सप्तदशशताब्द्याः मध्यकाले लब्धप्रतिष्ठैः विश्वेश्वरभट्टा-परनामधेयैः श्रीमद्गागाभट्टमहाभागैः भाट्टचिन्तामणेः तर्कपादे—

"कश्चित्तु तेन वेदजन्यज्ञाने संशयाभावात्स्वतः प्रामाण्यं तदभिन्नज्ञाने तु परतः प्रामाण्यं ज्ञायते। अत एव स्मृतिजन्यज्ञाने सन्मूलकत्वगुणज्ञानादेव प्रामाण्यं सिद्धान्तेप्यङ्गीकृतमिति युक्तमुत्पश्यामः।"[1] अत्र "युक्तमुत्पश्यामः" इत्यनेन वेदज्ञानस्य स्वतः प्रामाण्यं तदतिरिक्तेषु स्थलेषु परतः प्रामाण्यमङ्गीकुर्वद्भिर्यद्यपि भाट्टमीमांसानव्यन्यायविचारसरण्योः समन्वयात्मिका दृष्टिरेका स्थापिता, परन्तु अस्मिन्विवेचने ज्ञानमात्रस्य स्वाभाविकं यत् प्रामाण्यमासीत् तद्विनष्टमेव। वेदवत्त्वेनैव ज्ञानस्य प्रामाण्याङ्गीकारात् ज्ञानप्रामाण्यस्य स्वतस्त्वमेव विलुप्तमतो, नास्ति भट्टवर्याणामयं विपश्चिदपश्चिमो सिद्धान्त इति।

ज्ञानप्रामाण्यस्योत्पत्तिगतज्ञप्तिगतयोरुभयत्र स्वतस्त्वमङ्गीकुर्वतां मीमांसकानां मते यावत्कालपर्यन्तं पर्याप्तैः प्रमाणैः प्रमात्वेनाङ्गीकृतस्य ज्ञानस्य दोषवत्त्वात्मकमप्रामाण्यं न गृह्यते तावत्कालपर्यन्तं तस्य ज्ञानस्योभयात्मकं प्रामाण्यं स्वतः सिद्धम्। प्रामाण्यत्वेन निश्चितेऽपि ज्ञाने प्रबलतरैः प्रमाणैरप्रामाण्यग्रहाशङ्कया-ऽप्रामाण्यस्य परतस्त्वमेवाङ्गीकृतं भाट्टैः।

अस्माकं राष्ट्रस्य विधिशास्त्रेऽपि दोषवत्त्वात्मकस्याप्रामाण्यस्य सिद्धि-कालपर्यन्तं दोषाभावात्मकं प्रामाण्यं स्वतः सिद्धत्वेनाङ्गीक्रियते। भाट्टानामपि ज्ञानप्रामाण्यस्य स्वतस्त्वे अप्रामाण्यस्य च परतस्त्वाङ्गीकारे अयमेव विचारः परि-लक्ष्यते।

---

१. भाट्टचिन्तामणिः, पृ० सं० १५।

# मीमांसकदृशा शब्दार्थसम्बन्धनित्यत्वविमर्शः

—डॉ० कमलनयनशर्मा

शब्दार्थयोः सम्बन्धस्य नित्यत्वे अनित्यत्वे तत्स्वरूपे च विवदन्ते वादिनः। दृश्यते तत्र शास्त्रकाराणां मतवैभिन्न्यमपि। यद्यपि तत्रेदमेव सत्यमिदमसत्यमिति नाद्यावधि जायमानेऽपि विचारे निश्चितमिति वक्तुं शक्यते। सर्वत्र युक्तिप्रमाणानां सद्भावात्। तथापि नानेनेदमपि वक्तुं कश्चित् शक्नोति, यद्विचार एव व्यर्थ इति। स्वस्वपक्षे तत्तच्छास्त्रकाराणां बुद्धिकौशलस्य प्रदर्शनपरत्वात्। विचार-क्रमेणैवानेन भवति बुद्धीनां विकासः। तथैव च शास्त्राणां विकासः सवर्द्धनं सुदृढीकरणञ्च जायते। नवा नवा युक्तयोऽपि समागच्छन्ति। तेन च परवर्त्तिनां विदुषां विचाराय प्रशस्तो भवति मार्गः। अयमेव च विचारक्रमः शास्त्रमुपजीवयति परिष्करोति च। अस्मादेव कारणादस्माकं पुरतो विलसन्ति शास्त्राणि। अन्यथा शास्त्राणां मृतिरेव सम्भाव्येत। तस्मान्न कुत्रापि दुराग्रहः। सर्वे सिद्धान्ताः स्वस्वपरम्परायां प्रामाणिकाः मान्याश्च। कार्याण्यपि तेनैव प्रचलन्ति। न कस्यापि शास्त्रस्वीकृतसिद्धान्तस्य खण्डनेन मण्डनेन वा खण्डितं मण्डितं वा भवति। अन्यथा शास्त्रविलोपः स्यात्। परस्परं सर्वेषां शास्त्राणां स्वस्वनिकाये परशास्त्र-सिद्धान्तानां खण्डनस्य दृष्टत्वात्। परन्तु न भवति तथा। अयमेव शास्त्राणां संरक्षणक्रमः। अत एवास्माकं शास्त्राणि सुदीर्घकालादद्यावधि स्वस्थं जीवन्ति। विचारक्रमस्य मृत्यौ शास्त्राणामपि भवति मृत्युः।

प्रसङ्गेऽत्र तावत्सर्वप्रथमं नैयायिकाः प्रत्यवतिष्ठन्ते। सुसूक्ष्मतत्त्वनिर्धारणै-कशेमुषीकाणां प्रमाणपटूनां नैयायिकानां मते ईश्वरसङ्केत एव शक्तिः। तयैव च शक्त्या वृत्त्याऽर्थबोधकं पदं वाचकत्वेन व्यवह्रियते। तद्बोध्यश्चार्थः वाच्यत्वेन व्यवहारपदमारोहति। यथा गोत्वादिधर्मविशिष्टबोधकं पदं वाचकं तथा तद्-गोत्वादिपदजन्योऽर्थो वाच्य इति। अतएवोक्तं भट्टाचार्येण गदाधरेण—"ईश्वर-सङ्केतः शक्ति"रिति। अनयैव शक्त्या प्रतिपाद्योऽर्थः मुख्यत्वं भजते। यत्र च मुख्यार्थस्य येनकेनापि कारणेन जायते बाधस्तत्रान्यया लक्षणया वृत्त्या भवति बोधः। अतएवोक्तम्—'सङ्केतो लक्षणा चार्थे पदवृत्तिः' इति। वृत्तिशब्देनात्र शाब्दबोधोपयोगिसामग्रीसमुदाय उच्यते। स एव च सम्बन्धशब्देन प्रतिपाद्यते। स च सङ्केतलक्षणाभेदभिन्नत्वात् द्विविध इति। वृत्तिद्वयेन पदप्रतिपाद्यतावच्छेदकता-श्रय एव पदार्थशब्देनोच्यते। सङ्केतश्चेश्वरीयः। अतएवोक्तमपि—इदं पदमिमर्थं बोधयतु अस्माच्छब्दादयमर्थो बोद्धव्य इति वेच्छा सङ्केतरूपा वृत्तिः। अर्थात् शक्ति-रित्यर्थः। विशेष्यविशेषणभाववैलक्षण्येनार्थप्रतियोगिकः पदानुयोगिकः अथवा

अर्थानुयोगिकः पदप्रतियोगिको वा बोधः। एष एव च सम्बन्धः। अनेन चेदं स्पष्टं भवति यत्सम्बन्धो भिन्न एव पदार्थः, शक्तिश्च भिन्न एव पदार्थ इति। एतेषां सिद्धान्तेऽनेन प्रकारेण सम्बन्धस्यानादित्वापरपर्यायं नित्यत्वमपि न सेत्स्यति।

तन्न सहन्ते वैयाकरणाः। वैयाकरणनिकाये शब्दार्थयोरिव सम्बन्धस्यापि नित्यत्वमेव भवति। अतएव शब्दस्यार्थस्य सम्बन्धस्य च नित्यत्वं प्रतिपिपादयिषया पर्यनुयोगः कृतः। यथा—'कथं पुनरिदं भगवतः पाणिनेराचार्यस्य लक्षणं प्रवृत्तमि'ति। उत्तरितञ्चानुपदमेव—'सिद्धे शब्दार्थसम्बन्धे' इति। स्पष्टीकृतं स्वयमेव—'सिद्धे शब्दे अर्थे सम्बन्धे चे'त्यादिना। अत्र च विषये सम्यक् पर्यालोचनं कृत्वा निश्चितमिदं कृतं यत् 'सिद्धशब्दो नित्यपर्यायवाची' इति। तथा चोक्तम्—'नित्यपर्यायवाची सिद्धशब्दः' इति। यद्यपि सिद्धशब्दस्यानित्येऽपि पदार्थे भवति प्रयोगः, यथा—सिद्धः ओदन इत्यादि, तथापि भाष्यकारीयव्याख्यानतो विशेषरूपेण सिद्धशब्दो नित्यपर्याय इति। तथा चोक्तम्—'व्याख्यानतोविशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' इति। अनेन सिद्धसिद्धान्तेन नित्यपर्यायवाचिनः सिद्धशब्दस्यात्र ग्रहणमिति व्याख्यास्यामः। अनेन च प्रघट्टकेन शब्दार्थयोरिव सम्बन्धस्यापि नित्यत्वं सिद्ध्यति। शक्तिविचारप्रसङ्गे श्रीहरिवचनमपि स्मरन्ति आचार्याः, यथा—

उपकारः स यत्रास्ति धर्मस्तत्रानुगम्यते।
शक्तीनामप्यसौ शक्तिर्गुणानामप्यसौ गुणः। इति।

अयं भावः—यत्र ज्ञानस्य शक्तेश्चोपकारस्वभावः सम्बन्धो विद्यते, तत्र कार्यवशेन शक्तिरूपो धर्मोऽनुमीयते। शक्तीनामपि कार्यजननेऽयं सम्बन्धः उपकरोति। तथा चायमेव सम्बन्धः गुणानां द्रव्याश्रितत्वनियामक इति। व्याख्यातञ्च श्रीमताहेलाराजेन—उपकारः—उपकार्योपकारकयोर्बोधशक्त्योरुपकारस्वभावः सम्बन्धो यत्रास्ति, तत्र धर्मः शक्तिरूपः कार्यं दृष्ट्वानुमीयते। असौ सम्बन्धःशक्तीनामपि कार्यजनने उपकारकः, गुणानामपि द्रव्याश्रितत्वनियामक इति। अत्रैव च पातञ्जलभाष्यीयवचनमुदाहृत्य संगमयति। यथा, 'सङ्केतस्तु पदार्थयोरितरेतराध्यासरूपः स्मृत्यात्मको योऽयं शब्दः सोऽर्थो योऽर्थः स शब्द' इति। संस्कारमात्रजन्यं ज्ञानं स्मृतिः। संस्कारश्च पूर्वज्ञातस्यैव भवति। अतएव स्मृत्यात्मकं इति पदोपादानेन पूर्वतः ज्ञातस्यैव सङ्केतस्य शक्तिबोधकत्वं सिद्ध्यति। शब्दार्थयोरितरेतराध्यास एव सङ्केतस्तन्मूलकं तादात्म्यञ्च सम्बन्ध इति। अत्रैव न्यायभाष्यवचनमुपस्थाप्य समायोजयति। यथा, 'समयज्ञानार्थञ्चेदं पदलक्षणायाः वाचोऽन्वाख्यानं व्याकरणम्, वाक्यलक्षणाया वाचोऽर्थलक्षणम्।' तस्मादितरेतराध्यासः सङ्केतस्तन्मूलकं तादात्म्यमित्यादि। शब्दार्थयोश्च निरूपकः सम्बन्धो भवति तादात्म्यम्। शब्दनिरूपितोऽर्थः अर्थनिरूपितश्चशब्द इति। तथा च वक्ति नागेशः

'तस्य च तादात्म्यस्य निरूपकत्वेन विवक्षितोऽर्थः शक्यः, आश्रयत्वेन विवक्षितः शब्दः शक्त इत्युच्यते' इति। तादात्म्यञ्च भेदाभेदनिरूपितं भवति। तथा च लक्षितम्—'तद्भिन्नत्वे सति तदभेदेन प्रतीयमानत्वमि'ति। एवमेव लघुमञ्जूषायां शब्दनिष्ठं बोधजनकत्वं सम्बन्धरूपं वा शक्तिरूपं वेति विचारप्रसङ्गे सम्यक् निरूपितं यद्-बोधजनकत्वं न सम्बन्धरूपं न वा शक्तिरूपम्। अपि तु सम्बन्धान्तरमेव वाच्य-वाचकभावरूपमिति सिद्धान्तितम्। तथा च तदीयसन्दर्भः—"बोधजनकत्वस्यापि आश्रयतानियामकत्वाभावान्न सम्बन्धत्वम्। नापि तस्य शक्तित्वम्। प्रयोज्य-प्रयोजकव्यवहारं पश्यता बालेन प्रयोज्यस्य प्रवृत्त्या तस्य ज्ञानमनुमाय ज्ञानस्यो-पस्थितत्वाच्छब्दमेव कारणत्वेन गृहीत्वाऽसम्बन्धस्य कारणत्वानुपपत्तिज्ञानपूर्वकं कल्प्यमानस्य स्वयमनुपपद्यमानत्वेन गृहीतजनकत्वरूपस्य तद्घटितस्य वा गृहीतु-मुचितत्वात्। तस्मात्सम्बन्धान्तरमेव वाच्यवाचकभाव इति"। अनेन च प्रकारेणेदं स्पष्टीभवति यच्छक्तिः भिन्न एव पदार्थः, सम्बन्धश्च भिन्न एवेति।

कौण्डभट्टोऽपि भूषणसारे शक्तिनिरूपणप्रसङ्गे कथयति—

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**
**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा॥**

स्वयमेव च व्याख्याति—इन्द्रियाणां चक्षुरादीनां स्वविषयेषु चाक्षुषेषु घटादिषु यथा अनादिर्योग्यता तदीय चाक्षुषादिकारणता, तथा शब्दानामपि अर्थैः सह तद्-बोधकरणतैव योग्यता, सैव शक्तिरित्यर्थः। अर्थात् बोधकत्वरूपा या योग्यता, सा शक्तिरिति। नागेशमते बोधजनकत्वं न शक्तिरूपम् अतएवोक्तं 'नापि तस्य शक्तित्वम्' इति। तस्य बोधजनकत्वस्येत्यर्थः। अयञ्चोभयोर्विशेषः। तदीयदर्पण-टीकायामाचार्येण हरिवल्लभेनोक्तम्—"लाक्षणिकपदस्य वाचकत्वापरिहारेऽपि नेश्वरेच्छायाः शक्तित्वम्। ईश्वरस्यैवानभ्युपगमात्। नापि सङ्केतत्वेन तज्ज्ञानं हेतुः। गवादिपदेष्वपीश्वरादेः सङ्केतत्वेन तज्ज्ञानशून्यानां लौकिकमीमांसकादीनां तत्तदर्थबोधजनकत्वग्रहवतामेव बोधोदयेन व्यभिचारात्" इति। तन्मतमिदं विचारणीयं वर्त्तते। यद्यपि हरिवल्लभाचार्यो न मीमांसादर्शनानभिज्ञस्तथापि दुराग्रहग्रहग्रहिलहृदयस्तु अस्त्ये व। तत्र तत्र मीमांसाधिकरणानामुपस्थापनं करोति स्वकीयायां टीकायाम्। तथापि वक्ति ईश्वरस्यैवानभ्युपगमादिति, तत्तस्य दुराग्रह-मात्रम्। मीमांसादर्शनस्यमूलं हृदयञ्चान्वेषणीयम्। कथमत्रेश्वरप्रतिपादनं न कृतम्। मीमांसादर्शनञ्चेश्वरं मनुते, इत्यत्र या प्रक्रिया तदन्यत्र निरूपितम्। न मीमांसादर्शनमीश्वरविरोधि। अत्रानपेक्षितत्वान्नोच्यते।

वैयाकरणमतमिव मीमांसकमतेऽपि शब्दार्थयोरिव सम्बन्धस्याप्यनादित्वं कण्ठरवोक्तं वर्त्तते। सूत्रकारो जैमिनिः पञ्चमे सूत्रे प्रथमेऽध्याये कथयति-शब्द-स्यार्थेन सह सम्बन्ध औत्पत्तिक इति। तथा च सूत्रम्—'औत्पत्तिकस्तु शब्दस्यार्थेन

सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुलब्धे प्रमाणं बादरायणस्यानपेक्षितत्वात्' इति। अर्थात् शब्दार्थयोः परस्परं यः सम्बन्धः, स औत्पत्तिकइति। औत्पत्तिकशब्दो नित्यपर्यायवाची। सिद्धशब्दस्य नित्यपर्यायवाचित्ववत्। यथा तत्रोक्तं यत् सिद्धशब्दो नित्यपर्याय इति व्याख्यास्यामस्तथैवात्रापि भाष्यकारेणोक्तम्—औत्पत्तिक इति नित्यं ब्रूमः। अतोऽत्रौत्पत्तिकशब्दो नित्यार्थवचनः। परस्परं पृथक्-पृथक् शब्दार्थयोः भवति जन्म। तदनन्तरञ्चोभयोः जायते सम्बन्ध इति न। अपि तु उभयोः सम्बन्ध औत्पत्तिक एव। अतएवोक्तं भाष्यकारेण—'औत्पत्तिकः शब्दस्यार्थेन सह सम्बन्ध' इति। एवमेव चित्राक्षेपभाष्येऽपि। औत्पत्तिकस्तु शब्दस्यार्थेन सह सम्बन्धस्तस्य ज्ञानमित्याद्युक्तम्। पुनश्च 'अपौरुषेयः शब्दस्यार्थेन सम्बन्ध' इत्यपि। तथा च चित्राक्षेपभाष्ये एव महता प्रघट्टकेन 'तस्मान्न चोदनालक्षणोऽर्थो धर्मं' इति पूर्वपक्षमभिधाय सिद्धान्तितं तत्रैव 'तस्माच्चोदनालक्षण एव धर्मं' इति। अनेनेदं स्पष्टीभवति यच्छब्दार्थयोः सम्बन्ध औत्पत्तिक एव। यद्युच्यते, पूर्वन्तावच्छब्दस्यार्थेन सह स्यात्सम्बन्धस्ततएवापौरुषेयता वा तस्य पौरुषेयता वेति विचारः सङ्गच्छते, परन्तु शब्दार्थयोः सम्बन्ध एव न प्रतीयते। यतो हि क्षुरशब्दस्योच्चारणाव्यवहितोत्तरमेव जिह्वापाटनं स्यात्। एवमेव मोदकशब्दोच्चारणसमवहितमेव मुखपूरणं सम्भाव्येत, परन्तु तथा न भवति। केवलं सम्बन्धलक्षणसम्बन्धमभिप्रेत्यापि नैवं वक्तुं शक्यते, शब्दार्थयोः कार्यकारणनिमित्तिनैमित्तिकाश्रयाश्रयिभावादिसम्बन्धानामनुपपन्नत्वादिति। तदपि न। शब्दार्थयोः पूर्वोक्तानां सम्बन्धानामभावेऽपि प्रत्याय्यप्रत्यायकयोः संज्ञासंज्ञिलक्षणसम्बन्धस्य विद्यमानत्वात्। शब्दः प्रत्यायको भवति, अर्थश्च प्रत्याय्य इति। न च शब्दस्य प्रत्यायकत्वे प्रथमशब्दश्रवणसमनन्तरमेवार्थप्रत्ययो भवेत्, किन्तु कथन्न भवति तथेति वाच्यम्। प्रत्यायकत्वे प्रत्ययस्य नियामकत्वात्। प्रथमश्रवणस्य च नियामकत्वाभावात्। यदि प्रथमशब्दश्रवणेऽपि न भवति प्रत्ययस्तदा संज्ञासंज्ञिभावावधारणं यावच्छ्रवणमावश्यकम्। ततश्च श्रुतार्थावगमो भवेदेव। न च प्रथमशब्दश्रवणसमनन्तरज्ञानाभावे शब्दार्थयोः सम्बन्धस्यानित्यत्वं स्यात्। शब्दश्रवणानन्तरमर्थेन सह योजयति कश्चित् सम्बन्धस्ततश्च जायते ज्ञानमिति। अपि शब्दार्थयोः सामानाधिकरण्यमपि न पश्यामः। घटादिशब्दाः मुखे भवन्ति। घटाद्यर्थाश्च भूमौ समुपलभ्यन्ते। अतश्चोभयोः सामानाधिकरण्याभावात् सम्बन्धाभावोऽपि प्रतीयन्ते। एवमेवोभयोः रूपभेदोऽप्यवगम्यते। यथा—गौरितिशब्दस्योच्चारणं भवति, सास्नादिमतः गोपिण्डस्य ज्ञानं जायते। उभयोश्च स्वरूपपार्थक्यं स्पष्टमेव। पृथग्भूतयोश्च सम्बन्धोऽनित्यो भवति। यथा रज्जुघटयोः। उभयोः स्वरूपपार्थक्येन सम्बन्धोऽप्यनिप्य एवेति। यदोभयोः कश्चित् पुरुषः सम्बध्नाति, तत एव तेन रज्जुसम्बद्धेन घटेन जलाहरणादिकं कार्यं सम्पद्यते, तथैवात्रापि शब्देन सहार्थस्य सम्बन्धं कश्चिद् योजयति, ततोऽर्थप्रत्ययो भवति। तस्माच्छब्दार्थयोः सम्बन्धः कृतक एवेति। एवमेव वेदेऽपि बोद्धव्यः। तन्न।

शब्दार्थयोः सम्बन्धस्यापौरुषेयत्वात् प्रत्याय्यप्रत्यायकलक्षणसम्बन्धस्य सिद्धत्वात्। रज्जुघटयोः सम्बन्धस्य कर्त्ता कश्चित्पुरुषो दृश्यते। न तथा शब्दार्थयोः सम्बन्धस्य कर्त्ता कश्चित् पुरुषोऽवगम्यते। अतः सम्बन्धकर्त्तुः पुरुषस्याभावाच्छब्दार्थयोः सम्बन्धस्य नित्यत्वमेव स्वीकर्त्तव्यम्। कथं सम्बन्धकर्त्तुः पुरुषस्याभाव इति चेत्? प्रत्यक्षाभावादिति ब्रूमः। न तत्र प्रत्यक्षं प्रमाणमुपलभामहे। न केनापि पुरुषेण प्रत्यक्षीकृतम्। मा भवेत्प्रत्यक्षं प्रमाणम्। अनुमानादिकन्तु भवितुमर्हतीति चेत्, न। प्रत्यक्षपूर्वकत्वादनुमानादीनाम्। अनुमाने व्याप्तिज्ञानमावश्यकम्। तच्च प्रथमं महानसादौ प्रत्यक्षेणैव समुत्पद्यते। शाब्दज्ञानेऽपि पूर्वं वृद्धव्यवहारादीनां प्रत्यक्षमेव भवति। उपमानेऽपि गवये गोसादृश्यस्य ज्ञानं प्रत्यक्षेणैव जायते। अर्थापत्तावपि उपपादकस्य ज्ञानं प्रत्यक्षात्मकमेव। तेनैवोपपाद्य ज्ञानम्। 'भूतले घटो नास्ति' इत्यादावपि भूतलाधिकरणकाभावस्य प्रत्यक्षमेव भवति। एवं सर्वेषां प्रमाणानां प्रत्यक्षपूर्वकत्वात् प्रत्यक्षस्य च तत्र प्रक्रमाभावान्न किमपि प्रमाणं तत्र प्रक्रमते। तस्मात्पुरुषस्य सम्बद्धुरभावाच्छब्दार्थयोः सम्बन्धस्यापौरुषेयत्वम्। यद्युच्येत शब्दार्थयोः सम्बन्धस्य चिरकालवृत्तत्वादिदानीन्तनाः जनाः न स्मरन्तीति। तदपि न विचारसहम्। चिरवृत्तत्वेऽपि स्मरणस्य दृष्टत्वात्। चिरवृत्तः सन्न स्मर्यंत इति वक्तुं न शक्यते। कूपारामादिवत्स्मरणाभावोऽपि नोपपद्यते। तत्र तद्देशस्यविनाशेन तत्कुलस्य वा विनाशेन स्मरणाभावो वक्तुं शक्यते। न शब्दव्यवहारस्याभावो भवति कदाचित्। अतो व्यवहर्त्तुः पुरुषस्यभावाभावाच्छब्दस्य तदर्थस्य तयोश्च सम्बन्धस्य नित्यत्वमेव सेत्स्यति। ननु ये जनाः सम्बन्धमात्रव्यवहर्त्तारो भवन्ति, तेषां कृते शब्दार्थसम्बन्धकर्त्तुः स्मरणं निष्प्रयोजनं भवति। 'प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते' इति कौमारिलेन न्यायेन तेषां प्रति जायतेऽनादरभावः। अनादरभावाच्च स्मरणाभावः स्वाभाविक एव। तस्माद्विस्मरणमुपपद्यते इति चेत्, सत्यम्। यदि सम्बन्धः कृतकः स्यात्। कश्चित् सम्बन्धविधाता पुरुषः शब्दार्थयोः सम्बन्धं विधाय व्यवहारं कुर्वीत, तदैवं वक्तुं शक्यते। न तथा शब्दार्थसम्बन्धविषये वर्त्तते। अन्यथा शब्दव्यवहारकाले कर्त्तः स्मरणमवश्यमेव स्यादिति। न भवति तथा। तस्माच्छब्दार्थयोः नित्य एव सम्बन्ध इति। उदाहरणं यथा—ये खलु जनाः पाणिनिशास्त्रं न जानन्ति तेषां वृद्धिशब्देन 'आदैचां' न भवति बोधः, न च वृद्धिशब्देन 'आदैच्विषयकं वा व्यवहारं कुर्वन्ति, परन्तु ये पाणिनीयाः सन्ति, ते तथैव व्यवहरन्ति, पाणिनिञ्च स्मरन्त्यपि। तथैव ये पुरुषाः पिङ्गलशास्त्रं न जानन्ति, ते खलु मकारेण गुरुत्रिकं नावगच्छन्ति, न च मकारेण गुरुत्रिकं वा व्यवहरन्ति, किन्तु ये जना तज्ज्ञास्तेतु मकारेण सर्वगुरूणां व्यवहारं सम्पादयन्ति, पिङ्गलमपि स्मरन्ति। अत्रोभयत्र सम्बन्धस्य कर्त्तुः स्मरणं भवति, तत्कृत व्यवहारमपि स्मरन्ति। न तथा शब्दार्थसम्बन्धविषयेऽवगच्छामो वयम्। शब्दव्यवहारप्रसङ्गे न तत्सम्बन्धस्य कर्त्तुः स्मरणं जायते। तस्माच्छब्दार्थसम्बन्धस्य नित्यत्वमेव मन्तव्यम्।

अपि च ये खलु 'वृद्धिरादैच्' इति सूत्रं वृद्धिसंज्ञासम्पादकं न स्मरन्ति, ते वृद्धसंज्ञाविधायकस्य 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इति सूत्रस्य ज्ञानमपि न सम्पादयितुं शक्नुवन्ति। अतः कश्चित् पुरुषः शब्दार्थयोः सम्बन्धं कृत्वा व्यवहार-सम्पादनार्थं वेदानां कृतवान् प्रणयनमिति न कदापि वक्तुं शक्यते। तस्मादपि सम्बन्धस्य नित्यत्वमवगच्छामः। यदि कदाचित् येन केन प्रकारेण विस्मरण-मुपपादयितुमपि शक्येत तथापि प्रमाणं विना सम्बन्धकर्त्तारं न प्रतिपद्येमहि। विद्यमानस्य तूपलम्भनं कदाचिद् भवत्येव। नोपलभ्यते तस्मान्नास्ति। यद्यपि शशविषाणस्य बौद्धार्थज्ञानं भवति तथापि प्रत्यक्षप्रमाणबाधात् न तद्विषयकं ज्ञानं प्रामाणिकं भवितुमर्हति। अतएव 'तस्मादपौरुषेयः शब्दस्यार्थेन सम्बन्ध' इति भाष्यकारीयं वचनं सङ्गच्छते।

भवतु नाम प्रत्यक्षादीनामप्रसरः। अर्थापत्तिस्तु तत्र प्रसरति। उपपाद्यज्ञाने-नोपपादककल्पनमर्थापत्तिः। अत्रोपपाद्यज्ञानमर्थज्ञानम्। उपपादकञ्च सम्बन्ध-कर्तृज्ञानम्। यस्य शब्दस्य येनार्थेन सह केनचित् पुरुषेण सम्पादितः सम्बन्धः, तेन शब्देन तस्यार्थस्य जायते ज्ञानम्। यस्य च शब्दस्य न केनाप्यर्थेन सम्बन्धः कृतः केनचिदपि पुरुषेण, तेन शब्देन नार्थज्ञानं भवति। यदि स्वीक्रियेत तेनपि शब्देनार्थ-ज्ञानं भवतीति तर्हि प्रथमशब्दश्रवणसमनन्तरमेवार्थज्ञानं भवेत्, परन्तु न भवति तथा। तस्माज्ज्ञायते यदस्ति कश्चित् शब्दार्थसम्बन्धस्य कर्त्तेति। तदपि न सम्यक्। सिद्धस्यापि वस्तुनो भवत्युपदेशः। आपेक्षिकस्याकाशादेरपि दृश्यते उप-देशः। अत्यन्तसिद्धस्यापि ब्रह्मणोऽपिभवत्येवोपदेशः। नैतावता वक्तुं शक्यते, तस्यापि कश्चित् कर्त्ता स्यादिति। अतएवोक्तम्—'सिद्धवदुपदेशात्' इति। अपि च यदि सम्बन्धकर्त्तुरभावादर्थज्ञानं न भवेत्तथान्य उपायोऽपि न वर्त्तेत तर्हि अर्थापत्त्या सम्बन्धकर्त्तारमवश्यमेव कञ्चित् पुरुषं स्वीकुर्यात्, परन्तु नात्र तथा। अन्योपाय-स्यापि विद्यमानत्वात्। कोऽन्य उपाय इति चेत, वृद्धव्यवहारमेवोपायत्वेन स्वीकुर्मः। तथाहि—कश्चिदुत्तमवृद्धः मध्यमवृद्धमुद्दिश्य स्वव्यवहारसिद्धयर्थं 'गामानय' इति वक्ति। तद्वचनं श्रुत्वा मध्यमः पुरुष गवानयने प्रवर्त्तते। पुनश्च वक्ति 'गां नय' इति। मध्यमवृद्ध गां नयति। तत्रैव बालोऽपि तिष्ठन् सर्वं शृणोति पश्यति च। नयनानयनयोः भेदेऽपि 'गो' इत्येकमेव पदमुभयत्र वर्त्तते। अतो बालः जानाति यद् गोशब्दस्यायमेव सास्नादिविशिष्टं पिण्डमेवार्थः ततश्च सोऽपि गोशब्देन तमेव पिण्डमवबुध्यते व्यवहरति च। यदैते वृद्धाः आसन् तदाऽन्येभ्यो वृद्धेभ्यस्तेऽप्यन्येभ्य इत्यनादिपरम्पराप्राप्तत्वादद्यावधि प्रवर्त्तते व्यवहारः। तस्मा-दर्थापत्त्या सम्बन्धकर्तृकल्पनं नोचितम्। अपि चैकस्य शब्दस्य नैकेनार्थेनैव-भवति सम्बन्धः। तत्रानेकसम्बन्धकर्तृकल्पनमेवावश्यकं भवेत्। तस्मान्नायं पक्षः समीचीनः। वृद्धव्यवहारस्य विद्यमानत्वेऽर्थापत्त्या सम्बन्धकर्तृकल्पनमतीव दूरा-पास्तम्। अपि च व्यवहारवादिनये प्रत्यक्षस्य प्रामाण्यम्, इतरेषां मतेऽर्थापत्त्या

सम्बन्धकर्त्तृकल्पनम् । प्रत्यक्षप्रतिपक्षिकल्पना न साधीयसी भवति । तस्मात् सम्बन्धकर्त्तुरभावः सिद्ध्यति । अपि च शब्दार्थव्यभिचाराभावादपि सम्बन्धकर्त्तुरभावः । यथैकत्र सास्नादिमति पिण्डविशेषे गोशब्दव्यवहारस्तथान्यत्र सर्वत्र गोपिण्डविशेषे एव गोशब्दप्रयोगः । नानयोरवलोक्यते व्यभिचारः कुत्रापि । सम्बन्धस्य कृतकत्वेऽनेके सम्बन्धारो भवेयुः । अनेकदेशस्थे गोशब्दे एक एव कर्त्ता सम्बन्धकरणे नालम् । तस्मात्सम्बन्धस्य कर्त्ता कश्चिन्नास्तीति । अतएवोक्तं सूत्रकारेण—'अव्यतिरेकश्चार्थेऽनुपलब्धे' इत्यादि । भाष्यकारोऽपि वक्ति—'अतो नास्ति सम्बन्धस्य कर्त्ते'ति ।

'अव्यतिरेकश्च' इति सूत्रांशस्यापरापि व्याख्या भाष्यकारेणोपस्थापिता । अयमाशयः—नैतादृशः कश्चित्कालोऽस्ति आसीद् वा यत्र शब्दानां केनचिदर्थेन सम्बन्ध एव नासीत् । न सम्बन्धव्यतिरिक्तः कश्चिद् कालः । सम्बन्धक्रियाया अनुपपत्त्या एवं कल्पनमावश्यकम् । कथन्तर्हि सम्बन्धक्रियानुपपन्नेति चेत् । उच्यते—यदि कश्चित्पुरुषः शब्देन सहार्थस्य सम्बन्धं चिकीर्षति तदा कञ्चिच्छब्दार्थसम्बन्धमवलोक्यैव करिष्यति । तस्य च शब्दस्यार्थेन सह कः सम्बन्धं कृतवान् इति भवति जिज्ञासा । यदि तस्यापि सम्बन्धो येन केनापि कृत इति स्वीक्रियते चेर्त्तर्हि तत्पूर्वस्य सम्बन्धः केन कृत इति । एवं तस्यापि केनचित्तस्यापि केनचिदित्येवं प्रकारेण स्वग्रहसापेक्षग्रहसापेक्षग्रहसापेक्षग्रहकत्वरूपानवस्था प्रसज्येत् । तस्मादप्यनादिपरम्पराप्राप्तिर्भवेत् । अतोऽपि सम्बन्धस्यानादित्वसिद्धिः । अथवा अकृतसम्बन्धानां केषाञ्चिच्छब्दानां कैश्चिदप्यर्थैः सह सम्बन्धं तत्प्राक्तनकालीनवृद्धव्यवहारं दृष्ट्वैव कृतवान् । एवं स्वीक्रियमाणे सति वृद्धव्यवहारस्यैवानादिपरम्परायाः नियामकत्वादर्थापत्त्या सम्बन्धकर्त्तृकल्पनं न कथमपि सम्भवम् । अतोऽत्रार्थापत्त्या सम्बन्धकल्पनमनावश्यकम् । तस्मादपौरुषेयः शब्दस्यार्थेन सम्बन्ध इति ।

अपि च अप्रसिद्धसम्बन्धाः बालाः वृद्धव्यवहाररूपप्रत्यक्षप्रमाणेनैव सम्बन्धस्य ज्ञानमर्जयन्ति । तेनैव च ज्ञानप्राप्ताः भवन्ति । पुनश्च सम्बन्धकर्त्तुः ज्ञानं नैवावश्यकम् । अर्थात् प्रमाणशिरोमणिना प्रत्यक्षेणैव सिद्धस्य सम्बन्धस्य पुनरर्थापत्त्या कल्पने वैषम्यं स्यादिति भावः । अपि च कञ्चिद्विशेषमधिकृत्यैव तद्विशेषज्ञानाय च संज्ञाः क्रियन्ते । व्यावृत्तिर्व्यवहारो वा संज्ञायाः प्रयोजनमितिन्यायात् । यस्य संज्ञा क्रियमाणा वर्त्तते, तस्यानुपलब्ध्या संज्ञाकरणमेवानर्थकं निष्प्रयोजनं स्यात् । तथा संज्ञाकरणमशक्यमपि स्यात् । पूर्वन्तावत् पुत्रोत्पत्तिर्भवति । तदनन्तरमेव नामकरणं भवति । पुत्र एव न स्याद्यदि तर्हि नामकरणमनर्थकमशक्यञ्च भवति, तथैवात्रापि वोध्यम् । तद्विशेषज्ञानाभावे उभयमप्यशक्यम् । अतएवोक्तं भगवता सूत्रकारेण—'अर्थेऽनुपलब्धे' इति । तस्मदपौरुषेयः शब्दस्यार्थेन सम्बन्ध इति । अनेनैव च प्रकारेण धर्मे चोदनायाः प्रामाण्यमपि

सिद्धयति। उक्तञ्च 'तत्प्रमाणमनपेक्षत्वात्' इति। नात्र पुरुषान्तरस्य ज्ञानान्तरस्य वाऽपेक्षा भवति। इतरानपेक्षत्वाच्चोदनालक्षणोऽर्थो धर्मः, नान्यलक्षण इति। एवमेव शास्त्रदीपिकाकारेणाप्युक्तम्—तेषामयमाशयः—शब्दार्थयोः प्रत्याय्य-प्रत्यायकत्वलक्षण एव वर्त्तते सम्बन्धः। एतदतिरिक्तसम्बन्धाभावात् स्वभाव-वशादेव शब्दो प्रत्यायको भविष्यति, अर्थश्च प्रत्याय्य इति। चक्षुरादीन्द्रियप्रत्यक्षे सन्निकर्षादीनां तथानुमानादिप्रत्यक्ष व्याप्त्यादिज्ञानस्य च भवत्यपेक्षा, परन्त्वत्रे-तरानपेक्षमेवार्थप्रतिपादनं भवति। इदमेव चाभिधानशब्देनोच्यते। इदमेव च संज्ञासंज्ञिलक्षणः सम्बन्ध इति। शब्दोच्चारणाव्यवहितोत्तरं जायमानमर्थज्ञानमेव शब्दस्यार्थप्रतिपादने प्रमाणम्। उक्तमपि—'न हि शब्दस्यार्थेन संयोगतादात्म्यादि-सम्बन्धः, किन्तु प्रत्यायकत्वमि'ति। सम्बन्धस्य कृतकत्वे 'सर्वेषां शब्दानां सम्बन्ध-करणमशक्यम्' इति शब्दनित्यत्वप्रतिपादनावसरेऽपि प्रतिपादितम्। तस्मान्न शब्दार्थसम्बन्धस्य कृतकत्वमपि त्वपौरुषेयः शब्दार्थयोः सम्बन्ध इति।

भाट्टदीपिकाकारोऽपि कथयति यत् शब्दार्थयोरिव सम्बन्धस्याप्यनादित्वेन पौरुषेयत्वाभावात् सिद्धयति चोदनायाः प्रामाण्यम्। अतः पदपदार्थसम्बन्धस्य पुरुषाधीनत्वात् सम्बन्धसापेक्षञ्च वेदवाक्यार्थज्ञानमिति वक्तुं न शक्यते। यद्यपि स्वरूपतो वाक्यार्थज्ञानं प्रति सम्बन्धस्य कारणता न सिद्धयति तथापि व्याकरणादि-शास्त्रमिव क्वचिदाप्तपुरुषस्याप्युपयोगमात्रेण न सर्वत्रानाश्वासो युक्त इति। तस्मात्सम्बन्धस्यानादित्वेन चोदनायाः प्रामाण्यं सिद्धत्येवेति। 'औत्पत्तिकस्तु' इति सूत्रार्थयोजनावसरे रङ्गनाथीयायां वृत्तावपि सम्बन्धस्यानादित्वं प्रतिपादितं वर्त्तते। तथाहि—तदीयो ग्रन्थः—शब्दस्य वाचकस्यार्थेन वाच्येन सह सम्बन्धः वाच्यवाचकभावरूपः औत्पत्तिकस्तु स्वाभाविक एव, न सङ्केताधीनः। उपदेशः आप्तोपदेशः, तस्य तादृशसम्बन्धस्य ज्ञानं ज्ञानसाधनम्। आप्तोपदेशः न तादृश-सम्बन्धस्य कारकोऽपि तु ज्ञापक एवेति भावः। अनपेक्षत्वात्। अप्रामाण्यशङ्काहेतु-भूतस्य सङ्केतयितृपुरुषादिसापेक्षत्वस्याप्यभावात्। अनेन ग्रन्थेनापि सम्बन्धस्या-नादित्वमेव सिद्धयति। एवमेव यदि सम्बन्धस्यानादित्वं न स्वीक्रियेत चेत्तर्हि-यत्कालावच्छेदेन शब्दो न केनाप्यर्थेनासीत् सम्बद्धस्तत्कालावच्छेदेन कथं किं वा दृष्ट्वा सम्बन्धं क्रियेत। यदि कश्चित् शब्दार्थयोः सम्बन्धं चिकीर्षति तदा पूर्व-प्रयुक्तं वाक्यग्रहणमवश्यमेव कर्त्तव्यं स्यात्। यथा गोशब्दः सास्नादिमत्यर्थे सम्बद्ध इति। एवं स्वीक्रियमाणेऽपि पुनः पूर्ववदनवस्थाप्रसङ्गः स्यात्। यदि गोशब्देन सह सास्नादिमतोऽर्थस्य सम्बन्ध एव न स्यात्तर्हि तदर्थप्रतिपादनाय तच्छब्दस्योच्चारण-मपि सङ्गतं स्यात्। शब्दस्य तदर्थप्रतिपादकत्वाभावात्। ये बालाः शब्दार्थसम्बन्धं न जानन्ति तेऽपि वृद्धेभ्यः शब्दार्थसम्बन्धज्ञानं कुर्वन्ति। तत्रापि वृद्धाः बालेभ्यः न सम्बन्धमुपदिशन्ति, अपि तु स्वव्यवहारसम्पादनार्थं शब्दानां कुर्वन्ति प्रयोगम्। तत्रस्थो बालः आवापोद्वापाभ्यां वाऽन्वयव्यतिरेकाभ्यां वाऽर्थनिर्णयं करोति। तत्

एवं च गवादिशब्दस्यानेनार्थेनास्ति सम्बन्ध इति सम्बन्धनिश्चयमपि करोति। अनेन च प्रकारेण वृद्धव्यवहारादेव शब्दानां तदर्थानां तयोश्च सम्बन्धानां भवति करोति ज्ञानम्। वृद्धव्यवहारश्चानादिरिति पूर्वमप्युक्तम्। तस्मात्प्रत्याय्यप्रत्यायकत्वलक्षणः सम्बन्धः शब्दानां सिद्ध्यति। तस्मान्न पौरुषेयः सम्बन्धः शब्दार्थयोरिति। सिद्धान्तचन्द्रिकायामप्युक्तम्—'अपौरुषेयः शब्दस्यार्थेन सम्बन्ध' इति। प्रत्यक्षा हि व्यवहर्त्तारः। कतरमश्च सम्बन्धकर्त्ता। क्लृप्तकल्प्ययोः क्लृप्तस्यैव बलवत्त्वमिति। तस्मादपि शब्दार्थयोः सम्बन्धोऽपौरुषेयः। वृद्धव्यवहाराच्च कथमवगतिर्भवतीति सिद्धान्तचन्द्रिकागूढार्थविवरणे सम्यक् विचारितम्। तेषामयमाशयः—वृद्धव्यवहारात्त्रेधा भवति ज्ञानम्। तत्र प्रथमन्तावत् वृद्धाः 'अस्माच्छब्दादममर्थो बोद्धव्य' इत्युपदिशन्ति। अनेन शब्दार्थयोर्बोध्यबोधकभावो ज्ञायते। द्वितीयञ्च वाच्यवाचकभावोरूपेणोपदेशः। यथा—अयं शब्दोऽस्यार्थस्य वाचकः, अयमर्थश्चास्यशब्दस्य वाच्य इति। तृतीयञ्चोत्तमवृद्धः मध्यमवृद्धमुद्दिश्य समीहितसाधनायोच्चारिताच्छब्दादर्थक्रियां दृष्ट्वानुमानेन वाच्यवाचकभावं निश्चिनोति। एषा च प्रक्रिया पूर्वमुक्ता। सर्वत्र सहकार्यपेक्षानुग्राहिका भवति। श्लोकवार्त्तिकेऽपि श्रीमताभट्टपादेन 'अथ सम्बन्धः कः' इति प्रश्नभाष्यमुपक्षिप्य शब्दार्थसम्बन्धस्यापौरुषेयत्वं प्रतिपिपादयिषया भूमिका आरचिता। यद्यपि शब्दार्थयोः नित्यत्वप्रतिपादनावसरे संज्ञासंज्ञिलक्षणः सम्बन्धोऽपि प्रतिपादितः। तस्यैव दृढीकरणाय पुनराक्षिप्य विचारयति। शब्दार्थयोः सम्बन्धजिज्ञासायां यदि कश्चित् कथयति यत् शब्दे उच्चार्यमाणे येन सम्बन्धेन शब्दादर्थप्रतीतिर्जायते स एव सम्बन्ध इति। तर्हि नेदं समीचीनमुत्तरम्। वचनेनानेन तत्स्वरूपप्रतिपादनाभावात्। तथा चोक्तम्—स्वरूपाकथनाच्चैतदुत्तरं नोपपद्यते। इति। उदाहरणं यथा—कश्चित्पृच्छति—ज्वरस्य किमौषधम्? उत्तरञ्च ददाति—येन ज्वरो नश्यति, तदेवौषधमिति। अनेन किमुक्तं भवति? न किमपि। कुतः? औषधस्वरूपप्रतिपादनाभावात्। स्वरूपप्रतिपादनाभावात् कस्य वस्तुनः सेवनं पानं वा करिष्यति ज्वरग्रस्तः। नात्र निश्चायकं किमपि प्रमाणं प्रक्रमते, तस्मात्स्वरूपप्रतिपादनमावश्यकमितिभावः। संज्ञासंज्ञिलक्षणः सम्बन्धः यः प्रतिपादितः, न स विचारसहः, अनुभवप्रमाणविरुद्धत्वात्। शब्देह्युच्चार्णमाणे पूर्वं सम्बन्धस्य प्रतीतिर्जायते। अयञ्च शब्दोऽनेनार्थेन सम्बद्धः। अयञ्चार्थोऽनेन शब्देन सम्बद्ध इति। तदनन्तरञ्चेयमस्य संज्ञा, अयञ्च संज्ञीति भवति ज्ञानम्। ततश्चोभयोः संज्ञासंज्ञिनोः सम्बन्धज्ञानं जायते विशेषेण। अतः सम्बन्धनिष्ठप्रत्याय्यत्वनिरूपितं संज्ञात्वनिष्ठप्रत्यायकत्वं न सम्भवम्। तत्त्वन्यत्रैव कुत्रचिद् भवेत्। अतएव संज्ञासंज्ञिभावस्य बोधजनकतायामङ्गत्वं निवारयति। तथा चोक्तम्—

यः संज्ञासंज्ञिसम्बन्धः स प्रतीत्युत्तरो यतः।
सा चान्यपूर्विका तस्मान्नास्य प्रत्यायनाङ्गता॥

व्याख्यातञ्च, न्यायरत्नाकरे पार्थसारथिमिश्रण—सम्बन्धग्रहणपूर्विका हि प्रतोतिः। संज्ञात्वन्तु प्रतीत्युत्तरकालभावि न प्रतीत्यङ्गमिति। तथा च कुत्रचिद् संज्ञात्वज्ञानाभावेऽपि सम्बन्धान्तरेणार्थज्ञानं सम्पद्यते। तत्र संज्ञात्वस्य बोधे नानुपयोग इति। कश्चिच्च न कदापि संज्ञात्वं बुध्यते तथापि बोधस्तु जायत एव। भवतु नामोच्चारितशब्दनिष्ठसंज्ञात्वं विनापि बोधस्तथापि भिन्न एव कश्चित्-सम्बन्धस्त्वस्त्येवेति कथं सम्वन्धाभावः। शब्दज्ञानसमनन्तरमेवार्थज्ञानं जायते। तस्माद्द्वैतयोः शब्दार्थयोः कश्चिदविनाभावरूपः सम्बन्धः परिकल्प्यते। अविनाभावाद्विना वस्त्वन्तरविषयके ज्ञाने जाते वस्त्वन्तरस्य प्रतीतिः भवितुं नार्हति। तथा चोक्तम्—

तमेवान्योऽविनाभावमत्र सम्बन्धमिच्छति।
न हि तस्माद्विना शब्दे ज्ञाते स्यादर्थबोधनम्॥

तदेतत्सर्वमुपपाद्य समाधत्ते—अविनाभावरूपस्य सम्वन्धस्य प्रतिपादनं भाष्ये न क्वाप्यवलोक्यते। न्यायरत्नाकरेऽपि—न हि भाष्येऽविनाभावकीर्त्तनमस्ति। अविनाभावरूपा संज्ञा लोकव्यवहारादेव प्रतीयते। इयमस्यसंज्ञेति विकल्प्य न परिगृह्यते तथापि वृद्धव्यवहाराद् गमकत्वापरपर्यायं बोधकत्वन्तु प्रतीयत एव। तथा चोक्तम्—

प्रयुक्तश्चाविनाभावसंज्ञा लोकात्तु गम्यते।
संज्ञेत्यवगम्यमानेऽपि गमकत्वं प्रतीयते॥

अत्रेव न्यायरत्नाकरः गमकत्वमेव चेन्द्रियादिविलक्षणं संज्ञात्वमिति संज्ञात्वमेवावगतं भवति। अतः संज्ञैव प्रतीत्यङ्गमिति नापरितोषः, इत्यादि। बोधकत्वमेवगमकत्वमिति पक्षस्य समर्थनाय किन्नाम गमकत्वमिति पर्यनुयोगं कृत्वा विकल्प्य च विचारितं सिद्धान्तचन्द्रिकायाम्—वाचकत्वं गमकत्वञ्च नापरपर्यायः। धूमादेरपि वाचकत्वप्रसङ्गात्। धूमोऽग्नेः गमको भवति न वाचकः। अर्थसादृश्ये गमकत्वमपि न वाचकत्वम्। प्रतिबिम्बस्यापि वाचकत्वप्रसङ्गात्। तत्रापि भवति सादृश्यम्। आत्माध्यासेनापि गमकत्वं वक्तुं न शक्यते। अध्यासस्य विखण्डितत्वात्। आत्माभेदेन भवतु गमकत्वम्, तदपि न। अभेदे गम्यगमकभावानुपपत्तेः। गम्यगमकत्वञ्च भेदे एवोपद्यते। रूपत्रयादिरहितत्वमपि गमकत्वं वक्तुं न शक्यते। चक्षुरादेरपि वाचकत्वप्रसङ्गात्। तर्हि किन्नाम वाचकत्वमिति चेच्छृणु—अभिधानस्यैव वाचकत्वात्। अभिधायकञ्च बोधकमेव भवति। उभयोरपरपर्यायत्वात्। अन्यानपेक्षत्वेन यदर्थप्रतिपादकता सैवाभिधायकता। अयं भावः—यथा चक्षुरादीन्द्रियाणि घटपटादिपदार्थबोधनाय सन्निकर्षमपेक्षन्ते। लिङ्गादिज्ञानञ्च वह्न्यादिबोधनाय व्याप्तिज्ञानमपेक्षते। नात्र तथा। सन्निकर्षाद्यनपेक्षमेव यदर्थप्रति-

पादनम्। इदमेवाभिन्नमित्युच्यते। अयमेवास्यविशेषः। अर्थात् अर्थप्रतिपत्तिफलकः शब्दव्यापारोऽभिधानक्रिया। तस्याञ्च प्रतिपत्त्याख्यफलशालितया यदर्थस्य कर्मत्वं तद्वाच्यत्वम्, शब्दस्य च विवक्षावशेन यत्कर्त्तृत्वं करणत्वं वा तद्वाचकत्वम्। एतदेव च भाष्ये "संज्ञासंज्ञिलक्षणसम्बन्धोऽयमि"त्यादिनोक्तम्। अस्तु।

यद्यपि स्फोटनिरूपणप्रसङ्गे शब्दार्थयोरुभयोः सम्बन्धस्य परिचर्चा सञ्जाता। पुनश्च तस्य नित्यत्वानित्यत्वविचारायात्र विचारारम्भ इति। अतो विषयभेदात् पुनश्च विचारो नासङ्गतो नापि द्विरुक्त इति। तथा चोक्तं वार्त्तिककारेण—

**तस्मात्स एव शब्दार्थचिन्ताव्यवहितोऽधुना।**
**नित्यानित्यविचारार्थं सम्बन्धः स्मार्यते पुनः॥**

'यच्छब्दे विज्ञातेऽर्थो विज्ञायते' इति भाष्ये यदुक्तं तदपि शब्दनिष्ठार्थप्रतिपादकताशक्तिप्रतिपादनायैव। अर्थादर्थनिष्ठवाच्यतानिरूपितवाचकताश्रयश्शब्द इति। पक्षमिमं वार्त्तिककारोऽपि समर्थयति—'यच्छब्दे ज्ञाते इत्येव शक्तिरेवात्र कीर्त्यते' इत्यादिना। प्रतिपादकता शक्तिः च कर्त्तृत्वरूपा करणत्वरूपा वा यार्थाभिधानक्रियां प्रति वर्त्तते, तदेव शक्तिरिति। तस्यैव गमकत्वात्। अतएव न्यायरत्नाकरेप्युक्तम्—'सम्बन्धश्च ज्ञाप्यज्ञापकमेव' इति। सम्बन्धस्य कृतकत्वं पूर्वपक्षत्वेनोपपाद्य निराकृत्य च वाच्यवाचकयोः शब्दार्थयोः परस्परं यः सम्बन्धस्तस्य नित्यत्वं युक्तिप्रमाणाभ्यां प्रस्तौति। तथाहि—सम्बन्धो यदि कृतकस्तर्हि प्रतिमर्त्यं प्रत्युच्चारणं कश्चित्सम्बध्नाति उत सर्गादौ केनचिदेकेन सम्बन्धो विहितः। न तावत्प्रथमः। प्रतिमर्त्यं प्रत्युच्चारणमेव वा सम्बन्धकल्पना स्यात्तर्हि कृतकत्वमेव न सिद्ध्येत्, बहुभिः जनैरेकनिष्ठाक्रियाकारणासम्भवात्। भेदपक्षश्चेत्स्वीक्रियेत तर्हि ज्ञानेऽपि भेदः प्रसज्येत। तस्मान्न प्रथमः पक्षः क्षोदक्षमः। अपि च भेदपक्षे प्रतिसम्बन्धं शक्तिकल्पना कर्त्तव्या स्यात्। तत्राप्येकस्मिन् ज्ञातशक्तौ सत्यामपि नान्यस्यार्थबोधसम्भावना कर्त्तुं शक्या। यद्युच्येत विभिन्नेनापि वक्त्रा प्रयुक्तेऽपि स्वसम्बन्धमनुसृत्यैव बोद्धा बुध्यत इति। तदपि न। विभिन्नैः पुरुषैः विभिन्नविषयमधिकृत्य विभिन्नार्थविषयकाः सम्बन्धाः क्रियन्ते। तत्र च कथं स्वज्ञातसम्बन्धानुसारमर्थबोधकल्पना कर्त्तुं शक्या। अपि च 'एकार्थास्तु विकल्पेरन्' इति न्याये नैकशब्दविषयका अप्यनेके सम्बन्धाः विकल्पेन गृह्येरन्नित्यपि न। यत्रानेकसम्बन्धविषयकाः शब्दाः दृश्यन्ते तत्रैकस्य पक्षस्य बाधोऽपि समवलोक्यते। यथा-पीलुशब्दस्यार्थैः वृक्षरूपार्थेन क्रियते सम्बन्धः। म्लेच्छैश्च हस्तिरूपपरवर्थेन सम्पाद्यते सम्बन्धः। तत्र यद्यपि वैकल्पिको विद्यते सम्बन्धस्तथापि म्लेच्छजनकृतसम्बन्धस्यात्यन्तबाधपरिकल्पना भवत्येव। वृक्षरूपस्यैवार्थस्य प्रतीतिः प्रामाणिकीति परिकल्प्यते। बाधाभावे वैकल्पिकी च व्यवस्थास्वीक्रियमाणे कदाचित्

वृक्षरूपार्थप्रतीतिः, कदाचिच्च हस्तिरूपस्याप्यर्थस्य प्रतीतिः स्यादेवेति । तस्मान्म्लेच्छसम्बन्धस्य भवति बाध एव । उभयार्थनिष्ठजन्यतानिरूपितजनकताश्रयः पीलुशब्द इति समुच्चयपक्षोऽपि न विचारितरमणीयः । कालभेदेनोभयार्थस्य प्रतीतिसम्भवात् । परन्तु नायं पक्षः समीचीनः । शास्त्रविरुद्धत्वात् । शास्त्रञ्चार्थप्रसिद्धेरेव गरीयस्त्वं समर्थयति । अपि च यद्युच्येत सम्बन्धानामनेकत्वेऽपि तेषु कमप्येकं सम्बन्धं स्वीकृत्य स्याद् व्यवहार इति । तदपि न । गमकत्वाभावात् । यदि सम्बन्धो नित्यस्तर्हि आप्तानाप्तत्वविभागोपयुज्यते । बहुभिः जनैः स्वयमपूर्वसम्बन्धे कृते कथमाप्तत्वनिर्णयः । ततश्च नियमेन न कस्याप्येकस्माप्यर्थस्य प्रत्यायकत्वं भवेत् । एवमेव शब्दार्थयोरभेदपक्षेऽपि बहुपुरुषकृते सम्बन्धे स्वीक्रियमाणे व्यवहारकालेऽयं वा सम्बन्धः उपादेयोऽयं वेति निर्णयाभावात् बाध्येत व्यवहारः । न दृश्यते लोकव्यवहारेऽयं विमर्शः । अतएव विकल्पपक्षोऽपि न युक्तः । गोशब्दे सकृदुच्चार्यमाणे विभिन्नेषु बोद्धृषु कश्चिद् बुध्येत, इतरे च नेति ।

यद्युच्येतैकपुरुषगामित्वेनैकार्थत्वाद्विकल्पो भवितुमर्हति, परन्तु विभिन्नपुरुषगामित्वात्तत्सम्बन्धज्ञानतत्कार्यभेदाच्चसमुच्चयपक्ष एव साधीयानिति । तन्न । 'वक्त्रैक्यादसम्भवात्' इति वार्त्तिकग्रन्थस्य जागरुकत्वात् । वक्ता तावद् यं कमप्येकमेव सम्बन्धं हृदि निधाय प्रयुङ्क्ते शब्दम्, परन्तु श्रोता शब्दार्थयोरनुगुण एव सम्बन्धं शृणोति अवगच्छति च । ये खलु तत्सम्बन्धज्ञानविरहितास्ते कथं प्रतिपद्येरन्निति । तथा च यदि शब्दोच्चारयितृनिष्ठोद्देश्यता भिन्ना श्रोतृनिष्ठोद्देश्यता च भिन्ना, तर्हि वाच्यवाचकभाव एव तयोर्न प्रसिद्ध्येत । व्यवहारोऽपि च न सेत्स्यति । अतएवोक्तं वार्त्तिककारपादेन—

**वक्तुरन्यो हि सम्बन्धी बुद्धौ श्रोतुस्तथापरः ।**

अतएव च प्रतिव्यक्तिसम्बन्धकरणमपि खण्डितम् । तथाहि—

**श्रोतुः कर्त्तुं च सम्बन्धं वक्ता कं प्रतिपद्यताम् ।**<br>
**पूर्वदृष्टो हि यस्तेन श्रोतुर्नैव करोति तम् ।**<br>
**यं करोति नवं सोऽपि न दृष्टः प्रतिपादकः ।।**

यद्युच्येत येन केनापि नित्येनानित्येन वा सम्बन्धेन श्रोतुरर्थप्रतीतिः स्यात्तर्हि विकल्पस्य किं प्रयोजनमिति । तदपि न । प्रेक्षापूर्वकारी भवति सम्बन्धकर्त्ता । स चाज्ञातसामर्थ्यमभिनवं सम्बन्धं न करोति । नापि पूर्वसिद्धं सम्बन्धं करोति, पूर्वसिद्धस्य कृतिविषयत्वाभावात् । सिद्धसाधनत्वाच्च । घटादावप्येवमेव स्यादित्यपि न । तद्गतसामान्यस्य प्रसिद्धया व्यवहारसिद्धिः न चानयनादिसामान्ये न संघटत इति वाच्यम् । तदुपलक्षितव्यक्तौ तादृशव्यवहारस्य संघटितत्वात् । एतत्सर्वमभिप्रेत्य विवृतं भट्टपादेन—

यद्यपि ज्ञातसामर्थ्या व्यक्तिः कर्त्तुं न शक्यते।
क्रियते या न तस्याश्च शक्तिः कार्येऽवधारिता॥
तथाप्याकृतितः सिद्धा शक्तिरुत्पादनादिषु॥ इत्यादि।

आकृतिश्चानादिः। सम्बन्धश्चादिमान् भवति। यदि तत्रापि नित्यं सामान्यं स्वीक्रियेत चेत्तर्हि नास्मत्पक्षहानिः। तथा चोक्तम—'तथाप्यसमन्मतं सिद्धम्' इति। व्याख्यातञ्च न्यायरत्नाकरे—सामान्यमेव हि सर्वत्राव्यभिचाराच्छब्दार्थाव-गमोपायः स्यात्। तच्चापौरुषेयमिति सिद्धं नः समीहितम्। तथापि द्वयाकार-सम्भवाभावात् सम्बन्धविषये नायं पक्षोऽङ्गीकरोमि। अस्माकं पक्षे शब्दार्थयोः वाच्यवाचकभावसम्बन्ध एव तद्गतशक्तिरपीति। शक्तिसम्बन्धयोर्नास्ति कश्चन भेदः। अयं विशेषोऽन्यमतापेक्षयास्य मतस्य। तथा चोक्तं भट्टपादेन—

'शक्तिरेव हि सम्बन्धो भेदश्चास्या न विद्यते'। इति।

कथमुभयोर्भेदाभाव इति चेदुच्यते—तत्तत्कार्यानुमेया सा शक्तिर्भवति। तद्भेदादेव तत्रानुवर्त्तते भेदः। अतएवोक्तम्—

सा हि कार्यानुमेयत्वात्तद्भेदमनुवर्त्तते।

बोधकतारूपां शक्ति विना नार्थबोधोपपत्तिः। शब्दोच्चारणाव्यवहितोत्तरक्षणा-वच्छेदेन जायते बोधः। अतएव च तत्र शक्तिसद्भावकल्पना भवति। तथा चैकमेव शक्यार्थबोधे सिद्धे सति नानेकशक्तिकल्पना आवश्यकी। गोशब्दादीनामुच्चारणे तथा सम्बन्धाख्यानकाले केचित्तावत्सम्बन्धज्ञानपूर्वकमर्थज्ञानं कुर्वन्ति। केचिच्च सम्बन्धज्ञानपूर्वकमर्थज्ञानं सम्पादयन्ति यदि सम्बन्धस्य सत्तैव न स्वीक्रियते तर्हि केषाञ्चिदपि सम्बन्धज्ञानपूर्वकमर्थज्ञानं नोपपद्येत। तस्मात्सम्बन्धस्य सत्ता स्वीकार्यैव तथा च तस्याः नित्यत्वमेकत्वञ्च समुचितमेव। भेदज्ञानञ्च कार्यभेदा-दिति पूर्वमुक्तमेव। सम्बन्धस्य विद्यमानत्वेऽपि न समानरूपेण सर्वेषां बोधः। केषाञ्चिदगृहीतशक्तिकत्वात्। सम्बन्धस्य विद्यमानत्वेऽप्यगृहीतशक्तिकस्य पुरुष-स्यार्थप्रकाशकता न युक्ता। यतो हि ज्ञापकस्य ज्ञात्रपेक्षा भवत्येव। सम्बन्धोऽपि स्वात्मज्ञानमपेक्षते। अन्यथा बोधानुपपत्तेः। ज्ञातत्वमज्ञातत्वं वा पुरुषसापेक्षं भवति। पुरुषभेदान्न ज्ञातत्वाज्ञातत्वयोर्विरोधः। एवं पुरुषगतं ज्ञानं तदिरपुरुषगतेन ज्ञानेन न विरुणद्धि। एवमेवाज्ञानमपि पुरुषभेदान्न विरुध्यते। तथा चोक्तमपि—

ज्ञानं हि पुरुषाधारं तद्भेदान्न विरोत्स्यते।
पुरुषान्तरसंस्थञ्च नाज्ञानं तेन बाध्यते॥

बाध्यबाधकभावाय सामानाधिकरण्ये सति विरोधः आवश्यकः। यथा कुत्र-चिदेकोऽन्धस्तिष्ठति, तत्रैव चैकोऽनन्धोऽपि वर्त्तते। तत्रैव च शुक्लगुणविशिष्टं

किञ्चिद्वस्तु विद्यते। तद्वस्तु अनन्धेन प्रत्यक्षीक्रियतेऽन्धेन च न प्रत्यक्षीक्रियते। अर्थात् व्यक्तिभेदाद्वस्तुनः सदसत्त्वं भवति। तथापि वस्तुनिष्ठमसत्त्वं न भवति। तथैवात्रापि पुरुषसापेक्षं सत्त्वमसत्त्वं वा भवति तथापि वस्तुनि असत्त्वं वक्तुं न शक्यते । तदुक्तम्—'अन्धानन्धसमीपस्थः' इत्यादि । कैश्चिदग्रहणादसत्त्वमेव स्वीक्रियतामिति वचनं नोचितम्। यतो ह्यसतो वस्तुनः ग्रहणं निर्हेतुकं स्यात्। विद्यमानस्यापि पदार्थस्याग्रहणं भवति कुत्रचिद्। यथा चेन्द्रियस्य चक्षुरादेः तत्त-द्विषयग्रहणयोग्यतावलोक्यते। अतोऽन्धस्य चक्षुर्हीनत्वान्न भवति विषयग्रहणम्, तथैवात्रापि व्यवहारोपलम्भनमेव तत्सत्त्वे कारणम्। येषां तदस्ति तेषां भवति वस्तुग्रहणम्, येषाञ्च नास्ति तेषां वस्तुग्रहणमपि न भवति, अन्धवत्। ये खलु सम्बन्धानभिज्ञाः भवन्ति तेषामपि पूर्वपूर्वप्रसिद्धचा सम्बन्धज्ञानं जायत एव। एवं रीत्या अनादिपरम्परया सम्बन्धस्य नित्यत्वं प्रसिद्धचति। न सम्बन्धस्यादिमत्त्वं वक्तुं शक्यते। सम्बन्धविषयेऽयं विशेषः—प्रत्युच्चारणं सम्बन्धस्य भवति निवृत्तिः। पुनश्चोच्चारणे जायते प्रवृत्तिरिति। अर्थात् यदा यदा शब्दानां क्रियते उच्चारणम्, तदा तदा शब्दार्थयोरिव सम्बन्धस्याप्युपस्थितिर्भवति। अतएव शब्दस्य चेनार्थेन साकं भवति सम्बन्धस्तस्यैवार्थस्य प्रतीतिर्भवति। अयञ्चपक्षः भाष्ये वार्त्तिके वर्त्तते उपस्थापितः। भाष्ये यथा—'नैकेनोच्चारणप्रयत्नेन स्वार्थसम्बन्धः संव्यव-हारश्च शक्यते कर्त्तुम्' इति। वार्त्तिके च यथा—

**सर्वेषामनभिज्ञानां पूर्वपूर्वप्रसिद्धितः।**
**सिद्ध सम्बन्ध इत्येवं सम्बन्धादिर्न विद्यते ।।**

अनेन प्रकारेण पक्षो निराकृतः। शिष्यते जगदादिपक्षः। सोऽपि नैव समीचीनः। तत्रापि भाष्यकारेण पूर्वमेवोक्तम्—'केनापि पुरुषेण शब्दानामर्थैः सह सम्बन्धं कृत्वा संव्यवहारार्थं वेदाः प्रणीताः'। इत्यादिना पूर्वपक्षयित्वा पुनश्च 'अपौरुषेय-त्वात्सम्बन्धस्य सिद्धम्' इत्यादि--वचनेन समाहितम्। महाप्रलयानङ्गीकारात् सृष्टिरेव न युज्यते। कथं सृष्टचादौ केनचिदुपदिष्ट इति कल्पना संघटेत। तस्मात्-सम्बन्धस्यानादित्वं सिद्धमेव। एतत्सर्वं वार्त्तिके महता प्रघट्टकेन निरूपितम्। एतावता सिद्धमिदं भवति यन्नप्रत्यक्षेण प्रमाणेन सम्बन्धस्यादित्वं प्रसाधयितुमलं कश्चिदिति। तथा चोक्तम्—

**प्रत्यक्षादावुपक्षीणे योऽनुमानेन डित्थवत्।**
**सम्बन्धित्वान्नियोक्तारं गवादावपि कल्पयेत्।।**

तदनन्तरमनुमानप्रमाणेनापि साधयितुं न शक्यत इत्येतदर्थमनुमानप्रमाणमुपस्थाप्य तत्साध्यता सम्बन्धस्य निराकरोति। तथाहि—अयं डित्थः डवित्थपुत्रत्वात्। 'दशमेऽहनि पिता नाम कुर्यात्' इति न्यायेन डित्थोत्पत्यनन्तरं डवित्थेन तन्नाम-

कृतम् । 'अयं डित्थ' इति । पूर्वं डित्थशब्दस्य तेन पुत्रेण सह नासीत् कश्चन सम्बन्धः । तज्जन्मानन्तरं डवित्थकृतोऽयं सम्बन्ध इति निश्चितम् । स एव नियोक्ता तयोः सम्बन्धस्य । एवमेव गोशब्दादावपि नियोक्ता कल्पनीयः । गोशब्दस्य गोरूपार्थेन सह सम्बन्धस्य कर्त्ता कश्चन विद्यत एव । परन्तु नायं पक्षो विचारसहः । गवादिशब्दानां तदर्थेन सह यः सम्बन्धस्तस्य न विद्यते कश्चित्कर्त्ता । ज्ञानन्तु अस्मदादिव्यवहारेणैव जायते । 'गामानय' 'गां नय' इत्याद्युच्चार्यमाणे देवदत्तेन यज्ञदत्तः सास्नादिमन्तमर्थमानयति नयति वा । नयनानयनयोः क्रियाभेदेऽपि न तत्र पदार्थे भेदः । अतएव निश्चिनोति बालोऽस्यशब्दस्यानेनार्थेन सह विद्यते कश्चन सम्बन्धः । अनेन च प्रकारेण शब्दार्थयोः सम्बन्धोऽपि गृहीतो भवति । तस्मान्न नियोक्तुः परिकल्पनमुचितमिति । पुनश्चास्यानुमानेन साधने सति सिद्धसाधनापत्तिर्दुर्वारा । न चैवमेव यज्ञदत्तादिपुत्रे देवदत्तादावपि सम्बन्धस्यानादिता परिकल्पनीयेति वाच्यम् । दृष्टप्रयोगस्य बलीयस्त्वात् । प्रत्यक्षेणानुमानस्य बाधात् । अयं भावः—देवदत्तजन्मानन्तरमेव यज्ञदत्तः तस्येदं नामाकरोत् । तेनैव च नाम्ना प्रचलति सर्वेषां व्यवहारः । अतः सर्वेषां प्रत्यक्षत्वान्नानादित्वं सम्भवम् । सम्बन्धविषये न्यायरत्नाकरेऽन्यथापि सिद्धसाधनत्वमुपपादितम् । तथाहि—देवदत्तादावपि शक्तिर्नित्यैव वर्त्तते । केवलन्तु तत्तत्प्रयोगस्यानित्यत्वम् । साम्प्रतिकजनव्यवहारविषयत्वात् । तस्य चानित्यत्वे शक्तावप्यनित्यत्वभ्रान्तिर्भवत्येव । इदमेव चानित्यत्वभ्रान्तौ विद्यते कारणम् । परमार्थतस्तु देवदत्तादावपि शक्तिर्नित्यैवेति वेदितव्यम् । अतोऽपि सिद्धसाधनता बोद्धव्या । प्रभाकरादिमतेऽपिशक्तेर्नित्यत्वमेव वर्त्तते । नियोगमात्रस्यानित्यत्वम् । तेनैव च शक्तावपि समुत्पद्यते भ्रमः । गवादिषु नियोगस्यानादित्वेन न भ्रमयोगः । अनादित्वञ्चानादिव्यवहारादेव सिद्ध्यति । येन येनापि पुरुषेण यत्र यत्र सम्बन्धो गृहीतस्तेन तेनापि तत्र तत्र पूर्वप्रयोक्तृनिष्ठसम्बन्धग्रहणदर्शनादेव । अनेनापि प्रकारेण सम्बन्धस्यानादित्वं सिद्ध्यति । अतवएवोक्तम्--

> यो यो गृहीतः सर्वस्मात् पूर्वं सम्बन्धदर्शनात् ।
> सिद्धः सम्बन्ध इत्येवं सम्बन्धादिर्न विद्यते ।। इत्यादि ।

यद्याप्तप्रणीतः पदपदार्थसम्बन्धः । तेनैव च वेदवाक्यानि विरचय्य धर्माधर्मबोधनाय वेदानां कृतं प्रणयनम् । एवं सति वेदवाक्यैः सह तस्य सम्बन्धकर्त्तुरपि स्मरणमवश्यमेव भवेत्, परन्तु वेदवाक्यादर्थज्ञानं कुर्वाणाः न स्मरन्ति सम्बन्धविधातारम् । अतोऽप्याप्तप्रणीतत्वाच्छब्दानां तदर्थानां तद्गतसम्बन्धानाञ्च प्रामाण्यं न स्वीकर्त्तव्यम् । अत्रैव च विषये दृष्टान्तरूपेण भाषितं भाष्यकारेण । 'न हि विस्मृते 'वृद्धिरादैच्' इति सूत्रस्य कर्त्तरि 'वृद्धिर्यस्याचामादिस्तद्वृद्धम्' इति किञ्चित्प्रतिपद्यते । अर्थात् शक्तिव्यवहारयोरेककर्त्तृकत्वे यथात्रोभयोः कर्त्तृत्व-

स्मरणमावश्यकम्, तथैवात्रापि सम्बन्धकर्त्तुः स्मरणमवश्यमेव भवेदित्यर्थः। यस्मान्नैवं भवति तस्मान्न पदपदार्थसम्बन्धानां कश्चित्कर्त्ता स्यादिति। यद्यपि सूत्रयोरेतयोरर्थज्ञानकाले न भवति पाणिनेः स्मरणम्, तथापि आदैचि वृद्धिसंज्ञा-कर्त्तृत्वेनादिभूतेऽऽदैचिवृद्धपरिभाषया व्यवहर्त्तृत्वेन च पाणिनेः स्मरणं भवत्येव। न चैवं 'सास्नादिमती गौः' इति शक्तिबोधकं किमपि प्रमाणं दृश्यते। सर्वेषां शब्दानां तदर्थानां तद्गतसम्बन्धानाञ्च शक्तिबोधकवाक्यकर्त्तृत्वमपि न सम्भवति। एवमपि यथाकथञ्चित् केनाप्युपदिष्टेन पाणिनिस्मरणाभावेऽपि तत्-संज्ञापरिभाषार्थज्ञानं सम्पद्येत तथापि धर्माय शब्दनियमः इत्यादि यदुक्तं तन्न तत्स्मरणाभावे समुपपद्येत। तथा चोक्तम्—

दृष्टार्थव्यवहारत्वाद् वृद्धयादौ सम्भवेदपि।
धर्माय नियमोऽत्रापि न विना पाणिनेर्भवेत्॥

अपि चाद्यतनेभ्यो गवादिशब्देभ्योऽन्येशब्दाः प्रागासन्। सम्बन्धकर्त्तृभिः तत्रैव सम्बन्धाः कृताः। तमनुसृत्यैवात्र काले प्रवर्त्तमानेषु गवादिशब्देषु सम्बन्धानुस्मरण-पूर्वकं जायते व्यवहार इत्यपि न। तत्र प्रमाणाभावात्। एतेभ्यः शब्देभ्योऽतिरिक्तः कश्चनसीत् शब्द इत्यत्र न किञ्चिदपि प्रमाणं पश्यामः। तस्माद्युक्तिप्रमाण-विरहितत्वान्नायं पक्षोऽपि विचारसहः। सम्प्रति प्रयुक्तानां गवादिशब्दानां व्यवहारे न किमपि वैशिष्टयं समवलोकयामः। 'इमे प्रसिद्धसम्बन्धाः शब्दाः, नेमे' इति। तस्माच्छब्दतदर्थतद्गतसम्बन्धानाञ्चानादित्वमेव युक्तिप्रमाणसिद्धम्। एतत्सर्वं शब्दाधिकरणाकृत्यधिकरणादौ स्पष्टं निरूपितं भट्टपादेन। तस्मात्-सम्बन्धानादित्वं वैदिकानां गवादीनाम्, न तु तद्विकृतिभूतानां गाव्यादीनामद्यत-नीयानाञ्च देवदत्तादिशब्दानाम्। अतएवोपसंहृतम्—'अतो वेदे सम्बन्धादिर्न विद्यते' इति।

अपि चाप्रसिद्धार्थैः शब्दैः सह सम्बन्धप्रतिपादनाय सम्बन्धकारस्य न भवत्युपायः। अपि तु शब्दार्थयोः प्रसिद्धयोरेव सम्बन्धप्रतिपादनाय वाक्यरचना सम्भवति। शब्दार्थयोः प्रसिद्धत्वात्सम्बन्धस्यापि प्रसिद्धिः स्यादेव। सम्बन्धं विना तयोरर्थप्रतिपादनाभावात्। पौनः पुन्येन वृद्धव्यवहार एवोपायभूतः सम्बन्धग्रहणे। व्यवहारस्य चानादित्वात्सम्बन्धस्याप्यनादित्वं सुस्पष्टमेव न च सम्बन्धाभावेऽपि हस्तादिसङ्केतेनार्थज्ञानं जायेतेति वाच्यम्। प्रसिद्धसम्बन्धानामेव शब्दानां हस्तादि-सङ्केतेनार्थप्रतिपादकत्वात्। सर्गादौ च व्यवहर्त्तृणामभावात्सम्बन्धादीनाञ्चा-प्रसिद्धत्वाद्धस्तचेष्टादयो नोपपद्यन्ते। ततश्च नार्थज्ञानं सम्भवति शब्दशब्दार्थ-तद्गतसम्बन्धज्ञानं विना। न चात्र वृद्धव्यवहारेण सम्बन्धग्रहणे प्रमाणाभावः। प्रमाणत्रयस्य विद्यमानत्वात्। तथाहि—वृद्धव्यवहाराच्छब्दानामर्थप्रतिपादकत्वं प्रत्यक्षेणैव प्रमाणेन ज्ञातं भवति। श्रोतुश्च तदर्थज्ञानमनुमानेन चेष्टया वा जायते।

शब्दार्थद्वयाश्रितां सम्बन्धानतिरिक्तां वाच्यवाचकभावरूपां शक्तिञ्चान्यथा-नुपपत्तिरूपार्थापत्त्या समुत्पद्यते। अतः प्रमाणात्रयाधीनमेव वाक्यार्थज्ञानमिति। तथा चोक्तं वार्त्तिके भट्टपादेन—

शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति।
श्रोतुश्च प्रतिपन्नत्वमनुमानेन चेष्टया॥
अन्यथानुपपत्त्या च बुध्येच्छक्ति द्वयाश्रिताम्।
अर्थापत्त्यावबुध्यन्ते सम्बन्धं त्रिप्रमाणकम्॥

न्यायरत्नाकरे चोपसंहृतम्—'तदेवमकृत्रिमः शब्दार्थयोः संज्ञासंज्ञिलक्षणः सम्बन्धः' इति। तस्मात्संज्ञासंज्ञिलक्षणस्य सम्बन्धस्यानादित्वं मन्तव्यमिति शम्।

# तंत्रालोक के अनुसार शुद्धि-अशुद्धि, विधि-निषेध एवं शास्त्र-प्रामाण्य

डॉ० (श्रीमती) कमला द्विवेदी

किसी भी लौकिक वस्तु एवं व्यवहार के शुद्ध अथवा अशुद्ध होने तथा शुद्धि-अशुद्धि के कारण विधेय और निषिद्ध होने के विषय में तीन मत हैं : प्रथम मत मुक्ति के प्रसंग में कुछ विशिष्ट क्रियाओं का विधान करता है, दूसरा मत उसका सर्वथा निषेध करता है तथा इन दोनों मतों से भिन्न तीसरा मत है जो अपने अनुयायियों को सब प्रकार से विधि-निषेध से परे रहने का उपदेश देता है। विधि को स्वीकार करने वाला प्रथम मत क्रमदर्शन का है जिसमें मुक्ति को क्रमिक माना गया है। निषेध का उपदेश देने वाला दूसरा मत कुल-दर्शन का है जो आत्मानभूति में किसी भी क्रम को नहीं मानता है। विधि और निषेध से परे रहने का उपदेश देने वाला तीसरा मत प्रत्यभिज्ञा-दर्शन का है। सत्तर्कों पर आधारित होने तथा समन्वय की दृष्टि को पूर्णता प्रदान करने के कारण उपर्युक्त मतों में तीसरा मत ही तात्त्विक दृष्टि से सर्वश्रेष्ठ है।

शुद्धि और अशुद्धि का विचार एवं व्यवहार एक संकुचित दृष्टिकोण है। इसका कारण वस्तु नहीं, अपितु प्रमाता है। यदि शुद्धता को वस्तु का धर्म माना जाता है तो उसे सदा शुद्ध ही रहना चाहिये और जब वस्तु स्वभावतः शुद्ध है तो उसके बारे में अशुद्धि के निवारण का प्रश्न ही नहीं उठता। दूसरी ओर यदि वस्तु का धर्म अशुद्धता का है तो उसे सदा अशुद्ध हो रहना चाहिये। क्योंकि स्वभावतः अशुद्ध वस्तु को किसी भी संस्कार से शुद्ध नहीं किया जा सकता।[1]

वस्तुओं को शुद्ध अथवा अशुद्ध मानने पर तीन दोष उत्पन्न होंगे। पृथ्वी को जल से और जल को पृथ्वी से शुद्ध मानने पर अन्योन्याश्रयता का दोष उत्पन्न होगा। अशुद्ध पृथ्वी आदि को अशुद्ध जल से शुद्धि मानने पर व्यर्थता का दोष उत्पन्न होगा क्योंकि दोनों ही समान रूप से अशुद्ध हैं। और यदि पृथ्वी को जल से, जल को वायु से, वायु को तेज से, तेज को आकाश आदि से शुद्ध मानते हैं तो अनवस्था दोष होगा। अतः वास्तव में किसी भी वस्तु को शुद्ध अथवा अशुद्ध नहीं कहा जा सकता है।[2]

---

१. प्रमाता हि व्यवस्यति इदं शुद्धमिदमशुद्धमिति

२. द्रष्टव्य—तन्त्रालोक, ४.२१३-२५

पृथ्वी आदि तत्त्वों में भी मन्त्रों की भाँति ही शिवात्मकता होने पर एक को अशुद्ध और दूसरे को शुद्ध मानने में क्या औचित्य है ? इस शंका का समाधान यह है कि मन्त्रों में मनन एवं त्राण धर्म होता है और उसकी उसी रूप में अनुभूति होती है किन्तु पृथ्वी आदि में ये धर्म नहीं होते हैं। इसलिए मन्त्र पृथ्वी आदि से विलक्षण हैं। वस्तुतः पृथ्वी आदि सभी भाव पदार्थ शुद्ध हैं। किन्तु उन्हें अपनी शुद्धता का परिज्ञान नहीं होता। उनकी शुद्धता का परिज्ञान योगियों को होता है।[1] शुद्धि और अशुद्धि के विचार को उचित मानने वाले आचार्य कहते हैं कि न केवल लोक-व्यवहार में यह भेद विद्यमान है अपितु धर्मशास्त्र स्वयं कुछ वस्तु एवं व्यवहार को शुद्ध तथा कुछ को अशुद्ध मानते हैं। अतः शुद्धि-अशुद्धि के विचार को उपर्युक्त तीन दोषों के उल्लेख द्वारा उपेक्षित करना उचित नहीं है। इस शंका के निवारण में उत्तरपक्ष का कहना है कि शास्त्र तो दोनों ही तथ्यों के लिए प्रमाण है। एक ओर उनमें शुद्धि-अशुद्धि के विचार का समर्थन मिलता है तो दूसरी ओर सभी वस्तुओं की शिवात्मकता का। अतः शुद्धि-अशुद्धि का यह प्रश्न वेद एवं आगम के प्रामाण्य के प्रश्न से जुड़ा है।

उपर्युक्त विवेचन के आधार पर यह कहा जा सकता है कि शुद्धि और अशुद्धि का विचार एवं भेद दृष्टि तर्कसंगत नहीं है। शैवमतानुसार पारमार्थिक रूप में इस भेददृष्टि का कोई औचित्य नहीं है फिर भी इस बिन्दु के अनिवार्य विवेचन में यह कहा जा सकता है कि जो वस्तु संविद् के निकट है अथवा तदात्म है वह शुद्ध है तथा जो उससे दूर अथवा उसके स्वभाव से पतित है वह अशुद्ध है। दूसरे शब्दों में संविद् से भेद एवं अभेद के आधार पर अथवा उसके स्वभाव की तद्रूपता एवं अतद्रूपता के आधार पर ही शुद्धि और अशुद्धि का विभाजन मानना उचित है। साथ ही यह भी ध्यातव्य है कि इस विभाजन का मूल-आधार वस्तुस्वभाव न होकर प्रमातृधर्म है। अर्थात् स्वयं वस्तु अपने आप में शुद्ध अथवा अशुद्ध नहीं होती बल्कि प्रमाता अपने संस्कार, ज्ञान के स्तरादि के भेदानुसार वस्तु को शुद्ध अथवा अशुद्ध रूप में देखता है। ऋषियों ने भी इसी नियमानुसार शुद्धि-अशुद्धि का विभाजन करते हुए लोक व्यवहार का निर्वाह किया था। वे शास्त्रों द्वारा निन्दित एवं लोक-विरुद्ध गोमांस का भक्षण संविद् से एकात्मता के आधार पर, उसे शुद्ध मानते हुए करते थे। उन्हीं ऋषियों ने साधारण लोगों के लिए मांस-भक्षण का निषेध केवल इसलिए किया है कि सामान्यजन उससे एकात्मता की अनुभूति किये बिना उसका उपभोग न करें।[2]

वैदिक मतानुयायी आगमों को अप्रामाणिक मानते हैं क्योंकि वे वेद-बाह्य हैं। दूसरी ओर आगम मतानुयायी वेदों को अप्रामाणिक मानते हैं क्योंकि वे आगम-

१. द्रष्टव्य—तन्त्रालोक, ४.२२८ २. द्रष्टव्य—तन्त्रालोक, ४.२४८-४४

बाह्य हैं। वैदिक कथनों से निश्चित ही आगम-वचनों का अनेकत्र विरोध है—इस पर आगम मतानुयायी कहते हैं कि जहाँ तक विरोध का प्रश्न है केवल इसी आधार पर किसी शास्त्र को अप्रामाणिक नहीं कहा जा सकता क्योंकि स्वयं वेद में भी एक स्थान पर कही गई बात का दूसरे स्थान पर कही गई बात से विरोध मिलता है। जैसे कि सामान्य नियम के रूप में हिंसा का निषेध किया जाता है तथा अन्यत्र अपवाद रूप में हिंसा का समर्थन। वास्तवं में किसी विधि का बाध दो प्रकार का होता है—कहीं समान-कार्यकारिता के कारण और कहीं विरोध के कारण। प्रथम का उदाहरण है—'चमसेनाप: प्रणयेत्' इसमें चमसी का सामान्य विधान किया गया है। इसका बाध 'गोदोहनेन पशुकामस्य प्रणयेत्' के द्वारा होता है। दूसरे का उदाहरण है—'अष्टाश्रिर्यूपो भवति'। इसमें यूप के अष्टाश्रि होने का सामान्य विधान है, किन्तु इसका बाध 'बाजपेयस्य चतुरश्र:' की अपवाद विधि में प्राप्त होता है। इस प्रकार जब सामान्य विधि का विशिष्ट विषय में अपवाद होना स्वयं वैदिक मानते हैं तब आगमोक्त विधि के द्वारा वैदिक विधि का अपवाद क्यों नहीं माना जा सकता।

मीमांसा दर्शन में अर्थवाद विधि-वाक्यों के अंग बनकर ही प्रमाण माने जाते, हैं उदाहरण के लिए 'बर्हिषि रजतं न देयम्' इस विधि-वाक्य का अंगभूत अर्थवाद वाक्य है 'सोऽरोदीद्यदरोदीत् तद्रुद्रस्य रुद्रत्वम्'। परन्तु शैवदर्शन में शैवागम का प्रत्येक वाक्य स्वतंत्र रूप से प्रमाण है, वह किसी का अङ्ग नहीं है। इस मत में अर्थवाद की न केवल स्वतंत्रता अपितु परतन्त्रता भी सत्य अर्थात् निरर्थक नहीं है। जैसे पद का अङ्ग होने पर भी परस्पर सन्निधि के कारण वर्णों की निरर्थकता नहीं मानी जाती। 'गज' पद में 'ग' एवं 'ज' इन दोनों की सन्निधि से बनने वाला 'गज' पद भी निरर्थक हो जायेगा, जबकि 'गज' पद सार्थक है। इस तरह अवयवों के निरर्थक होने पर अवयवी को भी निरर्थक मानना पड़ेगा। अर्थवाद विधि का अंग अथवा अवयव है। अत: अर्थवाद को भी सार्थक एवं सत्य ही माना जाना चाहिये। लोक-व्यवहार भी अर्थवाद के अनुसार ही चलता है। इस प्रकार मीमांसा-दर्शन की अर्थवाद सम्बन्धी मान्यता तर्क-सम्मत प्रतीत नहीं होती।[1]

वस्तुत: इस दर्शन का दृष्टिकोण यह है कि किसी भी शास्त्र को सर्वथा मिथ्या मानना उचित नहीं है क्योंकि विज्ञानरूप परमेश्वर न केवल उनका रचयिता है अपितु वह स्वयं शास्त्रों के रूप में विद्यमान है। शिव अपनी स्वतंत्र इच्छा के द्वारा ही जिस प्रकार भात्र पदार्थों के रूप में अवस्थित है उसी प्रकार वह

१. द्रष्टव्य—तन्त्रा०, ४.२३६-२३७

शब्दात्मक शास्त्र के रूप में भी विद्यमान है।[1] तथापि शैवमतानुयायी मुमुक्षु को विविध शास्त्रों को देखकर भ्रमित नहीं होना चाहिये। शास्त्रों की यह विविधता अधिकारी-भेद के कारण है।[2] परमेश्वर ने ही वेद आदि शास्त्रों का उपदेश संकोच एवं भेद के तारतम्य से किया है।[3] अतः जिस स्तर के अधिकारी के लिए जो शास्त्र उपदिष्ट है उसको उसी का आचरण करना चाहिये। परन्तु जहाँ तक शैवसाधक का प्रश्न है उसे केवल शैवागमों का ही अनुसरण करना चाहिये।[4]

---

१. द्रष्टव्य—तन्त्रा०, ४.२३५

२. भगवता हि पृथगधिकारिभेदेन परस्परविलक्षणानि शास्त्राण्युपदिष्टानि।
तंत्रालोक विवेक, ४.२५१

३. द्रष्टव्य—तन्त्रालोक, ४.२५२-५३

४. पाशवं ज्ञानमुज्झित्वा पतिशास्त्रं समाश्रयेत्।
—तन्त्रालोक विवेक, ४.२५३ में उद्धृत

# दिक्कालौ

—डॉ० बलिराम शुक्ल:

न्यायवैशेषिकदर्शनयोः दिक्कालौ जगतो निमित्तकारणे स्तः। जगत आश्रयत्वेनापि दिक्कालयोः प्रतिपादनं कृतं न्यायवैशिषिकदार्शनिकैः। यद्यपि न्यायसूत्रेषु स्पष्टतया कालपदार्थस्य सिद्धिः नैवोपलभ्यते परन्तु त्रिकालविषयत्वेनानुमानस्य प्रत्यक्षतो वैशिष्ट्यं प्रतिपादयता महर्षिणा त्र्यैकाल्यग्रहणादित्युक्तम्। त्रिकालयुक्ता अर्था अनुमानेन गृह्यन्ते, भूता नदीपूरेण वृष्टिरनुमीयते, सैव भविष्यन्ती मेघोन्नत्या, धूमेन वर्तमानोऽग्निरिति। कालस्याभावे कस्य वर्तमानादि विभागो भवेत्। अत इदमनुमीयते यत्कालसद्भावः गौतमसम्मत इति।

एवमेव वैशेषिकदर्शनेऽपि कालस्य दिशश्च सप्रमाणत्वं स्थापितं दृश्यते "यत कालः परापर व्यतिकरयौगपद्यायौगपद्यचिरक्षिप्रप्रत्ययलिङ्गः। तेषां विषयेषु पूर्वप्रत्ययविलक्षणानामुत्पत्तौ—अन्यनिमित्तासंभवात् यदत्र निमित्तं स कालः। स गुणवत्वादनाश्रितत्वाच्च द्रव्यम्। कालद्रव्यास्वीकारे वर्तमानादिव्यवहाराः न भवितुं शक्याः। तथैव युगपदयुगपदादिव्यवहाराअपि न भवितुं शक्याः अतः एते सर्वेपि व्यवहाराः कालाधारेणैव प्रवर्तमाना दृश्यन्ते। तत्र नैयायिकानां नये अतीतादि व्यवहाराः सूर्यपरिस्पन्दादिक-विषयीकृत्यैव प्रवर्तिता भवन्ति। भिन्नयो र्वस्तुनोः पूर्वापरभावस्य निमित्तं सूर्यक्रियायाः न्यूनाधिक भाव एव।

परत्वापरत्वे द्विविधे स्तः कालिके दैशैके च। तत्र बहुतररविक्रियाविशिष्टशरीर ज्ञानात्कालिकपरत्वोत्पत्तिः तथा स्वल्पतररविक्रियाविशिष्टशरीरज्ञानादपरत्वश्चोत्पत्तिर्जायते। परन्तु प्रश्नोऽयमत्रोत्पद्यते यद् रविक्रियाविशिष्टशरीरज्ञानार्थं रविक्रियया सह शरीरस्य कश्चन सम्बन्धः स्वीकर्तव्यः नोचेत् रविक्रियाविशिष्टशरीरज्ञानं न भवितुमर्हति। रविक्रियया सह शरीरस्य संयोगसम्बन्धः न भवितुं शक्यः द्रव्ययोरेव संयोग इति नियमात्। नापि समवायः अयुतासिद्धयोरेव समवाय इति नियमात्। रविक्रिया रविवृत्तिः न शरीरवृत्तिः अत एवानयोर्न समवायसम्बन्धः। नापि च स्वरूपसम्बन्धः रविक्रियायाः शरीरभिन्नत्वेन ग्रहणात्। अतः तत्र काल एव सम्बन्धघटकः कल्पनायः सः सर्वव्यापकः नित्यश्च।

केचित्तु कालस्य प्रत्यक्षगम्यत्वमेवाङ्गीकुर्वन्ति। यथा चोक्तम्।

**कालश्चैको विभुर्नित्यः प्रविभक्तोऽपि गम्यते।**
**वर्णवत् सर्वभावेषु व्यज्यते केनचित् क्वचित्॥**

अत्र पार्थसारथिः नतु नायं कालः स्वातन्त्र्येण गम्यते ततः किमस्य सद्भावे प्रमाणम् ? अत आह सर्वेति । भावेषु गृह्यमानेषु तद्विशेषणतया केनचित्पूर्वत्वेनापरत्वेन वा गृह्यते इदं पूर्वमिदमुत्तरं इति प्रत्ययः भावमात्रमनालम्बनः वस्त्वन्तरमवस्थापयति । स एव कालः ।

नैयायिकाः अरूपस्य कालस्य प्रत्यक्षत्वं नाङ्गीकुर्वन्ति । कालस्यानुमेयत्वमेव तेषां नये । दण्डी देवदत्तः इत्यत्र देवदत्तस्वरूपातिरिक्तो विषयः दण्डः यथा स्पष्टतया भासते तथा कालः अतिरिक्तया न स्पृष्टावभासते इति कालो न प्रत्यक्षगोचरः अपितु अनुमेयः यथाचोक्तम्—

अप्रत्यक्षमात्रेण न च कालस्य नास्तिता
युक्ता पृथिव्यधोभाग चन्द्रमा परभागवत् ।

चिरक्षिप्रादि संविदः कल्पनामात्रं न चिरेणकृतं क्षिप्रकृतमिति प्रत्ययभेददर्शनात् निमित्तान्तरं स्वीकर्तव्यम् । न देवदत्तादिक्रियालम्बनाः चलतीति प्रत्ययाः परिस्पन्देऽपि चिरेण गच्छति शीघ्रं धावतीति चिरक्षिप्रादि प्रतीतिर्दृश्यते । न सूर्यादिक्रियालम्बः चलतीत्यादि प्रत्ययाः चन्द्रादिग्रहपरिच्छेदोऽपि क्रयादिप्रतीतिदर्शनात ।

चिरेणास्तं गतो भानुः शीतांशुशीघ्रमुदगतः ।
उदिताविव दृश्येते युगपद् भौमभार्गवौ ॥

नैयायिकमते काल एव स्वपरनिर्वाहकः कार्येषु युगपदादिषु निमित्तान्तरकृतः क्रमादिव्यवहारः निमित्तान्तरे निमित्तान्तरं न मृग्यमिति । तस्मादस्ति युगपदादिव्यवहार हेतु कालः सचायं आकाशवत् सर्वत्र एक एव कालः वर्तमानादिः न तात्त्विकभेदः कालस्य । व्यवहारसिद्धये केनचिदुपाधिना कल्प्यते भेदः । सूर्यपरिस्पन्दादिकमेव कालोपाधिः ।

नैयायिकैः वैशेषिकैश्च परापर व्यवहारासाधारणकारणत्वेन दिक्कालयोः सिद्धिः कृताऽस्ति । दैशिकपरत्वापरत्वाभ्यां दिशः सिद्धिर्जायते । दूरत्वसमीपत्वे दैशिकपरत्वापरत्वे भवतः । तत्रेदमनुमानम्—अवधिसापेक्षबहुतरसंयोगविशिष्टशरीरज्ञानमिदं परत्वजनकं परम्परासम्बन्धघटकसापेक्षं साक्षात्सम्बन्धाभावे सति विशिष्टज्ञानत्वात् । लोहितस्फटिक इति ज्ञानवत् ।

यथा प्रयागात् काशीतो गया परा गयातः काशी अपरा । अत्राद्ये अवधिः काशी तदपेक्षया प्रयागावधिकबहुतरसंयोगवत्वं गयायाम् । द्वितीये अवधिः गया तदपेक्षया प्रयागावधिकाल्पतरसंयोगवत्वं काश्याम् । प्रयागप्रतियोगिकबहुतरसंयोगाः गयायां न सन्ति । नवा प्रयागसंयुक्तदेशीयाः । किन्तु प्रयागावधिकाः काश्यपेक्षया बहुतरा ये मध्यवर्तिदेशसंयोगास्तद्वत्वम्, तच्च न साक्षात् किन्तु तावत्

स्वसमवायि संयुक्तत्वरूपपरम्परयेति दिक् सिद्धिः ।

भासर्वज्ञमते दिक्कालयोरीश्वरेण गतार्थत्वम् । ईश्वरस्यैवेकस्येत्थं स्वभावः येन केषांचिदुत्पत्तौ साधारणनिमित्तं भवति केषांचिदसाधारणमिति । चिर-क्षिप्रादिप्रत्ययं प्रति एवं पूर्वपरादिप्रत्ययं प्रति तस्यैवासाधारणनिमित्तत्वम् । दिक्कालयोस्तु न सर्वकार्यनिमित्तत्वेऽस्ति प्रमाणम् ।

उपाधिभेदादपि कालभेदः न भवितुं शक्यः । युगपत्कृतमित्यत्रापि उपाधि-क्रियाभेदोऽस्त्येव किमर्थं तत्र अयुगपत्कृतमिति प्रत्ययो न भवति ।

भासर्वज्ञैः कालस्य क्रियारूपत्वमपि निराकृतम् । यथाचोक्तम्—न क्रियैव-कालः तद्विशेषणत्वात् परिमाणादिवत् । एवं कालस्य क्रियाविशेषणत्वेन परिमाणा-दिवत्प्रतिभासमानादनाश्रितत्वं तस्यासिद्धम् । असिद्धत्वाच्च तस्य द्रव्यत्व-मप्यसिद्धम् ।

एवमेव दिशोऽपि द्रव्यत्वं न भवितुं शक्यम् । मूर्तद्रव्यधर्मत्वात् दिशां दीर्घत्व ह्रस्वत्वादिवत् तद्विशिष्टानां प्रत्ययानां मूर्तेष्वेव भावात् । यद्युपादानाद्यभिज्ञस्य कालस्य दिशो च जगन्निमित्तत्वमिष्टम् । तदा महेश्वर एव नामान्तरेणोक्तः स्यात् ।

नव्यनैयायिकप्रवरेण दीधितिकारेणापि दिक्कालयोर्नेश्वरादतिरिक्तत्वं स्वीकृतम् । तस्य मते तत्तत्कालोपाधि दिगुपाधिविशिष्टेश्वरादेव क्षण-दिन-प्राची-प्रतीच्यादिव्यवहारोपपत्तिः ।

तत्रान्ये नव्यनैयायिकाः ईश्वरस्य दिक्कालरूपत्वं तत्तजीवस्यवेति विनिगमना विरहात्तयोरतिरिक्तत्वमेव स्वीकुर्वन्ति जीवस्य जगज्जनकत्वं परापर-जनकत्वञ्च कल्प्यम् । ईश्वरस्य क्लृप्तमिति लाघवमिति तु न समीचीनम् सम्बन्ध-घटकयोर्दिक्कालयोः जगज्जनकत्वाकल्पनात् दिक्कालोपाधीनामेव जगज्जनकत्व-कल्पनात् इति कार्यमात्रं प्रति ईश्वरीयकृतेरेव हेतुत्वे न क्लृप्तत्वात्, कर्तः कार्य-जनकत्वे मानाभावात् न ईश्वरस्य दिक्कालरूपत्वमिति ।

यद्यपि कार्यत्वावच्छिन्नं प्रति ईश्वरस्यापि निमित्तकारणत्वं स्वीकुर्वन्ति, तथापि कालिकसम्बन्धावच्छिन्नकार्यत्वावच्छिन्नकार्यतानिरूपित अधिकरण-विधयानिमित्तकारणत्वं ईश्वरे नास्ति । अद्य घटो भविष्यति श्वो घटो भविष्यती-त्यादि प्रत्ययास्तु जायन्ते परन्तु ईश्वरे घटोभविष्यतीत्यादि प्रत्ययाः न कस्यापि जायन्ते इत्यतः इदं स्पष्टतया सिद्धं भवति यदृष्टेश्वरयोर्नाधिकरणविधया कारणत्वम् । कालत्वस्यैकव्यक्तिवृत्तित्वेन जातित्वाभावात् कालत्वस्य कालिक-सम्बन्धावच्छिन्नाधिकरणतारूपत्वमेव स्वीकार्यम् । एवं देशत्वस्यापि दैशिक-विशेषणतायाधिकरणतारूपत्वमेव वक्तव्यमित्यपि केचित् ।

अद्य घटो भविष्यति श्वपटो भविता इत्यादिप्रत्ययेन तत्तत् घटाधिकरणत्वेन कालोऽपि अस्य प्रत्ययस्य विषयो भवति। तत्तदुत्पत्त्यधिकरणत्वेनरूपेण यो व्यवहारविषयो भवति स तदुत्पत्तेर्हेतुर्भवति इति नियमः। यत्र यत्र तदुत्पत्तिहेतुत्वं तत्र तत्र तद्धेतुत्वम्। पूर्वोक्तरीत्या तत्तत्कार्यविशेषं प्रति तत्तत्कालविशेषस्य हेतुत्वं सिध्यति। सिद्धे च हेतुत्वे यद्विशेषयोः कार्यकारणभावः तत्सामान्ययोरपि इति न्यायेन कार्यमात्रं प्रति कालस्य हेतुता सिध्यति। एवमेव चत्वरे अग्निर्भविष्यति इत्यादि प्रतीत्या देशस्यापि निमित्तकारणत्वं सिद्धं भवति।

एवमेव कालविशेषनियताम्रफलादौ कालविशेषस्य कारणत्वमवश्यं स्वीकार्यम्। यद्विशेषयोः न्यायेन कार्यसामान्ये कालस्य हेतुता सिद्धिरिति।

उपाधिभेदेन कालस्य महाकालखण्डकालभेदेन द्वैविध्यं भवति। खण्डकालमादायैव क्षणादिव्यवहारो भवति। एकस्य कालस्य किञ्चिद्धर्मविशिष्टस्य क्षणत्वं किञ्चिद्धर्मविशिष्टस्य दिनत्वम् तादृशोपाधीनामेव क्षणत्वादिव्यवहारविषयत्वं नतु महाकालस्येत्यपि द्रष्टव्यम्।

"कालः सर्ववान्" इति प्रतीत्यापि सर्वाधिकरणरूपत्वेन कालः सिध्यति। विनिगमनाविरहेणाकाशदिगात्मनामस्याः प्रतीतेर्विषयत्वं न भवितुं शक्यम्।

मर्तयो समानदेशताविरोधात् देशस्यापि पृथक् सत्वमवश्यमेव स्वीकरणीयम्। अन्यथा मूर्तयोः समानदेशत्वे न कोपि विरोधस्यादिति।

वेदान्तमते कालस्य देशस्य च पृथक् सत्ता नास्ति ब्रह्मणि एवानयोः अध्यारोपो जायते। अतः कालस्तु अविद्येव तस्या एव सर्वाधारत्वात्। क्षणादिव्यवहारा अविद्याजन्या एव। पारमार्थिकतत्वं क्रमाक्रमादिरहितमेव। अविद्यैव क्रमाक्रमभावेन विवर्तते। अविद्यायां निवृत्तायां समस्तकालप्रपञ्चो विलीयते।

सांख्ययोगयोः क्षणादिव्यवहाराः न तात्त्विकाः अपितु बुद्धयाकल्पिताः अतात्विका एव। परमाणुक्रियातः उत्तरदेशसंयोगस्य काल एव क्षणपदवाच्यः। तस्यैव निरन्तरप्रवाह एव महाकालाख्यां भजते। कालस्तु न पृथक् द्रव्यं वैशेषिकादिवत्।

काश्मीरीय शैवदर्शने तु कालस्य संवित् रूपत्वमेव स्वीकृतम्। ईश्वरेच्छाऽथवा देवस्य पराशक्तिरेव कालः। अतएवोक्तम कालरूपक्रियाशक्त्या क्षीरं परिणमेद् दधि !

वैष्णवानामहिर्बुध्न्यसंहितायां भूतिशक्तेः त्रीणि कारणानि प्रतिपादितानि सन्ति प्रकृतिः पुरुषः कालश्च। कालस्तु अव्यक्तरूपाशक्तिः। सूक्ष्मरूपेण अस्य प्रद्युम्नतत्वेन सह सम्बन्धः। स्थूलरूपेण तु क्षणादिरूपेणास्य व्यावहारिकत्वं।

न्यायवैशेषिकदर्शनयोः दिक्कालौ क्रियारहितावपि जन्यानां जनकौ स्तः।

आधुनिकपाश्चात्यदर्शनेषु] कान्टप्रभृतिभिः दार्शनिकैः दिक्कालविषये स्वमतानि उपस्थापितानि सन्ति। कान्टमते दिक्कालयोः वास्तविकरूपेणास्तित्वं नास्ति। तयोः वैज्ञानिकीरेव स्थितिः। अन्तर्ज्ञानरूपेण तयोः प्रतिभासाः जायन्ते। ब्रेडले-प्रभृतिभिः दार्शनिकैरपि देशकालयोः प्रातिभासिकत्वमेव स्वीकृतम्। तेषां मते देशकालौ प्रत्ययरूपेणैव भवतः तयोः स्वरूपतः स्थितिर्नास्ति।

नैयायिकानां मतमिदमालोचनीयमस्ति यद् दिक्कालयोः स्वरूपतः स्थिति-र्वर्तत इति। स्वरूपतः महाकालस्य नित्यस्य व्यापकस्य प्रतितिः कथं जायते ? व्यापकस्य महाकालस्य प्रत्ययः न कुत्रापि जायते। यदि प्रतीतिव्यवहाराभ्यामेव तयोः सिद्धिः क्रियते चेत् खण्डकालस्यैव सिद्धिर्भविष्यति न महाकालस्य। तस्य एकत्वे नित्यत्वे लाघवमिति लाघवज्ञानपुरस्कारेणैव तस्य नित्यत्वमेकत्वञ्च स्वीकुर्वन्ति वैशेषिकाः। परन्तु लाघवमात्रेणानुभूतानां क्षणादिभेदानामपलापः न कर्तुं शक्यः।

विज्ञानवादिवौद्धा अपि कालस्य वाध्यास्तित्वं नाङ्गीकुर्वन्ति तेषां मते क्षणिकविज्ञानसन्ततिरेव कालः।

जैनाः वैशेषिकवत् कालस्य द्रव्यत्वमेव स्वीकुर्वन्ति। तेषां मते पुद्गलधर्मा-धर्माकाशकालजीवभेदेन षट् द्रव्याणि भवन्ति। कालः पारमार्थिकव्यावहारिक-भेदेन द्विविधः। परिणाम, वर्तना, परत्वापरत्वाणि चत्वारि कालस्य धर्माः भवन्ति क्रियापरिकल्पितभेदनिबन्धनः कालः। तिथ्यादिभेदावधारणार्थमवश्यं स्वीकार्यः। तिथ्यादिभेदज्ञानं वैदिककर्मप्रयोगाङ्गम्। 'पौर्णमास्यां पौर्णमास्यां यजेत्, अमावास्यायामावास्यायां यजेत्" इत्यत्र पौर्णमाया अमावास्यायाश्च वैदिक-कर्माङ्गत्वेन प्रतिपादनात्। वसन्तादिऋतुभेदोऽपि वैदिकयागाङ्गत्वेन प्रतिपा-दितः, वसन्ते ब्राह्मणोग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्यः वर्षासु रथकार इति।

तस्मादेतस्मात् कालः क्रियाभेदाद् भिद्यते। एतेन सदृशन्यायात् सर्वमिदंदिक् विषयेऽपि मन्तव्यम्। दिक्कालयोरेकत्वं व्यत्ययदर्शनादपि सिध्यति। यैवेकत्र पूर्वा दिक् सैवान्यत्र दक्षिणेति गृह्यते। प्राग्भागो यः सुराष्ट्राणां सैव मालवानां दक्षिणः। अमेरिकादेशीयानां कृते यः पूर्वभागः अस्माकं सैव प्रतीच्य भागः।

कालेऽपि चिरक्षिप्रादिव्यवहारोऽपि अव्यवस्थित एवानुभूयते। यः अनागत इति परिस्फुरति स एव वर्तमानो भवति स एव भूतो भवति। इति रीत्या भत-भविष्यवर्तमानादिभेदाः सूर्यक्रियया एव औपाधिका एव इति।

# मींमांसा-दर्शने आत्मतत्त्वविमर्शः

—डॉ० दामोदरशास्त्री

जगति सर्वे प्राणिनः सुखमिच्छन्ति, दुःखनिवृत्तये च चेष्टन्ते । निरतिशय-सुखरूपा निरतिशयदुःखनिवृत्तिरूपा वा यावस्था सैव मोक्षः । तदवस्थावाप्तिः संसारिजीवत्वहेतूनां विनाशानन्तरमेव सम्भवति । तत्सिद्धिश्चात्मानात्मविवेकं विना न सुकरेति निश्चप्रचम् । श्रुतिरपि पुत्रं मातेव मुमुक्षुजनान्सन्मार्गे प्रवर्तयितुं मोक्षसाधनीभूतमात्मसाक्षात्काराय योजयति—"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" (बृहदा०उप० २/४/६) इति । "तरति शोकमात्मवित्" (छान्दोग्यो-७/१/३) "तमेव एकं जानथ आत्मानम्" (मुण्डकोप० २/२/५ इत्यादि-श्रुतिवाक्यैरप्यात्मतत्त्वस्य मोक्षोपादेयत्वं जोघुष्यते ।

लोकेऽपि सर्वः प्राणी प्रत्यगात्मास्तित्वं प्रत्येत्यहमस्मीति । न हि कश्चिदपि नाहमस्मीति विप्रतिपद्यते । तस्मादात्मतत्त्वमसन्दिग्धम् । तथापि धर्मं प्रति विप्रतिपत्तयो बहुविधा इति विशेषप्रतिपत्तिरुपपद्यते । अत एव प्रमुखैर्भारतीयदर्शनै-रात्मतत्त्वस्य मोक्षावाप्ति-साधनभूततया तन्निरूपणं स्व-स्वसिद्धान्तभित्तीराश्रित्य व्यधायि ।

अस्मिन् शोध-निबन्धे पूर्वमीमांसा-दर्शनमधिकृत्य आत्मतत्त्वनिरूपणं विधास्यते । आत्मतत्त्वनिरूपणात् प्राक् पूर्वमीमांसा-दर्शनस्य भारतीयदर्शन-परम्परायां किं स्थानमिति संक्षिप्य विवेचनमपेक्षितमिति तदेव पूर्वं प्रस्तूयते --

## (१) मीमांसादर्शनस्य वैदिकत्वम्

### (अ) भारतीयदर्शनानां विभेदाः

चिरकालादेव जगति समनुभयमानस्य दुःखस्य निराकरणोपायमन्विष्यतां ज्ञानिनां चिन्तनपराणां बहूनामृषीणां पृथक्-पृथक् स्वात्मानुभूतय एव कालान्तरे विविधदर्शनरूपेण प्रथिताः ।

संक्षेपतो दार्शनिकविचार-धाराया द्विविधः प्रवाहोवगम्यते । यथा, (१) आस्तिक-परम्परा, अपरा (२) नास्तिकपरम्परा । आस्तिकपरम्परायां परलोक-पुनर्जन्मादिकं स्वीकृतम्, (नास्तिकपरम्परायान्तु परलोक-पुनर्जन्मादिकं नैवाभि-मतमिति तयोर्मौलिको भेदः (द्र० पाणिनिसूत्र—४/४/६०) ।

आस्तिकपरम्परायाश्च द्विविधः प्रवाहः । एकः (१) वैदिकपरम्परारूपः,

अपरश्च (१) श्रमणपरम्परारूपः। वैदिकपरम्परायां श्रुतिप्रामाण्यं स्वीक्रियते, श्रमणपरम्परायां तु न तथा। अर्हद्देवप्रणीतोपदेश एव तस्याः श्रद्धाविषयः। श्रमण-परम्परायां जैन-बौद्ध-दर्शने परिगण्येते, वैदिकपरम्परायां तु पूर्वमीमांसा-उत्तरमीमांसा-सांख्य-योग-न्याय-वैशेषिक-माहेश्वर-पाणिनिप्रभृतिदर्शनानि परिगण्यन्ते।

## (आ) वैदिकपरम्परायां मीमांसादर्शनम्

वैदिकपरम्पराया अपि द्विविधः प्रसारः। एकस्तु श्रुतिप्रामाण्यवादी, श्रौतो वा, अपरस्तु श्रुति-प्रामण्याविरोधी तार्किको वा। श्रतिप्रमाण्याविरोधिनस्तार्किका यद्यपि श्रुतिं प्रमाणत्वेन स्वीकुर्वन्ति, तथापि श्रुतिप्रामाण्यापेक्षया तर्कस्यानुमानस्य वा मुख्यत्वं तेषामभिमतम्। अनुमानानुसारिणी सती श्रुतिः प्रमाणम्, तर्क एव मूलतत्त्वान्वेषणादौ साधनम्, तमन्तरेण मूलतत्त्वान्वेषणं कर्तुं दुरूहमिति तैरवधार्यते। न्याय-वैशेषिक-सांख्य-योगप्रभृतीनि दर्शनानि श्रुतिप्रामाण्याविरोधिषु तार्किकेषु परिगण्यन्ते। न्यायसूत्राणि वैशषिकसूत्राणि सांख्यसूत्राणि, योग-(पातञ्जल)—सूत्राणि च श्रुतिप्रामाण्ये स्वश्रद्धां प्रकटयन्ति, तथापि तेषां श्रुतिप्रामाण्यापेक्षया तर्के सविशेष आदरः। श्रुतेरपि परतः प्रामाण्यमिच्छतां कणाद-गौतमकपिलप्रभृतीनां श्रुत्यनुमानयोर्विरोधे कदाचिदनुमानमप्याभासीभवेत्कदाचित्श्रुतिरपि नेया स्यादिति मतिः।

श्रुतिप्रामाण्यवादि-धारायां श्रुतिप्रमाणेन मूलतत्त्वमन्विष्यते। श्रुतिरेव मुख्यतया मूलतत्त्वान्वेषणादौ साधनम्। श्रुतिमन्तरेण मूलतत्त्वादिनिर्णयं दुर्लभं मन्वानानि श्रुत्येकशरणानि श्रौतानि दर्शनानि श्रुतिप्रामाण्यवादीनि कथ्यन्ते। जगत्कारणादयोऽतिपरोक्षाः पदार्थाः श्रुत्यनुसारेणैव तैर्निश्चीयन्ते। श्रुतिविरुद्धार्थोनुमानेन केनचित्साधितश्चेत्तदनुमानं न प्रमाणं, किन्तु प्रमाणाभास एव तैः स्वीकृतम्। श्रुतिप्रतिपादितस्यापाततो विरुद्धस्य अलीकतया भासमानस्यापि तैः सत्यत्वं स्वीक्रियते। श्रौतानां मते श्रुतिस्तु स्वतः प्रमाणम्, न तथा परतः प्रामाण्यमभ्युपगच्छन्तस्तार्किका मन्वते।

तत्र श्रुतिप्रामाण्यवादीनि दर्शनान्यपि द्विविधत्वं भजन्ते। एकं कर्मकाण्डवादी, अपरञ्च ज्ञानकाण्डवादी दर्शनम्। श्रुतेर्मुख्यतः प्रतिपाद्यो विषयः कर्मैव, ज्ञानकाण्डं तदङ्गतयोपयुज्यत इति कर्मकाण्डवादिनो मीमांसकाः (जैमिनीयाः)। ज्ञानकाण्डवादिनस्तु वेदान्तिनः पाणिनीयाश्च ज्ञानकाण्डमेव मुख्यतः श्रुतेः प्रतिपाद्यं मन्वते। प्राणिनां सन्मार्गे प्रज्ञा सम्पादनमेव हि श्रुतेर्मुख्यम् उद्देश्यम्। कर्मणा शुद्धचित्ता एवं ज्ञानमार्गेऽधिकारिणो भवन्ति-इत्यतः कर्मकाण्डं ज्ञानकाण्डस्याङ्गभूतम्। एवं पूर्वमीमांसा-पाणिनीयं व्याकरणं-ब्रह्मसूत्रादिकञ्च श्रुतिप्रामाण्यवादिषु परिगण्यते।

## (२) मीमांसा-दर्शने आत्मा

मीमांसकाः शरीरेन्द्रियादिभिन्नं जीवात्मानं स्वीकुर्वन्ति। अयमात्मा मृत्युलोकात्प्रेत्य स्वर्गलोकादिकं गच्छति, मुक्तश्च भवति । आत्मा नित्यः, विभुः अविनाशी भोक्ता च वर्ण्यते । देशकालपरिच्छिन्नः प्रतिशरीरं च पृथक् पृथगात्मा तिष्ठति। एवं जीवात्मनां नानात्वमभ्युपेतम् । अत एकस्यात्मनो मुक्तेऽप्यन्येषां बन्धदशापन्नत्वं संगच्छते । आत्मा जडस्वरूपः, ज्ञानकर्मकत्वाद् बोधस्वरूपश्चास्ति। यद्यप्यात्मनि ज्ञानस्योदयोस्ति, परं स्वप्नावस्थायां तु विषयाभावे ज्ञानस्याप्यभावो जायते।

भाट्टमते आत्मा अहं-प्रत्ययगम्यः, सर्वेषां पदार्थानां ज्ञापकश्च वर्तते। प्रभाकरस्त्वात्मनो मानसप्रत्यक्षविषयत्वं नाभ्युपगच्छति। कर्तुः कर्मत्वासम्भवात् (परसमवेतक्रियाफलशालि हि कर्म इति तन्मते कर्म-लक्षणस्वीकारादात्मनो ज्ञानकर्तृत्वाभावात्) तथा चार्थान्तरविषये आत्मा कर्ततया प्रकाशते । ज्ञानं घटादिकं प्रकाशयदात्मानपि प्रकाशयति, न हि ज्ञातृशून्यं कदाचिदपि ज्ञेयमवभाति।[१]

### (अ) मुक्तात्मविमर्शः

"परं जैमिनिर्मुख्यत्वात्" (ब्र० सू० ४/३/५/१२) इतिवेदान्तदर्शनसूत्रे देवयान-मार्गेण ब्रह्मलोकगमनस्य प्रसङ्गे कार्यब्रह्मलोकस्य गन्तव्यत्वं सिद्धान्तरूपेण प्रतिपादयता बादरायणेन पूर्वपक्षो दर्शितः। अतः स्पष्टं लक्ष्यते यज्जैमिनिर्देवयानमार्गेण परब्रह्मप्राप्तिं मनुते[२], बादरायणिस्तु देवयानमार्गेण कार्यब्रह्म-प्राप्तिमिति भेदः।

जैमिनिमते परब्रह्मप्राप्तिः शरीररहितस्य मुक्तात्मनः स्वीकृता। ब्रह्मलोके आत्मा सर्वज्ञत्व-सत्यकामत्व-सत्संकल्पत्व-ऐश्वर्यादिमद्ब्रह्मरूपेणावतिष्ठते।[३] य आत्मापहतपाप्मा······सत्यकामः सत्यसंकल्पः[४], तस्य सर्वेषु लोकेषु कामचारो भवति,[५] स तत्र पर्येति[६] इत्यादिश्रुतिवाक्यान्यपि प्रोक्तमतं पुष्णन्ति।

### (आ) मोक्षप्राप्तिप्रक्रिया (भाट्टमते)

इष्टपश्वादीनां देवादिशरीरप्राप्तिहेतुकानां काम्यकर्मणां, नारक्यादिशरीरप्राप्तिहेतुकानां प्रतिषिद्धकर्मणां चानारम्भाद् भाविधर्माधर्माणामनुत्पत्तेस्तज्जन्यसुखदुःखादीनामपि सम्भावना निर्मूला भवति। नित्यनैमित्तिकानां सन्ध्यावन्दनश्राद्धादीनां सम्यगनुष्ठानात् प्रत्यवायरूप-पापोत्पत्तिं समुन्मीलयतः, पूर्वदुरितक्षयं विदधतः, साम्प्रतदेहोपभोग्यकर्म क्षपयतश्च पुरुषस्य त्रिविध-प्रपञ्चसम्बन्धराहित्येन स्वरूपेणावस्थानलक्षणो मोक्षः सेत्स्यतीति भाट्टाः।[७]

### (इ) मोक्षावाप्तिप्रक्रिया (प्राभाकरमते)

यः खलु सांसारिकेभ्यो दुःखेभ्य उद्विग्नः, तदनुषंगबलेभ्यश्च सुखेभ्योपि विगतस्पृहो मोक्षायोत्तिष्ठते, स तावद् बन्धहेतुभ्यो निषिद्धेभ्यः प्रत्यवायहेतुभ्यः काम्येभ्योऽभ्युदयसाधनेभ्यश्च निवर्तमानः, समुत्पन्नपूर्वो धर्माधर्मो भोगेन क्षयं नयन् शम-दम-ब्रह्मचर्याद्यङ्गोपबृंहितेनात्मज्ञानेन "न स पुनरावर्तते" (छान्दोग्योप० अ० ८) इत्यपुनरावृत्तये चोदितेन निःशेषकर्माशयं नाशयन् मुच्यते।[८]

एवं सिद्धयति यद् भाट्टैस्तावत्कर्मफलानामुपभोगादेव धर्माधर्मयोर्विनाशोभ्युपेतः, प्रभाकरमहोदयैस्तु धर्माधर्मयोर्विनाशे उपभोगेन सहैव शमदम-ब्रह्मचर्यादि-योगाङ्गानां परिपालनादधिगतमात्मज्ञानमप्यावश्यकमिति स्वीक्रियते।

### (ई) मुक्तिसाधनत्वं ज्ञानकर्मसमुच्चयस्य

वेदान्तिन आत्मज्ञानादेव मोक्ष इति मन्वते। मीमांसकास्त्वात्मज्ञानस्य नित्यनैमित्तिककर्मणां च समप्राधान्येन निःश्रेयसफलकत्वं स्वीकुर्वन्ति। तत्रात्मज्ञानं द्विविधम्। आद्यं देहाद्विवेकज्ञानम्—"अविनाशी वा अरे अयमात्मा" इत्यादि-श्रुतिमूलकम्। अपरन्तु "अथात्मानमुपासीत" इति प्राणायामाद्यङ्गोपेतमुपासनात्मकं ज्ञानम्।

भाट्टमतस्य निरसनं शङ्करेण कृतमिति ब्रह्मसूत्रस्य (४/३/५) शाङ्कर-भाष्यपर्यालोचनया प्रतीयते—

"यत्तु कैश्चिज्जल्प्यते, नित्यानि नैमित्तिकानि कर्माण्यनुष्ठीयन्ते प्रत्यवायानुत्पत्तये, काम्यानि प्रतिषिद्धानि च परिह्रियन्ते स्वर्गनरकानवाप्तये, साम्प्रत-देहोपभोग्यानि च कर्माण्युपभोगेनैव क्षप्यन्ते-इत्यतो वर्तमानदेहपातादूर्ध्वं देहान्तरप्रतिसन्धानकारणाभावात्स्वरूपावस्थानलक्षणं कैवल्यं विनापि ब्रह्मात्मैक्यमेवंवृत्तस्य सेत्स्यतीति। तदसत्। प्रमाणाभावात्। न ह्येतच्छास्त्रेण केनचित्प्रतिपादितं मोक्षार्थीत्थं समाचरेदिति। स्वमनीषया त्वेतत्तर्कितं, यस्मात्कर्मनिमित्तः संसारस्तस्मान्निमित्ताभावान्न भविष्यतीति। न चैतत्तर्कयितुमपि शक्यते निमित्ताभावस्य दुर्ज्ञानत्वाद्।"

तत्राद्यं तु परलोकसाधनेषु दर्शपूर्णमासज्योतिष्टोमप्रभृतिकर्मसु प्रवृत्तिहेतुः।[९] अपरस्योपासनात्मकज्ञानस्य कर्मणि पुरुषे च दृष्टप्रयोजनाभावाददृष्टापेक्षायां श्रुत्याद्यभावेन क्रत्वर्थत्वाभावाद् वाक्यशेषोपनीताभ्युदय-निःश्रेयसफलकत्वं वरीवर्ति। मुक्तिसाधनप्रसङ्गे द्वितीयप्रकार एवाभिप्रेत इति।

एवं ज्ञानकर्मणोः परस्परमङ्गाङ्गित्वभावः, किं वा मुख्यगौणत्वभावो बाध्य-बाधकभावो वा नैव मीमांसकानामभिप्रेतः। उक्तं च तन्त्रवार्तिके—

नन नि:श्रेयसं ज्ञानाद् बन्धहेतोर्न कर्मणः।
नैकस्मादपि तत्किन्तु ज्ञानकर्मसमुच्चयात्॥
नित्यनैमित्तिकयोरेव कुर्वाणो दुरितक्षयम्।
ज्ञानं च विमलीकुर्वन्नभ्यासेन तु पाचयेत्॥
वैराग्यात्पक्वविज्ञानः कैवल्यं लभते नरः।
न च ज्ञानविधानेन कर्मसम्बन्धवारणम्॥

लोगाक्षिभास्कर-आपदेवप्रभृतिभिस्तु गीताप्रामाण्यमनुसृत्येश्वरार्पणबुद्धया क्रियमाणस्य कर्मणो मोक्षहेतुत्वं स्वीकृतम्। एभिरपि "ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुतेऽर्जुन" (गीता ४।३७) इति ज्ञानस्य, "यत्करोषि यदश्नासि, यज्जुहोषि ददासि यत्। यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम्" (गीता ९।२७)। इति ईश्वरार्पितकर्मणश्च मोक्षे हेतुत्वाभ्युपगमाज्ज्ञानकर्मसमुच्चय एवाभिप्रेत इति विद्मः।

(उ) मोक्षस्वरूपम् (प्राभाकरमते)

भव-परम्पराप्राप्तस्य कर्मणोल्पीयसो भोगात् क्षये, शमदमादिभिस्तु निःशेष-कर्मक्षये सति निःशेषधर्माधर्मपरिक्षयनिबन्धन आत्यन्तिको देहोच्छेदो मोक्षः प्राप्यते। धर्माधर्मवशीकृतो हि जीवस्तासु तासु योनिषु संसरति। स तयोरेकान्तोच्छेदे व्यपगतदेहेन्द्रियसम्बन्धः समुत्खातनिखिलसांसारिकदुःखानुबन्धो मुक्त इत्युच्यते। एवं देहोच्छेदो मोक्ष इति सिद्धयति।"

(ऊ) मोक्षस्वरूपं भाट्टमते

प्रपञ्चसम्बन्धविलयो मोक्षः। तत्र पुरुषपदाभिधेयात्मनो बन्धरूपः शरीरादि-प्रपञ्चस्त्रिविधः। यथा (१) भोगायतनं शरीरम्, (२) भोगसाधनानीन्द्रियाणि चक्षुरादीनि, अन्तरिन्द्रियं मनश्च, (३) भोग्याः शब्दादयो विषयाः। भोग-शब्देन पुरुषसुख-दुःखसाक्षात्कारोभिधेयः। तथा चैतत्त्रिविधस्यापि बन्धस्य समुच्छेदो मोक्ष इति भाट्टाः।

(ए) मुक्तजीवस्थितिः

भाट्टमते सर्वविधबन्धे निर्मूले, ज्ञानसुखदुःखानुभव-इच्छा-द्वेष-प्रयत्न-धर्म-धर्म-संस्कारै रहित-आत्मा स्वस्वरूपेण ज्ञानशक्तिसत्ताद्रव्यत्वादिसम्पन्नस्तिष्ठति। मुक्तावस्थायामात्मा शरीरेन्द्रियादिरहितः स्वरूपेण तिष्ठति। यद्यपि स ज्ञानशक्ति-युक्तः", तथापि तस्यात्मज्ञानं सुखाद्यनुभवश्च न भवतः" इति भाट्ट-वार्तिक—शास्त्रदीपिकादिग्रन्थपर्यालोचनेन स्पष्टमवगम्यते।

प्राभाकरा अपि आत्म-विशेषगुणोच्छेदे सत्तामात्रमेव मुक्तस्तिष्ठतीति प्रतिपादयन्ति।

## (ऐ) मोक्षे सुखमभिव्यज्यते न वा

मोक्षाध्वनीनामस्ति सार्थद्वयी, केचिन्मोक्षं भावात्मकं मन्वते, अपरे त्वभावात्मकमाचक्षते। तत्र प्रथमपक्षे सालोक्य-सारूप्य-सायुज्यप्रकारा विद्वद्भिरभिमताः सन्ति। द्वितीयपक्षेपि केषांचिन्मते दुःखप्रागभावरूपः, अन्येषां मते दुःखात्यन्ताभावरूपः, अपरेषां मते निखिलदुःखध्वंसरूपो मोक्षः। उभयोः पक्षयोः श्रुतिप्राणाण्यं संजाघटीति—

यथा "ब्रह्मविद् ब्रह्मैव भवति", "आनन्दो ब्रह्मेति व्यजानात्", "तरति शोकमात्मविद्", "अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः", इत्यादिबहुश्रुतिवाक्यानि संदृश्यन्ते।

मीमांसकेषु प्राभाकरा बुद्ध्यादिविशेषगुणोच्छेदे मुक्तात्मनो निरानन्दावस्थामेव स्वीकुर्वन्ति। गागाभट्टापरनामधेयेन नारायणभट्टवंशीयेन विश्वेश्वरसूरिणा भाट्टचिन्तामणौ मोक्षविचारप्रकरणे "आत्यन्तिकदुःखप्रागभावमेवापवर्गमाचक्षते गुरुमतमर्मज्ञाः," इत्युल्लिखितम्। नव्यप्राभाकरेण प्रकरणपञ्चिकाकारेण श्रीशालिकानाथेनापि प्रोक्तमतमेवाभिप्रेतमिति सुस्पष्टम् प्रतिपादितम्।

भाट्टेषु शास्त्रदीपिकाकारादीनां च मते आत्मवैशेषिकगुणोच्छेदरूपमेव मोक्षतत्त्वम्। आनन्दावाप्तिमतस्य स्पष्टमेव निरसनं च शास्त्रदीपिकायां कृतं दृश्यते।

किन्तु भाट्टसम्प्रदाये कैश्चिदाचार्यैर्मुक्तौ नित्यसुखं स्वीक्रियते। मानमेयोदयकारादीनां नारायणभट्टप्रभृतीनां मते निरतिशयनित्यानन्दाभिव्यक्तिलक्षणो मोक्षः स्वीकृतः।[१]

मोक्षे नित्यसुखं स्वीकुर्वतो भाट्टानेवोद्दिश्य सर्वदर्शनसंग्रहकारेण माधवाचार्येणोक्तम्—"नित्यनिरतिशयसुखाभिव्यक्तिर्मुक्तिरिति भट्टसर्वज्ञाद्यभिमतेऽपि दुःखनिवृत्तिरभिमतैव" इति।[१]

दुःखात्यन्ताभावरूपे मोक्षे सुखप्रतीतिः प्रकारान्तरेण निरूपयितुं शक्यते।[१] लोके भारापगमे "सुखी संवृत्तोहम्" इति प्रतीतिर्दृश्यते, तथैव दुःखात्यन्ताभावरूपे मोक्षे सुखप्रतीतिः।

## (ओ) आत्मनो यज्ञेन स्वर्ग-प्राप्तिः

"ज्योतिष्टोमेन स्वर्गकामो यजेत" इति वैदिकविधिवाक्यं जीवात्मनः स्वर्गप्राप्तिं, यज्ञानां तदुपायभतत्वं च सङ्केतयति। तत्र कः स्वर्गः इति विचारोऽत्र प्रासङ्गिकः।

## स्वर्गस्वरूपम्

उक्तविधिवाक्ये पठितस्य स्वर्गशब्दस्याभिधेयत्वविचारणायां शाबरभाष्ये

स्वर्गकामाधिकरणे "स्थानविशेषे स्वर्गशब्दो विशिष्टदेशे लोके प्रसिद्धः" इत्याशङ्क्य निरतिशयप्रीतिविशेषवाचित्वं" सिद्धान्तितम् ।

### भट्टमतम्

"स्वर्गशब्दो नक्षत्रदेशः" वैदिकप्रवादपौराणिकयाज्ञिकदर्शनेनोच्यते । तथाहि-वेदे "ये हि पुण्यकृतो जनाः स्वर्गं लोकं यान्ति, तेषामेतानि नक्षत्राणि ज्योतींषि । यथैष ज्योतिरिमं लोकं जयति" इति प्रोक्तम् । यदि वेतिहासपुराणोपपन्नं मेरुपृष्ठमितिमतान्तरेण स्वर्गपदार्थमुपवर्ण्य, अथवान्वयव्यतिरेकाभ्यां विभवतं केवलमेव सुखं यत्सम्वत्सरादिष्वनुभूयमानं दुःखसाधनशीतोष्णक्षुत्पिपासादिसमस्तद्वन्द्वरहितमिति निरतिशयप्रीतिविशेषमेव स्वर्गपदाभिधेयं कुमारिलभट्टाः स्वीकुर्वन्ति ।

### स्वर्गयागयोः साध्यसाधनभावः

"ज्योतिष्टोमेन स्वर्गकामो यजेत" इति विधिवाक्येन ज्योतिष्टोमयागस्य स्वर्गसाधनत्वं स्फुटमेव । अत्र भावनावाक्यार्थवादिनां भाट्टानां मते समभिव्याहारापरपर्यायवाक्यगम्यः स्वर्गयागयोः साध्य-साधनभावः, तथा च पार्थसारथिमिश्रेणोक्तम्—न हि तत्र स्वर्गकामस्य यागस्य वा साध्यत्वं साधनत्वं वा केनचिदुक्तम् । पदद्वयसभिव्याहारादेव तु सम्बन्धे कल्पयितव्ये "असाधकन्तु तादर्थ्याद्" इति न्यायेन कामिनः प्राधान्यम् यागस्य च गुणत्वं कल्प्यत इति ।

प्रभाकरमते तु स्वर्गयागयोः साध्यसाधनभावो हि न श्रुत्यादिप्रमाणगम्यः, अपि त्वौपादानिक इति । इष्टसाधनतावाक्यार्थवादिनो मण्डनमिश्रस्य मते तु स्वर्गयागयोः साध्यसाधनभावः श्रौतः ।[१७]

यागस्य फलदातृत्वसिद्धावपि, अचिरस्थायिनोऽस्य देशान्तरकालान्तरभाविस्वर्गरूपफलारम्भकता कथं संजायटीति—इति प्रश्नो मीमांसकानां समक्षे समुपस्थितः ।

इमं प्रश्नं समाधातुं तैरपूर्वनामकः पदार्थः कल्पितः । अयमपूर्वसंज्ञकः पदार्थो यागादिक्रियाजनितः स्वर्गफलारम्भको भवति ।[१८] अपूर्वपदार्थस्वरूपे भाट्टानां मीमांसकानां न किंचिद्वैमत्यम्-तस्य वाच्यत्वप्राधान्यांशे तु विवादोऽस्त्येव ।

### देवतायाः स्वर्गफलदातृत्वनिरासः

मीमांसकानां मते वेदमन्त्रेभ्यो देवानां पृथक्सत्ता निषिद्धा ।[१९] कर्मणस्तत्प्रतिपादकवचनेभ्योतिरिक्तो न कश्चिद् देव ईश्वरो वास्ति-इति मीमांसकानां मतम् । निरुक्तेऽपि प्रोक्तम् "यत्काम ऋषिर्यस्यां देवतायामार्थपत्यमिच्छन्स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवति" ।[२०] यदर्थवस्तु कामयमानेन ऋषिणा, यस्यां देवतायां स्तुतायां तस्या देवतायाः प्रसादेनास्यार्थजातस्य स्वामी भविष्यामि इत्येतां

बुद्धि प्रधार्य स्तुतिः क्रियते तद्देवतैव तन्मन्त्रस्य भवति। शाबरभाष्ये देवतानां विग्रहवत्त्वं पूर्वपक्षेनोपस्थाप्य तन्निरासः कृतः।[२१] शरीराणि, हविर्भोगः, ऐश्वर्यम्, प्रसन्नता, स्वर्गफलदातृत्वमित्येतद्विग्रहपञ्चकं तत्र[२२] तत्र निरस्तम्। देवताख्यं साधनं चेतनावदिवोपचर्यमाणं सम्बुद्धिशब्देनामन्त्र्यते। कश्चिदपि देव उद्दिश्यमान-द्रव्यादीनामुपभोगं कुर्वन्न दृश्यते।

एवं देवानां स्वर्गादिफलदातृत्वं च मीमांसकैर्न स्वीक्रियते। देवानां स्वर्ग-फलदातृत्वं स्वीकुर्वतां मते, "तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति" इत्यनेन सिद्धं भवति यद् हविर्दानेन गुणवचनैश्च देवताराध्यते, सा प्रीता सती फलं प्रयच्छति इति। शाबरभाष्ये विस्तरेण देवतानां स्वर्गादिफलदातृत्वस्य निरासः कृतः। तन्मते यागे गुणभूताया देवताया दातृत्वं स्तुत्योच्यते। यथामात्येन मे ग्रामो दत्तः, सेना-पतिना मे ग्रामो दत्त इति, न चामात्यः सेनापतिर्वा ग्रामस्य दाने प्रभवति, राजैव प्रभवति। इतरस्मिन्गुणभूते स्तुत्या दातृत्ववादः।[२३] यद्यपि देवतार्थता[२४] यागस्य गम्यते, फलार्थतापि तत्र न प्रतिषिध्यते। फलं च पुरुषार्थः, पुरुषार्था च नः प्रवृत्तिः। न चासौ देवतायाः। तस्मान्न देवताप्रयुक्ताः प्रवर्तिष्यामहे। या तु संप्रदानस्याभि-प्रेतता, सा फलवतो यजेः साधनत्वे सत्युपपद्यते। न च देवता फलेन सम्बध्नाति, या तदर्थं परिचर्येत।[२५]

एवं मीमांसकाः आत्मनः स्वर्गप्राप्त्युपायं मोक्षप्राप्त्युपायं च विवृण्वन्तो विशिष्टं दार्शनिक-चिन्तनं व्यदधुरिति भारतीयदार्शनिकपरम्परायां तेषां महनीयं योगदानं वरीवर्तीति निश्चप्रचम्।

### सन्दर्भ-स्थलानि


१. बुद्धीन्द्रिय-शरीरेभ्यो भिन्न आत्मा विभुर्ध्रुवः।
नानाभूतः प्रतिक्षेपमर्थवित्तिषु भासते॥

(प्रकरणपञ्चिका, अष्टमप्रकरणम्; २।२१३)

२. भावं जैमिनिर्विकल्पामननात् (ब्र० सू० ४।४।५।११)।

३. ब्राह्मेण जैमिनिरूपन्यासादिभ्यः (ब्र० सू० ४।४।३।५)।

४. छान्दोग्योप० ८।७।१

५. छान्दोग्योप० ७।२५-२

६. छान्दोग्योप० ८।१२।३,

७. मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः।
नित्यनैमित्तिके कुर्यात् प्रत्यावायजिहासया॥

(मी० श्लोकवार्तिक, सम्बन्धाक्षेपपरिहार—११०)

८. प्रकरणपञ्चिका, पृ० ३४१

९. आत्मा ज्ञातव्य इत्येतन्मोक्षार्थं न च चोदितम् ।
कर्मप्रवृत्तिहेतुत्वमात्मज्ञानस्य लक्ष्यते ॥
(श्लोकवार्तिकम्, सं० आ० परि १०३)

१०. गीता—९।२७

११. प्रकरणपञ्चिका, पृ० ३४१,

१२. यदस्य स्वं नैजं रूपं ज्ञानशक्तिसत्ताद्रव्यत्वादि तस्मिन्नवतिष्ठते (शास्त्रदीपिका)।

१३. तस्माद् निःसम्बन्धो निरानन्दश्च मोक्षः (शास्त्रदीपिका, पृ० १२५-३०)।

१४. दुःखात्यन्तसमुच्छेदे सति प्रागात्मवर्तिनः ।
सुखस्य मनसा भुक्तिर्मुक्तिरुक्ता कुमारिलैः ॥
(मानमेयोदयः, प्रमेयप्रकरणम्)

१५. सर्वदर्शन-संग्रहः, अक्षपाददर्शनप्रकरणम् ।

१६. न च मोक्षस्यापुरुषार्थता, सासांरिकविविधदुःखोपरमत्वान्मोक्षस्य। दुःखोपरमो हि पुरुषैरर्थ्यते। (प्रकरणपञ्चिका, तत्त्वालोकप्रकरणम)

१७. द्र० प्रकरणपञ्चिका, (श्रीसुब्रह्मण्यशास्त्रिकृत टिप्पणी, पृ० ४३६-३७)

१८. फलाय विहितं कर्म, क्षणिकं चिरभाविने ।
तत्सिद्धिर्नान्यथेत्येतदपूर्वमपि कल्प्यते ॥
(प्रशस्तपादभाष्यस्य गुणनिरूपणान्तर्गतधर्मनिरूपणप्रकरणे न्यायकन्दली-टीका पृ० ६६२)

क्रिया हि क्षणिकत्वेन न कालान्तरभाविनः ।
स्वर्गादेः काम्यमानस्य समर्था जननं प्रति ॥
इष्टस्याजनिका सा च नियोज्येन फलार्थिना ।
कार्यत्वेन न सम्बन्धमर्हति क्षणभङ्गिनी ॥
तस्मान्नियोज्यसम्बन्धसमर्थं विधिवाचिभिः ।
कार्यं कालान्तरस्थायि क्रियातो भिन्नमुच्यते ॥
(प्रकरणपञ्चिका, मूलश्लोकसंख्या—२७४-७६)।

१९. शब्दमात्रं देवता (भाट्टादीपिका)।

२०. निरुक्तम् ७।१।१

२१. मीमांसादर्शनम्, शाबरभाष्यम् ६।१।४।६-९

२२. विग्रहो हविषां भोग, ऐश्वर्यं च प्रसन्नता। फलदातृत्वमित्येतत् पञ्चकं विग्रहादिकम् ॥

२३. मीमांसादर्शनम्—८।१।१७।३४ शाबरभाष्यम्,

२४. यज देवपूजासंगतिकरणदानेषु—इत्यतो देवतासंप्रदानको द्रव्यत्यागो द्रव्ययज्ञः इति सिद्धयति। संप्रदानं च नाम कर्मणोभीप्सिततमादभिप्रेततरं भवति, तस्मादग्न्यर्थो यागः, इति समायाति।

२५. मीमांसादर्शनम्, ६।१।४।६, शाबरभाष्यम्।

——:०:——

# पूर्वमीमांसा का 'नियम' एवं वैयाकरणों के 'परिभाषासूत्र'

—डॉ० वसन्तकुमार म० भट्ट

**भूमिका**—पाणिनिकृत 'अष्टाध्यायी' में षड्विध सूत्र प्राप्त होते हैं—संज्ञा, परिभाषा, विधि, नियम, अतिदेश और अधिकार।[1] इनमें से परिभाषासूत्र के लिए कहा गया है कि—लिङ्गवती परिभाषा। अर्थात् परिभाषा लिङ्गवती होती है।[2] इसको एक उदाहरण से देखें तो—तस्मिन्निति निर्दिष्टे पूर्वस्य। (पा०सू० १।१।६६) इस परिभाषासूत्र से "सूत्र में जहाँ जहाँ सप्तमी विभक्ति का निर्देश होता है वहाँ अव्यवहित पूर्व को कार्य होता है"—ऐसी व्यवस्था सूचित की गई है। अतः 'इको यणचि' (पा०सू० ६।१।७७) सूत्र में 'अचि' ऐसा लिङ्ग, अर्थात् सप्तम्यन्त पद को देखकर वहाँ 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (पा०सू० १।१।६६) सूत्र की उपस्थिति होती है। इस चर्चा से ऐसी ध्वनि निकलती है कि 'परिभाषा-सूत्र परार्थ हैं'। भाष्यकार पतञ्जलि ने परिभाषासूत्रों का परार्थत्व देखकर कहा है कि—परिभाषा एकदेश में रहती हुई भी समग्र शास्त्र को अभिज्वलित करती हैं; जिस तरह से गृह के एक कोने में रखा हुआ प्रदीप पूरे गृह में प्रकाश फैलाता है।[3]

परन्तु भाष्यकार से भी पूर्व वार्त्तिककार ने परिभाषासूत्रों का नियमार्थत्व भी देखा था। अतः उन्होंने 'षष्ठी स्थानेयोगा' (पा०सू० १।१।४९) सूत्र पर "षष्ठ्याः स्थाने योगवचनं नियमार्थम्। (वा० १)" ऐसा एक वार्त्तिक प्रस्तुत किया है। इसके समर्थन में 'नियमादिको गुणावृद्धी भवतो विप्रतिषेधेन।' (१।१।३

---

१. संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रमुच्यते ।। (कस्यापि)

२. तद्यथा—इको गुणवृद्धी। १।१।३ लिङ्गवती चेयं परिभाषा, लिङ्गञ्चास्याः गुणवृद्धि-ग्रहणं, तत्रोपतिष्ठते ।। —न्यासः (पृ० ७१) (द्रष्टव्या—काशिकावृत्तिः (न्यास-पद-मञ्जरी सहिता) प्रथमो भागः, सं० स्वामी द्वारिकादासः शास्त्री एवं पं० कालिकाप्रसादः शुक्लः, प्रका० प्राच्यभारतीप्रकाशनम्, वाराणसी, १९६५, पृ० ७१।

३. परिभाषा पुनरेकदेशस्था सती सर्वं शास्त्रमभिज्वलयति प्रदीपवत्। तद्यथा—प्रदीपः सुप्रज्वलित एकदेशस्थः सर्वं वेश्माभिज्वलयति ।। (२।१।१ इत्यत्र भाष्यम्)—द्रष्टव्यम्: व्याकरण-महाभाष्यम् (प्रदीपोद्योतसहितम्) प्रथमः खण्डः, प्रका० मोतीलाल बनारसीदास, दिल्ली, १९६७, पृ० ३५७।

सूत्रभाष्यम्) इस भाष्यवचन[४] पर भाष्यप्रदीपोद्योत में नागेश ने भी लिखा है कि अलोऽन्त्यस्य (पा०सू० १।१।५२) जैसे परिभाषासूत्रों की पूर्वाचार्यों ने "नियम" ऐसी संज्ञा रखी है।[५] अतः वैयाकरणपरंपरा में परिभाषासूत्र नियमार्थ होते हैं ऐसा प्रचलित हुआ है। इसी तरह न्यासकार ने भी लिखा है कि—अणुदित्सवर्णस्य चाप्रत्ययः। (पा०सू० १।१।६९) संज्ञासूत्र है; परिभाषासूत्र नहीं है। क्योंकि जो परिभाषा होती है, वह तो नियमार्थ होती है।[६] (और यह अणुदित्० सूत्र किसी का भी नियमन तो नहीं करता है।)

अब प्रश्न होता है कि यदि परिभाषासूत्र नियमार्थ होते हैं, तो अनुदात्तङित आत्मनेपदम् (पा०सू० १।३।१२) सूत्र को भी परिभाषासूत्र कहा जाय या नहीं? क्योंकि इस सूत्र पर 'आत्मनेपदवचनं—नियमार्थम्। (वा० -१) ऐसा वार्त्तिक मिलता है। तथा भाष्यकार भी बताते हैं कि इस सूत्र का प्रारम्भ नियमार्थ किया गया है। अतः इस प्रश्न की चर्चा के द्वारा—"परिभाषासूत्र में किस प्रकार का नियमार्थत्व होता है, जो परिभाषासूत्र को नियमसूत्र से पृथक् करने में कारणभूत होता है?" इस विषय की गवेषणा करना प्रस्तुत लेख का ईप्सिततम कार्य है।

१ : ०

भाष्यकार ने 'तस्मिन्निति निर्दिष्टे पूर्वस्य' एवं 'तस्मादित्युत्तरस्य' (पा०सू० १।१।६६, ६७) परिभाषासूत्र के सन्दर्भ में कहा है कि—सप्तमी विभक्ति एवं पञ्चमी विभक्ति का अविशेष रूप से पूर्व के साथ भी योग है तथा पर के साथ भी योग है। अतः नियमार्थ इस सूत्र का प्रारम्भ किया गया है। "ग्रामे देवदत्तः।" ऐसा कहने पर देवदत्त का ग्राम के साथ पूर्व में योग है या पर में योग है? इस विषय में सन्देह होता है। इसी तरह से, यहाँ इको यणचि। (पा०सू० ६।१।७७) की प्रवृत्ति के विषय में सन्देह होता है। दधि + उदकम् = दध्युदकम्। इस उदाहरण में (इ और उ) दोनों ही 'इक्' है और दोनों ही अच् है। अतः सन्देह होता है कि—'अचि पूर्वस्य?' या 'अचि परस्य?'। इसी तरह, तिङ्ङतिङः। (पा०सू० ८।१।२८) सूत्र में भी 'अतिङः पूर्वस्य?' या 'अतिङः परस्य?'। ऐसा सन्देह रहता है। यहाँ इष्ट तो यही है कि—'अचि पूर्वस्य' और 'अतिङ परस्य' ऐसा सूत्रार्थ हो। लेकिन बिना कोई प्रयत्न यह सिद्ध होनेवाला नहीं है। अतः कहा गया है कि—

---

४ प्रदीपोद्योत सहित के महाभाष्य की आवृत्तियों में यह वार्त्तिकवचन है। किन्तु BORI, Poona की कीलहोर्न सम्पादित महाभाष्य में यह वचन केवल भाष्यवचन के रूप में लिया गया है॥

५. अलोऽन्त्यपरिभाषायाः पूर्वाचार्यसंज्ञा नियम इति। (उद्योतः, पृ० १२२)

६. संज्ञासूत्रमिदम् न परिभाषा। सा हि नियमार्था भवति। (न्यासः, पृ २४३)

'नियमार्थ इस सूत्र का प्रारम्भ—प्रणयन—किया जा रहा है।'[७] इस भाष्योक्ति से विदित होता है कि जहाँ संदेह होता है, अर्थात् अनियम की स्थिति होती है वहाँ परिभाषासूत्र से नियम किया जाता है। हरदत्त ने इसी विचार को विशद करते हुए लिखा है कि लोक में जिस तरह अनियम के प्रसंग में नियम किया जाता है, उसी तरह शास्त्र में भी अनियम के प्रसंग में नियम करना चाहिए। जैसे कि—लोक में ग्रामान्तर में जाने का इच्छुक पुरुष किसी को कहता है कि कृपया मुझे मार्ग दिखाइए। अब जहाँ दो दिशाओं का मार्ग एकत्र सम्मिलित होता होगा, वहीं सन्देह होगा—ऐसे स्थान पर ही मार्गोपदेश किया जाता है कि अमुक मार्ग से जाने पर इष्ट ग्रामान्तर में जाया जा सकता है। इसी प्रकार यहाँ अस्तेर्भूः। (पा०सू० २-४-५२) सूत्र उपस्थित होने पर संदेह होता है कि—'अस्' धातु के स्थान में 'भू' आदेश किया जाय, या अनन्तर स्थित वर्ण को? तब षष्ठी स्थानेयोगा। (पा०सू० १।१।४९) सूत्र से नियम किया जाता है कि 'स्थाने' का योग करके ही। अर्थात् 'अस्' धातु के स्थान में ही 'भू' का आदेश किया जाय।[८]

इससे स्पष्ट होता है कि—अनियम की स्थिति में जो सूत्र प्रस्तुत किये जाते हैं वह नियमार्थ बन जाते हैं, और इसी प्रकार के नियमार्थसूत्र को ही 'परिभाषा-सूत्र' कहते हैं। इसी सन्दर्भ में ही "अनियमे नियमकारिणी परिभाषा" ऐसा लक्षण दिया गया है।।

## १ : १

अब यह प्रश्न उठता है कि—पाणिनि के नियमसूत्रों में किस प्रकार का नियमार्थत्व होता है? अथवा, पाणिनि का अमुक सूत्र नियमसूत्र है या नहीं? इसका निर्णय कैसे किया जाय। 'अष्टाध्यायी' का पर्य्यालोचन करने से विदित होता है कि कतिपय सूत्र में 'एव' कार का ग्रहण किया गया है।[९] इस 'एव' कार

---

७. तस्मिंस्तस्मादिति पूर्वोत्तरयोर्योगयोरविशेषान्नियमार्थोऽयमारम्भः। ग्रामे देवदत्तः। पूर्वः पर इति सन्देहः। एवम् इहापीको यणचि। दध्युदकं पचत्योदनम्। उभाविकावुभावचौ। अचि पूर्वस्याचि परस्येति संदेहः। तिङ्ङतिङः (८।१।२८) इत्यतिङः पूर्वस्यातिङः परस्येति संदेहः। इष्यते चात्रापि पूर्वस्य स्यादतिङः परस्येति, तच्चान्तरेण यत्नं न सिध्यतीति नियमार्थं वचनम्। एवमर्थमिदमुच्यते।। (पा०सू० १।१।६६, ६७ इत्यत्र भाष्यम्। पृ० १७२)

८. अनियमप्रसंगे नियमः कर्तव्यो लोकवत्। तद्यथा—लोके ग्रामान्तरं जिगमिषु कश्चित् कञ्चिदाह—पन्थानं मे भवान् उपदिशत्विति। स यत्र संदेहः पथि द्वैविध्यात् तत्रैवोपदिशति अमुष्मिन्नवकाशेऽनेन यथा गच्छेति; एवमिहापि अस्तेर्भूः अस्तेः स्थानेऽनन्तरो वेति संदेहे नियमः क्रियते—स्थानेयोगैवेति ॥ (१।१।४९ इत्यत्र पदमञ्जरी, पृ० १६८)।

९. अमैवाप्ययेन। पा०सू० २।२।२०; अजादी गुणवचनादेव। पा०सू० ५।३।५८।

ग्रहण सामर्थ्य से ही अमुक सूत्र 'नियमसूत्र' है ऐसा निर्णय हो जाता है। विशेष में भाष्यकार कहते हैं कि जो स्थिति सिद्ध ही होती है, उसका पुनः विधान करने के लिए जो विधि का प्रारम्भ किया जाता है, वह विधि 'एव' कार ग्रहण के अभाव में भी नियमार्थ बन जाता है।[१०] इस भाष्यवचन के आधार पर वैयाकरणों ने "सिद्धे सत्यारम्भो नियमार्थः" ऐसा न्याय प्रचलित किया है। अब इस न्याय के मानदण्ड पर 'अमुक सूत्र नियमसूत्र है या नहीं ?' इसका निर्णय किया जा सकता है।

यहाँ पर अनियम की स्थिति नहीं होती है; परन्तु इससे विपरीत कोई एक स्थिति सिद्ध ही होती है। अतः पुनः विधान के सामर्थ्य से ही वह विधि नियमार्थ बन जाती है, और वह 'नियमसूत्र' कहलाता है॥

## २ : ०

यहाँ पर, पूर्वमीमांसा के 'नियम' और 'परिसंख्या' में जिस प्रकार का नियमार्थत्व रहता है उसका विनियोग करके पाणिनि के परिभाषासूत्रों और नियम-सूत्रों में रहने वाले नियमार्थत्व को विशद किया जा सकता है। तद्यथा—'व्रीहीन् अवहन्ति'। ऐसा एक वाक्य है। यहाँ वैतुष्यार्थ नखविदलन की भी प्राप्ति है और अवहनन की भी। इस स्थिति में 'अवहन्ति' कहने से नखविदलन का निषेध हो जाता है। इसी को पूर्वमीमांसा में 'नियम' कहा गया है। इस प्रकार का नियम हमें व्याकरणशास्त्र के परिभाषासूत्र में प्राप्त होता है। जैसे कि—दधि+उदकम्। इस स्थिति में इको यणचि। (पा०सू० ६।१।७७) सूत्र से 'यण्' की प्राप्ति है। लेकिन इ एवं उ दोनों ही 'इक्' है तथा 'अच्' भी है। अतः सन्देह होता है कि किसको यण् आदेश किया जाय ? यहाँ पर 'तस्मिन्निति निर्दिष्टे पूर्वस्य' (पा०सू० १।१।६६) परिभाषासूत्र से नियम प्रस्तुत किया जाता है कि 'अच्' से अव्यवहित पूर्व को ही 'यण्' आदेश होता है। इससे स्पष्ट होता है कि पूर्वमीमांसा का जो नियम है, वह वैयाकरणों का परिभाषासूत्र है॥

## २ : १

इसी तरह से मीमांसक लोग जिसको परिसंख्याविधि के रूप में पहचानते हैं, उसी को वैयाकरण लोग नियम कहते हैं। निम्नोक्त भाष्यवचन से इसका समर्थन किया जाता है॥

"(शब्द या अपशब्द) दो में से किसी भी एक का उपदेश करने से कार्य सिद्धि

---

१०. अथ एवकारः किमर्थः। नियमार्थः। नैतदस्ति प्रयोजनम्। सिद्धे विधिरारभ्यमाणोऽन्त-रेणाप्येवकारं नियमार्थो भविष्यति। —उपमानं शब्दार्थप्रकृतावेव। पा०सू० ६।२।८० इत्यत्र भाष्यम्, पृ० १३१।

हो जायेगी। तद्यथा—भक्ष्य का नियम करने से अभक्ष्य का प्रतिषेध गम्य रहता है—अवगत हो जाता है। उदाहरण रूप से कहें तो—"पाँच नखवाले पाँच प्राणी भक्ष्य हैं" ऐसा कहने पर यह समझा जाता है कि इससे भिन्न जो भी प्राणी है वे सभी अभक्ष्य हैं। अथवा—अभक्ष्य का प्रतिषेध करने से भक्ष्य का नियम हो जाता है। उदाहरण रूप से कहें तो—"ग्राम्य कुक्कुट अभक्ष्य है और ग्राम्य सूकर (भी) अभक्ष्य है।" ऐसा कहने पर यह अवगत हो जाता है कि आरण्य कुक्कुट या आरण्य सूकर भक्ष्य है।[11]

'भाष्यप्रदीपोद्योत' में इसको स्पष्ट करते हुए नागेश भट्ट ने लिखा है कि—यह उदाहरण तो परिसङ्ख्या का दिया गया है। उसका 'नियम' के स्वरूप में कैसे व्यवहार किया गया है? परिसङ्ख्या एवं नियम में तो भेद है। जैसे कि पाक्षिक अप्राप्तिपूर्वक अप्राप्तांशपूरकविधि को (ही) नियमविधि कहा जाता है। जबकि परिसङ्ख्याविधि तो अन्यनिवृत्तिफला होती है। इसका समाधान यह है कि नियमविधि में भी अप्राप्तांश परिपूरणरूप फलबोधन के द्वारा आर्थी अन्य-निवृत्ति होतो है।[12] अत: नियम एवं परिसङ्ख्या के बीच अभेद मानकर उपर्युक्त भाष्यचर्चा की गई है।[13]

३ : ०

पूर्वोक्त चर्चा में पाणिनि के परिभाषासूत्र और नियमसूत्र के बीच में जो भेद है, वह बताने के लिए पूर्वमीमांसा के नियम और परिसंख्या का उपयोग किया गया है। अत: किसी को भी जिज्ञासा हो सकती है कि पूर्वमीमांसा के 'विधिवाक्य' का लक्षण पाणिनि के विधिसूत्रों के साथ क्या सुसंगत हो सकता है? तो इसका प्रत्युत्तर है—हाँ। पूर्वमीमांसा में अत्यन्त अप्राप्त कार्य का विधान करते हुए वाक्य

---

११. अन्यतरोपदेशेन कृतं स्यात्। तद्यथा—भक्ष्यनियमेनाभक्ष्यप्रतिषेधो गम्यते। पञ्च पञ्चनखा भक्ष्या इत्युक्ते गम्यत एतद्—अतोऽन्येऽभक्ष्या इति ।। अभक्ष्यप्रतिषेधेन वा भक्ष्यनियमः। तद्यथा—अभक्ष्यो ग्राम्यकुक्कुटोऽभक्ष्यो ग्राम्यशूकर इत्युक्ते गम्यत एतद्—आरण्यो भक्ष्य इति ।। (व्याकरण-महाभाष्ये प्रथममाह्निकम्, पृ० ५)।

१२. 'व्रीहीनवहन्ति'। वाक्य में अवघातविधि से अर्थतः नखविदलन की निवृत्ति होती है—इसी को "आर्थी अन्यनिवृत्ति" कहते हैं।

१३. ननु अस्य परिसङ्ख्यात्वात् कथं नियमत्वेन व्यवहारः। अस्ति च नियमपरिभाषयोः भेदः। पाक्षिकाप्राप्तिकाप्राप्तांशपरिपूरणफलो नियमः। अन्यनिवृत्तिफला च परिसङ्ख्येति चेन्न, नियमेऽप्यप्राप्तांशपरिपूरणरूपफलबोधनद्वारार्थान्यनिवृत्तेः सत्त्वेन अभेदमाश्रित्योक्तेः।। (भाष्यप्रदीपोद्योते प्रथममाह्निकम्, पृ० ४१-४२)

को 'विधि' (अपूर्वविधि) कहते हैं।[१४]

उदाहरण रूप से—यजेत स्वर्गकामः। 'स्वर्ग की कामना वाले को यज्ञ करना चाहिए।' यहाँ पर स्वर्गार्थक याग की प्रमाणान्तर से अप्राप्ति थी। ऐसी स्थिति में यह 'विधिवाक्य' (अपूर्वविधि) बनता है। इसी तरह से—सुधी+उपास्य में 'इको यणचि' (पा०सू० ६।१।७७) सूत्र से इतर किसी भी सूत्र से यण् आदेश की प्राप्ति नहीं थी। अतः वह सूत्र (पा०सू० ६।१।७७) पूर्वमीमांसा के 'विधिवाक्य' जैसा ही विधिसूत्र कहा जायेगा।

हम जब वैयाकरणों के परिभाषासूत्र को पूर्वमोमांसा के 'नियम' के साथ तुलना करते हैं तब एक दूसरी बात स्पष्ट करने की भी आवश्यकता है। जैसे कि—पूर्वमीमांसा में 'नियम' का जो उदाहरण है—'व्रीहीन् अवहन्ति।' वहाँ अवहनन क्रिया से नखविदलन की निवृत्ति होती है। इसी तरह से पाणिनीय व्याकरणशास्त्र में 'दधि+उदकम्' इस स्थिति में 'इ' एवं 'उ' दोनों को 'यण्' आदेश (६।१।७७ सूत्र से) प्राप्त होता है, तब तस्मिन्० (पा०सू० १।१।६६) परिभाषासूत्र से 'उ' कार को प्राप्त होनेवाले यण् आदेश की निवृत्ति की जाती है। किन्तु अब प्रश्न होगा कि परिभाषासूत्र से क्या केवल 'अन्य निवत्ति' ही होती है या और कुछ विशेष कार्य भी होता है ?। तो नागेश भट्ट ने एक स्थान पर बताया है कि परिभाषा लिङ्गवती होती है और साथ में फलवती भी होती है। यहाँ पर 'फल' का अर्थ इतर-व्यावृत्ति के साथ इतरसङ्ग्रह भी समझना है।[१५] अतः 'इ' कार को यण् आदेश की प्राप्ति भी सम्पन्न होती है। इसो प्रकार पूर्वमोमांसा के 'नियम' (व्रीहीन् अवहन्ति) के साथ पाणिनि के परिभाषासूत्रों की निःसंदेह तुलना की जा सकती है।[१६]

---

१४. विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्तौ परिसङ्ख्येति गीयते ॥ —अर्थसङ्ग्रहे तृतीयो भागः
यहाँ पर अपूर्व का अर्थात् प्रमाणान्तर से जो अप्राप्त है उस कार्य का विधान करने वाला 'विधि' होता है। दो या अधिक विकल्पों की प्राप्ति होने पर किसी भी एक के लिए मर्यादित (सीमित) करने वाला वाक्य 'नियम' कहलाता है। और दो में से एक विकल्प की जो निवृत्ति कर देता है वह 'परिसंख्या' है। अर्थात् injunction को विधि, restriction को नियम और exclusion को परिसंख्या कहते हैं॥

१५. अनियमे नियमकारिणीत्वात् परिभाषाया इति भावः। अन्ये त्विति। अयं भावः—न ह्यनियम इति श्रुतिः स्मृतिर्वा, किन्तु परिभाषा लिङ्गवती फलवती चेति नियमः, फलं चेतरव्यावृत्तिवद् इतरसङ्ग्रहोऽपि इति……। (पा०सू० १।१।३ वा० -५ इत्यत्र भाष्य-प्रदीपोद्योतः, पृ० १२१)।

१६. काशी की वैयाकरणपरम्परा में भी यह स्वीकृत है कि पाणिनि के परिभाषासूत्र सदृश पूर्वमीमांसा का 'नियम' है। हरिदीक्षित ने 'प्रोढमनोरमा'— की टीका 'शब्दरत्न' में

अन्त में, पूर्वमीमांसा की 'परिसङ्ख्या' को पाणिनि के नियमसूत्रों के साथ कहाँ तक संतुलित किया जा सकता हैं ? उसकी भी चर्चा की जाती है—पूर्वमीमांसा में 'परिसङ्ख्या' को विशद करने के लिए एक उदाहरण दिया जाता है—एकादश्यां फलाहारं कुर्यात्।' यहाँ पर परिसङ्ख्या को इतरव्यावृत्तिपरक माना गया है, किन्तु उसका स्वांश में चारितार्थ्य नहीं है। अर्थात् 'एकादशी के दिन फलाहार करना चाहिए' ऐसा जब विधान होता है वहाँ फल से भिन्न आहार का प्रतिषेध (व्यावृत्ति) किया जाता है। किन्तु फलों का आहार करना चाहिए या नहीं ? इस विषय में कुछ भी स्पष्ट (विधेयात्मक) विधान नहीं हुआ है—क्योंकि एकादशी के दिन निराहार भी रह सकते हैं ! अब, यदि पाणिनि के नियमसूत्र ही पूर्वमीमांसकों की परिसङ्ख्या है ऐसा स्वीकार किया जाय तो एक आपत्ति होगी। जैसे कि—पाणिनि के नियमसूत्रों से अन्य की निवृत्ति जरूर होगी, परन्तु वे स्वांश में चरितार्थ नहीं रहेंगे। उदाहरण रूप से कृत्तद्धितसमासाश्च। (पा०सू० १।२।४६) सूत्रस्थ 'समास' ग्रहण नियमार्थ है ऐसा माना गया है।[१७] अतः (१) वाक्य की प्रातिपदिक संज्ञा नहीं होगी—यह हुई अन्यनिवृत्ति। किन्तु (२) उसका स्वांश में चारितार्थ्य नहीं रहेगा। अर्थात् समास की इष्ट 'प्रातिपदिक' संज्ञा नहीं हो सकेगी। यदि समास की प्रातिपदिक संज्ञा नहीं हो पायेगी तो राजन्+ङस्+पुरुष+सु। इस स्थिति में सुपो धातुप्रातिपदिकयोः। (पा०सू० २।४।७१) सूत्र से विभक्तिप्रत्ययों का लुक् नहीं होगा (और परिणाम स्वरूप एकपदत्व भी प्राप्त नहीं होगा)। परन्तु इस आपत्ति को दूर हटाने के लिए वैयाकरणों ने अपने नियमसूत्रों में परिसङ्ख्या से प्राप्त अन्यनिवृत्ति रूप नियमार्थत्व का स्वीकार करने के साथ-साथ वह नियमसूत्र स्वांश में चरितार्थ भी रहे इसके लिए एक दूसरा सिद्धान्त भी कार्यान्वित किया है। "उद्देश्यता को व्याप्त करके रहने वाली व्यापकता विधेय में (भी) रहती है।"[१८] यहाँ समास उद्देश्य (Subject) है

---

लिखा है कि—

अत एव भाष्ये परिभाषाणां नियमतया व्यवहारः कृतः। परिभाषाणां न परिसंख्याविधिरूपनियमत्वम्। अपि तु व्रीहीनवहन्ति इतिवद् आर्थनियमत्वम्। —प्रौढमनोरमायां शब्दरत्ने परिभाषाप्रकरणम् (पृ० ७६) द्रष्टव्या—शब्दरत्नसहिता प्रौढमनोरमा, सं० व्यंकटेश लक्ष्मण जोशी, डेक्कन कोलेज, पूना, १९६६।

१७. कृत्तद्धितसमासाश्च। १।२।४६……समासग्रहणस्य नियमार्थत्वाद् वाक्यस्यार्थवतः संज्ञा न भवति। —काशिकावृत्तिः, पृ० ३४५।

१८. उद्देश्यतावच्छेदकव्यापकत्वं विधेये भासते। अर्थात् उद्देश्यतावच्छेदकनिष्ठ व्याप्यतानिरूपिता व्यापकता विधेये भासते इति वैयाकरणपुरन्दराः अस्मद्गुरवः श्रीबालकृष्णपञ्चोलिनः ॥

और 'प्रातिपदिक' संज्ञा विधेय (Predicate) है। प्रातिपदिकसंज्ञा व्यापक है और समास व्याप्य है। अत: व्याप्याधिकरण (समास) में व्यापकीभूत प्रातिपदिकत्व की उपस्थिति नहीं रहेगी तो प्रातिपदिक संज्ञा में रहने वाला व्यापकत्व ही ख-पुष्पायमान बन जायेगा! इस तरह उपर्युक्त सिद्धान्त के आधार पर 'वाक्य' की प्रातिपदिकसंज्ञा निवृत्त होने के साथ ही, 'समास' में (अर्थात् स्वांश में) वह प्रातिपदिकसंज्ञा चरितार्थ भी रहती है॥

× × ×

स्वयं भाष्यकार ने ही पाणिनि के नियमसूत्रों का स्वरूप स्पष्ट करने के लिए 'पञ्च पञ्चनखा भक्ष्याः।' ऐसा पूर्वमीमांसोक्त परिसङ्ख्या का उदाहरण (द्रष्टव्या पादटिप-११) प्रस्तुत किया है। और इस सन्दर्भ में नागेश भट्ट ने भी स्पष्ट किया है कि भाष्यकार ने नियम एवं परिसङ्ख्या का अभेद मानकर व्यवहार किया है।[१६]

## ३ : १

**उपसंहार**—इस तरह से भाष्य में परिभाषाओं का नियम रूप से व्यवहार किया गया है। हमने देखा है (१ : २) कि यह नियमार्थत्व अनियम की स्थिति में प्रवृत्त होता है। दूसरा, परिभाषासूत्रों में परिसङ्ख्या रूप नियमार्थत्व नहीं है। केवल 'व्रीहीनवहन्ति' की तरह आर्थनियमत्व है। अर्थात् पूर्वमीमांसा का जो नियम है वह वैयाकरणों की परिभाषा है। दूसरी ओर, भाष्यकार ने स्पष्ट किया है कि जिस सूत्र में 'एव' कार का ग्रहण होता है वह नियमसूत्र है। तथा 'एव' कार ग्रहण के अभाव में अमुक स्थिति सिद्ध होने पर जो पुनः विधान किया जाता है वह भी नियमार्थ होता है। इस तरह 'एव' कार गर्भित-नियमार्थत्व जिस सूत्र में रहता है, वह भी नियमसूत्र कहलाते हैं। इस सन्दर्भ में भाष्यकार ने सूचित किया है कि पूर्वमीमांसा की परिसङ्ख्या ही वैयाकरणों के नियमसूत्र है॥

इस तरह पाणिनि के परिभाषासूत्रों में नियमसूत्रों से भिन्न प्रकार का नियमार्थत्व (अर्थात् व्रीहीनवहन्ति। जैसा आर्थनियमार्थत्व) रहता है; इस लिए ही—"संज्ञा च परिभाषा च विधिर्नियम एव च।" इस कारिका में 'परिभाषा' पद को 'नियम' से पृथक् रखा गया है॥

## ग्रन्थसूची

१. अर्थसङ्ग्रहः of लौगाक्षिभास्करः, Ed. A.B. Gajendragadkar & R.D. Karmarkar, Bombay, 1934.

१६. द्रष्टव्य है : २ : १ की चर्चा।

२. काशिकावृत्तिः (न्यास-पदमञ्जरीसहिता), सं० स्वामी द्वारकादासः एवं कालिकाप्रसादः शुक्लः, प्रथमोभागः, प्रका० प्राच्यभारतीप्रकाशन, वाराणसी, १९६५ ।
३। प्रौढमनोरमा (शब्दरत्नसहिता), सं० वेंकटेश लक्ष्मण जोशी, डेक्कन कॉलेज, पूना, (भाग-१), १९६६ ।
४. व्याकरण-महाभाष्यम् (प्रदीपोद्योतसहितम्), (प्रथमखण्डः), प्रका० : मोतीलाल बनारसीदास, दिल्ली, १९६७ ।
५. *The Vyakarana Mahabhasya of Patanjali*, Ed., F. Kielhorn and K.V. Abhyankar, (Vol. I, III), B‌O R Institute, Poona, 1962, 1972.

—o—

# सृष्टौ शंकासमाधिः

—विश्वनाथशास्त्री दातारः

चतुरास्यं चतुर्बाहुं पद्मस्थं परमेश्वरम् ।
सरस्वत्या समाश्लिष्टपार्श्वं परमपूरुषम् ।।
अक्षमालाऽभयाभीष्टकमण्डलुधरं प्रभुम् ।
सर्वविद्याधिपं देवं ब्रह्माणं सततं स्मरेत् ।।

इत्यस्मिन् मंगलपद्ये सरस्वत्या समाश्लिष्टपार्श्वो देवः सर्वविद्याधिपो वेधाः कविना स्मर्यते । तमधिकृत्य आक्षेपचतुरस्रा ब्रह्मणि जुगुप्सितत्वं आसादयितुं यदाशंकन्ते तन्निरासाय कृतो बौद्धिको नीत्यधिष्ठितो व्यापारः देवस्य वागधिपस्य ब्रह्मणस्तुष्ट्यै भवेदित्याशास्य कश्चन विषयः प्रस्तूयते । तत्रादौ शंकाविषयत्वं अधिगमयितुं ब्रह्मणो देवस्य वास्तविकं स्वरूपं कीदृगिति चिन्तापि कर्तव्या भवति । तां विना ब्रह्माणं प्रति उदितशंकायाः निरासस्य कृते अपेक्षितं चिन्तनं सुप्रकाशं न भवेत् । अतः शंकोत्थापनात् पूर्वं ब्रह्मस्वरूपं निवेद्यते । तच्चेत्थम् सरस्वती निरूपितं पतित्वं, विद्यापालकत्वं परमेश्वरत्वं सेव्यत्वं च इति । तदेतत् मंगलपद्ये निरूपिते गीतमेव ।

तेषु सरस्वतीनिरूपितं पतित्वं ब्रह्मणि 'सरस्वत्या समाश्लिष्टपार्श्वं' इत्यनेन सुस्पष्टमेव तत्र नास्ति शंकाविषयता ।

द्वितीयं विद्याधिपत्वं मंगलपद्योक्तं तदेव प्रकाशमायाति यदा समये-समये विद्यारक्षणोपेक्षामालोक्य अपेक्षानुसारेण कर्मविद्याः कर्मकाण्डोक्ताः अपराः, उपनिषन्मात्रवेद्या ब्रह्मविद्या परा च तत्तदधिकारिषु अधीतिबोधाचरणप्रचारैः स्थाप्येरन् आद्रियेरंश्च । तदेतत् ब्रह्मसृष्टजगद्वैचित्र्येण ज्ञातुमर्हं श्रीमद्भागवतीय-द्वितीयतृतीयचतुर्थस्कन्धैः । ब्रह्मणो भगवतः परमेश्वरत्वं परमपूरुषत्वं च भागवतस्य चतुर्थस्कन्धगतपद्येन—

विश्वोद्भवस्थितिलयेषु विभज्यमानैः मायागुणैरनुयुगं विगृहीतदेहाः ।
ते ब्रह्मविष्णुगिरिशाः प्रणतोस्म्यहं वः तेभ्यः क एव भवतां म इहोपहूतः ।।
(श्रीमद्भागवतम् ४।१।२७)

इत्यनेन स्फुटतरमेव ।

ब्रह्मणः सेव्यत्वमपि तस्य पितामहत्वात् वृद्धत्वाच्चाशंक्यमेव ।

तत्स्फुटं वामनपुराणे—

> ये वृद्धवाक्यानि समाचरन्ति श्रुत्वा दुरुक्तान्यपि पूर्वतस्तु।
> स्निग्धानि पश्चान्नवनीतशुद्धा मोदन्ति ते नात्र विचार्यमस्ति ॥
>
> इति ६५।७८

उक्त मंगलपद्ये यानि स्वरूपाणि अवशिष्टानि अन्यान्युक्तानि तानि सेव्यतांगत्वात् समुचितान्येव।

अथ तेषु स्वरूपेषु सरस्वत्या समाश्लिष्टपार्श्वत्वविद्याधिपत्वसेव्यत्वेषु श्रुतेषु आक्षेप्तारः आशंकन्ते जुगुप्सन्ति च तस्याः शंकायाः स्वरूपमादौ-विमृशामः। सर्वज्ञः सन्नपि ब्रह्मा पितामहोऽज्ञ इव दुहितरं वाचं कथं चकमे ?

अथ एतच्छंकाबोधनावसरे कासौ दुहिता ? को वावसरः कामस्य ? ब्रह्मा किंवा कुर्वन्नासीत् ? इत्यादयोऽनेके प्रश्नाः उपतिष्ठन्ति। तेषां समाधानं ब्रह्मदेवस्य देवस्य इतिहासनिरूपणेन भवितेत्यालोच्य तदितिहासो विव्रियते। तद्यथा—

सृष्टेरादौ नारायणस्य नाभिनाले संलग्ने कमले अवतीर्णो ब्रह्मा तप आचरन् जनकं भगवन्तं ददर्श। ततः पित्रादिष्टो देवः ब्रह्मणो वेदात् मूलतत्वं लब्ध्वापि सृष्टिकर्मणि न प्रववृते। मायाबन्धभयात्। तदा नारायणः तस्मै वरं ददौ। तदुक्तं—

> भगवच्छिक्षितमहं करवाणि ह्यतन्द्रितः।
> नेहमानः प्रजासर्गं बध्येयं यदनुग्रहात् ॥ इत्यादिना
>
> (श्रीमद्भागवतम् २।९।२८)

ततः स सृष्टिं कुर्वाणो वाराहकल्पादौ पृथ्वीं संस्थाप्य स्वाभिमतायाः प्रजायाः अपेक्षापूरणोद्देश्येन अबोधसृष्टिं कल्पयामास। तदर्थमबोधसृष्टिमूलत्वेन अविद्या-मुपादानीकृत्य तन्मयत्वं यथासृष्टौ भवेत् तथा अस्मितारागादिवैशिष्टचकौशलं च चिन्तयित्वादौ स भगवान् पंचपर्वाविद्यां कल्पयामास।

तदाहुः— ससर्जाग्रेन्धतामिस्रमथतामिस्रमादिकृत् ।
महामोहं च मोहं च तमश्चाज्ञानवृत्तयः ॥ इति

(श्रीमद्भागवतम् ३।१२।२)

ततः तमोवृत्तिमती बोधशून्या सृष्टिः प्रादुरभूत्। तत्र अनेकविधजातिः समुल्ललास। तासु यक्ष राक्षस भेदेन केचिद् जीवा अपि क्षुत्तृडर्दिताः दृष्टिपथं प्राप्ताः। ते च जाती ब्रह्माणं खाद्यं मत्वा 'जक्षध्वं मा रक्षत' इति प्रोचाते।

वर्णयन्ति तथा शुकाचार्याः—

> क्षुत्तृड्भ्यामुपसृष्टास्ते तं जग्धुमभिदुद्रुवुः।
> मा रक्षतैनं जक्षध्वमित्यूचुः क्षुत्तृडर्दिताः ॥
>
> (श्रीमद्भागवतम् ३।२०।२०)

इत्ययमेकोऽबोधसृष्टेरितिहासः। यद्येवमेव सृष्टिरभविष्यत् तर्हि सर्वत्र पुत्रेषु कर्कट-सधर्मत्वं व्यापादयिष्यत्। तन्मा भवतु इति विचिन्त्य भगवान् पितामहो बोधसर्ष्टि कल्पयामास, यत्रमंगलपद्योक्तं सर्वविद्याधिपत्वं विद्यापालनमुखेन सिद्धं भवति। अयं ब्रह्मणो द्वितीयेतिहासः।

अस्मिन् इतिहासे ब्रह्मणो मानसस्य द्वेधागतिर्दृश्यते एका पराविद्यासंबद्धा एका अपराविद्यासंबद्धा। तत्रापि पराविद्यासंबद्धायां बोधसृष्टौ तमोवृत्तिः सर्वथा नास्ति। अपरस्यां बोधसृष्टौ तु पित्राद्यादेशपालननियंत्रिता तमोवृत्तिः सत्यपि सा लोकयात्रां निर्वहन्ती वर्तते। इति बोधसृष्टेर्वैचित्र्यं ब्रह्मकृतं आदरपात्रतां भजते। अतएव विद्यापालकत्वात् विद्याधिपत्वमपि ब्रह्मणि विराजते। कथमेतदिति इतिहासमुखेनैव प्रमाणीभवति।

तत्रादौ पराविद्यारक्षणार्थं ब्रह्मा सनकादीन् चतुरः ससर्ज, यत्र ब्रह्मविद्यायाः परायाः अवस्थितिः चिराय समभूत्। अत्र ध्यानपूतं मनः उपादानत्वेन स्मर्तव्यम्। तदाहुः—

भगवद्ध्यानपूतेन मनसान्यान्ततोऽसृजत्।
सनकं च सनन्दं च सनातनमथात्मभूः॥ इत्यादिना

(श्रीमद्भागवतम् ३।१२।३)

सनातनादिभ्रातृसृष्टौ पराविद्यासंरक्षणे जातेपि अपराविद्या रक्षिता न भवति सनकादि सृष्ट्युपादाने मनसि भगवद्ध्यानपूतत्वमात्रस्य ३।१२।६ पद्येन उक्तत्वात्, तदानीं—

एतन्मतं समातिष्ठ परमेण समाधिना।
भवान् कल्पविकल्पेषु न विमुह्यति कर्हिचित्॥

(श्रीमद्भागवतम् २।९।३६)

इत्यादिना श्रीमन्नारायेणन ब्रह्मणे दत्तस्य वरस्यातिप्रावल्याच्च।

अत्र सृष्टौ भगवद्ध्यानपूतत्वोक्त्या ब्रह्मणि, वर्तमानाया क्रमेणोत्तरोत्तरम-भीप्सितसृष्टिपरंपरासंपादिकाया जगत्सिसृक्षायाः संक्रमणं सनन्दनादिभ्रातृषु नाभूदिति शुकाचार्यैः संबोध्यते। सोयं बोधसृष्टेः पराविद्यापालिकाया इतिहासः।

अथ अपराविद्यापालकत्वबोधकः ब्रह्मण इतिहासः स्मार्यते। तस्यायमुप-क्रमः—बोधमयान् सनकादीन् अधिकारिणः पुत्रान् दृष्ट्वा तेषां पुरतः जनकोब्रह्मा जगत्सृष्ट्यादेशं प्राकाशयत्। तदाकर्ण्य निवृत्तिधर्मनिरता आत्मजा भगवद्-ध्यानपूतान्तःकरणाः प्रत्याचख्युः। तदा ब्रह्मा 'काम एव प्रतिहतः क्रोधो भवति' इति न्यायेन चुक्रोध। स्पष्टं चैतत्—

**'क्रोधं दुर्विषहं जातं नियन्तुमुपचक्रमे'** (श्रीमद्भागवतम् ३।१२।६) इत्यादिना।

क्रोधप्रादुर्भावपरे स्मिन् इतिहासे एकं गूढं तत्त्वमस्ति। तद्यथा—ब्रह्मणि क्रोधोदयमात्रेण तमः प्राबल्यात् भगवान् रुद्रः पुत्रभावं प्राप्तः। अत्र यक्षरक्षः सृष्ट्योरन्तरमस्ति। रुद्रेकर्कटसधर्मत्वाभावात् पित्राज्ञापालकत्वाच्च। रुद्रसृष्ट्यनन्तरं ब्रह्मणः क्रोधो नियन्त्रितोऽभूत्।

रुद्रसृष्टावपि अपराविद्यापालनं नाभूदिति तद्रक्षितुकामः जगद्रिरक्षुः कामानुबन्धिनीं बोधसृष्टिं अपराविद्यामयीं पित्रादेशनियन्त्रितां संपादयितुमैच्छत्। तदा तन्मुखादेव वाक् सृष्टा पुरोवर्तिनी बभूव इति अनुमीयते। अत एव तामाश्रित्य यन्मिथुनं स प्राप तच्च मनुदंपतीरूपम्। इत्ययं बोधसृष्टेः अपर इतिहासः। अत्र श्रीशुकाचार्याः वाचं दुहितृत्वेन तथा तां विलोक्य ब्रह्मणः कामप्रसक्तिं च वर्णयन्ति। तदाहुः—

> **वाचं दुहितरं तन्वीं स्वयंभूर्हरतीं मनः।**
> **अकामां चकमे क्षत्तः सकाम इति नः श्रुतम्॥** इति
>
> (श्रीमद्भागवतम् ३।१२।२८)

अन्यत्रापि—

> **रोहिद्भूतां सोऽन्वधावत् ऋक्षरूपो हतत्रपः॥** इति च
>
> (श्रीमद्भागवतम् ३।३१।३६)

अत्रैव एवंविधमितिहासं श्रुत्वा आक्षेपकाः शंकन्ते। ब्रह्मा भगवान् कथं वाचं दुहितरं सकामो भूत्वा चकमे, तां मृगरूपिणीं कथं वा मृगो भूत्वा अधावत् इति।

न चात्रैवं जनकचरितं जुगुप्सितं सन्निरीक्ष्य मुनयो योगीश्वराः एव तं बोधयामासुः इति शुकवाक्यादेव अवगच्छामः—

> **तमधर्मे कृतमतिं विलोक्य पितरं सुताः।**
> **मरीचिमुख्या मुनयो विश्रम्भात् प्रत्यबोधयन्॥**
> **नैतत् पूर्वैः कृतं त्वद्य न करिष्यन्ति चापरे।**
> **यत्त्वं दुहितरं गच्छेरनिगृह्यांगजं प्रभुः॥**
> **तेजीयसामपी ह्येतत् न सुश्लोक्यं जगद्गुरो॥**इति॥
>
> (श्रीमद्भागवतम् ३।१२।२९, ३०)

इति वाच्यम्। पराविद्यादृष्टया उत्तरितत्वेपि अपरादृष्टयानुत्तरितत्वात्।

सा च अपराविद्यादृष्टिरित्थं निवेद्यते। तथाहि—

उत्तरप्रजायाः बोधसृष्टौ पित्रादेशनियन्त्रितत्वे सति सर्जनशीलत्वं तिष्ठापयिषुर्ब्रह्मा कामशमनोपायं जिज्ञासति स्म। तदैव कामना पूरिकां कर्मविद्यां ऋगादिरूपां पुरतो मुखान्निसृतां ददर्श। तत्र पुत्रकामेष्टिप्रभृत्यनेकयागान्

सोऽजानात् । तैः सर्वविधफललाभमपि अवागच्छत् । तदा स तां प्रति अधावत् नत्वभ्यध्यायत् । ध्यानेन सर्जने अभिमतफलप्राप्त्यदर्शनात् । तदिदं ब्रह्मधावनं बोधसृष्टौ स्वाभिमतप्रजाप्राप्तिसाधनत्वान्न विफलमिति तदीयचरित्रेणानुमीयते इति न काप्यनुपपत्तिः । एतेन ब्रह्मणः नीतिरियं सुनीतिरिति वक्तुं शक्नुमः । यतः अत्र ब्रह्मनीतौ सफलत्वेन निर्णीतायां जुगुप्सितत्वं लोकयात्रादृष्ट्या नास्ति।

अपि च यदि ब्रह्मणः तन्वीं प्रति धावने जुगुप्सितत्वाग्रहः तर्हि नारदं प्रति ब्रह्मणोक्तस्य 'न भारती मेऽङ्ग मृषोपलक्ष्यते' इत्यादि वचनस्यायाथार्थ्यमेव स्यात् ।

**न भारती मेऽङ्ग मृषोपलक्ष्यते न वै क्वचिन्मे मनसो मृषा गतिः ।**
**न मे हृषीकाणि पतन्त्यसत्पथे यन्मे हृदौत्कण्ठचवताधृतोहरिः ।।**

(श्रीमद्भागवतम् २।६।३३)

यद्यपि 'वाचं दुहितरं' पद्ये वाचः स्वरूपं अत्रास्तिरोहितमेव तथापि २८ पद्यानन्तरं तस्मिन्नेव १२ अध्याये ३७ श्लोक एव ऋग्यजुरित्यादिभिः पद्यैः ४७ श्लोकपर्यन्तं वाणीस्वरूपं आचार्यैः निरूपितं कर्मविद्याप्रकाशिकात्वं मे वाचि दुहितरि स्पष्टं भवति । अपि च 'वाचं दुहितरमि'ति पद्ये चकमे इत्यनेन अकामायाः दुहितुः पश्चात् कामुकस्यैव ब्रह्मणः धावनं ज्ञापयन्ति शुकाचार्याः । तस्यायमाशयः—जनकादेशपरतन्त्रतासहितस्य सर्जनकामनान्वितस्य नैरन्तर्येण अवस्थानं ब्रह्मणा यत्कल्पितं बोधसृष्टौ तस्यैव फलं मनुवंशपरंपरा । यत्र सर्वविधमौन्नत्यंदरीदृश्यते ।

सोयं ब्रह्मकृतः बोधसृष्टेः वैचित्र्यभेदः तेषु योगीश्वरेषु मरीच्यादिष्वपि अनुभूयते न केवलं मनुपरंपरायामेव ।

तथोक्तं भागवते तत्रैव—

**तपसा विद्यया युक्तो योगेन सुसमाधिना ।**
**ऋषीन् ऋषिर्हृषीकेशः ससर्जाभिमता प्रजाः ।। (३।२०।५२)**

ननु वाचो दुहितुरकामात्वे किं रहस्यमितिचेदेवम्—

यथा ज्ञानवैराग्ये ग्राहकाभावाद्वृद्धभावं प्राप्ते भक्तिस्तु मधुरायां तरुणी जाता इति यथा भागवतमाहात्म्ये (१।४५) उच्यते तथैव ऋगादिवाग्यदा ब्रह्ममुखात् प्रादुर्बभूव तदा तां न मुनीन्द्राः सिद्धाश्च न चकमिरे कर्मबोधिकां वाचमिति साऽकामैवाभूत् । "न स्वैरी स्वैरिणी कुतः" इति न्यायात् । इत्येव दुहितुर्वाचो कामात्वरहस्यम् ।

ननु पूर्वोक्तं मनुसमवेतं सकामं सत् पित्रादेशपारतन्त्र्यं मध्यात्वा मरीच्यादिभिः कथं ब्रह्मदेवः आक्षिप्त इति चेत् सत्यम् । निर्गुणत्वबोधकश्रुत्यनुगामिनः सन्तोब्रह्मज्ञाः यं कमपि सकामं उपहसन्त्येव प्रपंचस्य सत्यतयाभासमानस्य उपनिषद्दृष्ट्या मृगमरीचिकातुल्यत्वात् । एतदेव ज्ञापयितुं 'रोहिद्भूतां, इत्यु-

पर्योद्धृतोक्तिः सुसंगता भवति।

अन्यच्च ब्रह्मणा परमेश्वरेण प्रदर्शिते चरित्रे काचन साहित्यसरणिः संभाव्यते इत्यपि वक्तुं शक्यम्। तथाहि—

एतत्सिद्धान्ते यत्र भावपदार्थनिरुक्तिः कृता, तत्र निर्विकारस्य मनसः यः आद्यः स्पन्दः स एव भावः अव्यभिचारी भवति इति निरूप्यते। तथाच निर्विकारस्य ब्रह्मणो यो मानसो व्यापारः वाचमधिकृत्याभूत् यतः स सफलः सन् मनसि कामं प्रापय्य कामयुक्तेन मनसा मनोरुत्पत्तिरूपं समीचीनं फलं समभूदिति नात्र ब्रह्मणो-विकृति वैय्यर्थ्यं वक्तुं शक्यम्।

एवं सत्यपि ब्रह्मणा प्रदर्शितेन चरित्रेण नीतेः कुत्र प्रावल्यं कुत्र च धर्म-प्रधानायास्त्रय्याः इति तु अवश्यं स्मरणीयतामर्हति। अधोनिर्दिष्टेन विवेचनेन। तद्यथा—

लोकयात्रामधिकृत्य यावत्पर्यन्तं बोधसृष्टौ काचनापि त्रुटिर्नोपलभ्यते ताव-त्पर्यन्तं धर्मप्रधानायास्त्रय्या एव प्रबल्यम्। अतएव तदनुरुध्य ब्रह्मणं मुनीन्द्राः उपजहुः विगीतत्वं चप्रकाशयामासुः। 'न सुश्लोक्यं जगद्गुरो' इत्युक्त्वा दुहितुर्वाचः काम-नायामधर्मत्वं व्याचख्युः। तच्छ्रुत्वा ब्रह्मा व्रीडितो भूत्वा देहत्यागरूपं प्रायश्चित्तं व्यदधात्। यदा तु जगत्सृष्टेः पूर्णता नाभूत् तदा वर्णाश्रमसृष्टिः कर्तव्येति निश्चयो-ऽभूत् तदा तस्य जगद् यात्रायाः सुचारुत्वार्थं नीतेः प्राधान्यं भवति यत तन्मुखेनैव त्रय्यपि रक्षिता भवति। तदानीं कर्मकाण्डमयी वागेव पुरतः उदिता इति तद्-व्याजेन ब्रह्मणो मनसः काममयत्वं संजातम्। तेनैव लोकयात्रारक्षको मनुः सृष्टि-कामनावान् पित्रादेशपरतन्त्रो बभूव। त्रयी च प्रसन्ना सति सनकादिमुखद्वारेण आत्मनस्तोषं प्राकाशयत्। तथा चोक्तं—

> तदा मनून् ससर्जान्ते मनसा लोकभावनान्।
> तान् दृष्ट्वा ये पुरा सृष्टाः प्रशशंसुः प्रजापतिम्॥
> अहो एतज्जगत्स्रष्टः सुकृतं बत ते कृतम्।
> प्रतिष्ठिता क्रिया यस्मिन् साकमन्नमदाम हे॥ इति
>
> (श्रीमद्भागवतम् ३।२०।५०-५१)

इत्थं च दण्डनीतिप्रधानतामनुलक्ष्य ब्रह्मणो वाचः पश्चाद्धावनेन अनुमितं काम-विशिष्टं चेतो यत्संपन्नं तथाविधेन मनसा उपादानभूतेन पित्रादेशपरतन्त्रः मनुवंशोत्पत्तिर्जाता। तेन ब्रह्माणं अधिकृत्य संभूता आक्षेपकाणां शंका जुगुप्सितता च समाहिता भवति भवति च ब्रह्मचरित्रप्रतिपादकानां वचनानां सर्वेषाम-विरोधोऽपि।

एवं रीत्या ब्रह्मसंपादितचरित्रे या शंका प्रादुरभूत् तत् समाध्यर्थंकृतेन व्यापारेण नीत्यधिष्ठितेन बौद्धिकेन सरस्वतीसमाश्लिष्टः परमपुरुषः परमेश्वरः अक्षमालाभयाभीष्टकमण्डलुधरः वेधास्तुष्यतु। इति शम्॥

# भारतीया दर्शनविद्या

—डॉ० बलजिन्नाथपण्डितः

पाश्चात्येषु देशेषु या दर्शनविद्याः प्रचलिताः सन्ति, तास्तावन्मानवबुद्धि-परिस्पन्दमात्रफलभूताः सत्यो जनकल्याणप्रयोजना, जनजीवनं प्रति स्नेहतः प्रवृत्ताः, मानवीय-लौकिकानुभूति-जाल-प्रतिष्ठिताः, तर्कवितर्कमय्या शैल्या प्रचारिताः सन्ति। भारतीयाः दर्शनविद्या यद्यपि भूयसा तथा भूता एव, तथापि तासां मुख्यं स्रोतो नैव लौकिकानुभूतिमात्रनिष्ठम्। ताः अनुभूतयस्तत्रावश्यमुपयोगिन्यः सत्योऽपि नैव दर्शनविद्यासारभूतस्य तत्त्वस्य मुख्यं प्रतिष्ठास्थानम्। तर्कवितर्काश्च तत्-प्रतिपादनसहायभूता अपि नैव वास्तविकदर्शनतत्त्वाङ्गभूताः। मुख्यं यद् भारतीय-दर्शनविद्यानां स्रोतस्तत्तु योगजसाक्षात्कारनिष्ठमेव। तत एवोक्तं महामुनिना यास्केन—'साक्षात्कृतधर्माण ऋषयो बभूवुः' इति।

लोके तावदनुभवो द्विप्रकारको मुख्यतया प्रचलति। स च प्रत्यक्षपरोक्षात्मकः। प्रत्यक्षानुभूतिस्तावदिन्द्रियार्थसन्निकर्षजन्या, मानसप्रत्यक्षात्मिका च। परोक्षा चानुमानादिप्रमाणजा। परमृषीणां या योगजा दार्शनिक्यनुभूतिरसौ नैव प्रत्यक्षात्मिका, तस्यामिन्द्रियोपयोगस्याभावात्। नाप्यसौ परोक्षात्मिका, तस्याः साक्षादुपजायमानत्वात्। न हि किमपि साक्षात्प्रकाशमानं ज्ञानं परोक्षमिति वक्तुं मन्तुं वा शक्यम्। ततोऽसावनुभूतिः परोक्ष-प्रत्यक्षोभयभिन्ना सती विद्वद्भिर-परोक्षेति कथ्यते सिद्ध-सम्प्रदाये। एतस्यामपरोक्षायामनुभूतौ स्वात्मा स्वात्मानं स्वयं स्वेनैव साक्षात्करोति। उक्तं ह्यनेनैवाभिप्रायेण महाकविना कालिदासेन कुमारसम्भवे—

'यमक्षरं क्षेत्रविदो विदुस्तं स्वात्मानमात्मन्यवलोकयन्तम्।' इति। इत्थं भारतीयं यद् दर्शनं तन्मूलतः स्वात्मसाक्षात्कारनिष्ठम्। तत्रापरोक्षे साक्षात्कारे स्वात्मा स्वयमेव प्रकाशते, प्रकाशमानं च स्वात्मानं स्वयमेव विमृशति 'अहम्' इति। न तत्र किमपीन्द्रियमन्तःकरणं वा कमपि सहयोगं ददाति। स्वात्मैव स्वात्मानं स्वेनैवप्रकाशेन प्रकाशमानं साक्षात् पश्यन् विमृशति 'अहम्' इति।

अत्र कश्चिदेवं शङ्केत—यदि भारते स्वात्मसाक्षात्कार एवास्ति दर्शनं, तर्हि केन कारणेन भारतीयदर्शनविद्यासु पारस्परिकवैमत्यकृतो भेद इति। न हि स्वात्मा जनानां भिन्नभिन्नस्वरूपः। अत्रोच्यते—प्राणिनां स्वात्मात्र लोके चतसृष्ववस्थासु भिन्नभिन्नप्रकारतया प्रकाशमानः संस्तथा तथैव विमृश्यते, वर्ण्यते च। ताश्चा-वस्थाः जाग्रत्-स्वप्न-सुषुप्ति-तुर्याख्याः। तत्र जाग्रदवस्थायां प्राणी शरीरमेवात्मानं

मन्यते। शरीरात्मवादिनो ह्यत्र चार्वाकाः। स्थूलतममेतद्दर्शनम्। सूक्ष्मं च स्वाप्नं दर्शनम्। स्वप्नावस्थायामन्तःकरणमेव जनः स्वात्मानं मन्यते। वर्तते च तदनुकूलोऽपि संसारो यत्र सूक्ष्मशरीरभाजो देवगन्धर्वादयो निवसन्ति। तदेतत् सूक्ष्मप्रपञ्चदर्शनं स्वर्गनरकादिवादिनां पौराणिकमीमांसकादीनाम्। संसारेऽत्र अन्येष्वपि राष्ट्रेषु लोकाः स्वाप्नदर्शननिष्ठाः सन्तस्तत्तत्स्वर्गलोकसुखाप्तये स्वयं यतमानास्तदर्थं चोपदेशजातं कुर्वन्तो लभ्यन्ते। किञ्चिन्मात्रसूक्ष्ममेतद् दर्शनम्। ततोऽपि सूक्ष्मतरदर्शिनो नैयायिकवैशेषिकाः। तैः पाशुपतयोगाभ्यासतः प्राप्ता स्वात्मनः सौषुप्ती स्थितिरेव परमोपादेयतया मन्यते उपदिश्यते च। सा तावत् स्थूला सुषुप्तिस्तैरपवर्गनाम्नोक्ता। तामवस्थां प्राप्तः प्राणी स्वात्मनो ज्ञानसुखादीनां विशेषगुणानां स्वामीसन्नपि न तेषु प्रवर्तते। विषयोन्मुखे ज्ञानसुखादावप्रवर्तमानः आकाशवच्छून्यतयातिष्ठन्नाधिभौतिकादिदुःखेभ्यो मुक्ति लभते। परं नैव स्वात्मनो भावात्मिकामानन्दमयतां रसयति, न चापि स्वात्मन ऐश्वर्यस्यानन्दमास्वादयति। सैषा तेषामपवर्गाख्या दशा सर्वथा प्रवृत्तिशून्यतामयी स्थितिराकाशकल्पा। तत एवोक्तं हैमे कोषे—'अपवर्गस्त्यागमोक्षयोः क्रियावसाने साफल्ये' इति। अस्यां स्थूलायां सुषुप्तौ प्राणी प्रवृत्ति परित्यजति, आधिभौतिकादिदुःखेभ्यो मुक्ति लभते, तस्य क्रियाणामन्तो भवति, जीवनं च दुःखनिवृत्तिरूपं साफल्यमवाप्नोति। सैषा स्थितिः सुषुप्तेः सोपानरूपाऽऽकाशकल्पा स्वभावतः।

अपवर्गवाद्यपेक्षया सूक्ष्मतरं सौषुप्तदर्शनं सांख्ययोगदर्शनोपासकानाम्। ते पातञ्जलयोगोपायतो निर्विकल्पां समाधिमभ्यस्य जीवनान्ते तां सुषुप्ति लभन्ते यस्यां ते बाह्यान्तः करणैरपि परित्यक्ताः सन्तः केवलत्वं भजन्ते। संसारावस्थायां ते बुद्धयोपगूढाः सन्तोऽन्तर्बहिरिन्द्रियैः सुखदुःखादिभोगान् भुञ्जते, परं तस्य कारणमविवेकः। ते हि स्वात्मानं बुद्धितत्त्वसम्मिश्रमेवाभिमन्यमानाः बुद्धिपरिणामभूतान् तांस्तान् भोगान् साक्षात्कुर्वन्तः सन्तः सुखदुःखादिभोगभाजो भवन्तोऽपि यदा स्वात्मानं बुद्धितत्त्वाद् विविक्तं पश्यन्ति, तद्विवेकं च भूयोभूयोऽभ्यस्यन्ति, तदा शरीरपातावसरे तेषां बुद्धिः सर्वैरपि बाह्यान्तःकरणैः सह तांस्त्यक्त्वा मूलप्रकृतौ विलीयते। तदा ते सर्वथा केवलत्वं लभन्ते। केवलस्य तादृशं भावं सांख्ययोगनिष्ठा दार्शनिकाः कैवल्यं कथयन्ति। सैषा कैवल्यात्मिका मुक्तिरपि कापि सूक्ष्मा सुषुप्तिरेव। अत एवाचार्याभिनवगुप्तपादैः समाधिदशापि सुषुप्तिप्रकारमध्ये गणितास्ति। परमेषा सुषुप्तिरपवर्गापेक्षया सूक्ष्मा। अस्यां सुषप्तौ निष्ठाभाजो ह्यस्माकं सांख्ययोगशास्त्रोपासकाः।

बौद्धानां राद्धान्ते सूक्ष्मस्थूलशरीरोत्तीर्णा आलयविज्ञानपरम्परैवाहमित्याकारतयावभासते। तच्चालयविज्ञानं क्षणिकविज्ञानप्रवाहात्मकमहमित्याकारतयावभासते, प्राक्तनक्लेशसंस्कारपरम्परा प्रभावतः। परं यदा क्लेशानां क्षयो जायते, तदाऽसावालयविज्ञानपरम्परापि लुप्तैव भवति। असावालयविज्ञान-

परम्परोच्छेद एव निर्वाणम्। निर्वाणं हि तावदुच्छेद एव। स च तथाविधो—मोक्षोऽभावे लयः इति। तत एवोक्तं सौन्दरानन्देऽश्वघोषेण—

'दीपो यथा निर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम्।
दिशं न काञ्चिद् विदिशं न काञ्चित् स्नेहक्षयात् केवलमेति शान्तिम्॥
एवं कृतीनिर्वृतिमभ्युपेतो नैवावनिं गच्छति नान्तरिक्षम्।
दिशं न काञ्चिद् विदिशं न काञ्चित् क्लेशक्षयात् केवलमेति शान्तिम्॥' इति

सैषा परा सुषुप्तिर्यस्यामालयविज्ञानात्मकस्याहमिति विमर्शस्यादि लय इव जायते।

एतदुत्तीर्णा च सुषुप्तेरसौ स्थितिर्यस्यां तुर्यदशाया अपि मनागुन्मेषो जायते। तद्वशात् तस्या अभ्यासिनः स्वात्मानमन्तर्बहिष्करणशून्यमभावतुल्यमिव दृश्यन्तोऽपि स्वात्मनः सच्चिदानन्दमयीं सत्तामवश्यमनुभवन्ति। एतत् फलं तुर्यदशोन्मेषस्य। परमुन्मिषितमात्राऽसौ तुर्या स्थितिरात्मनः स्वभावभूतं पारमैश्वर्यं नैव प्रकाशयति। ततस्ते परमेश्वरत्वं मायोपाधिकृतमसत्यमेव प्रतिपादयन्ति, न स्वात्मनः स्वभावभूतम्। स एष सुषुप्तेः प्रभावः। सच्चिदानन्दतानुभवश्च तुर्यदशोन्मेषस्य फलम्। इत्थमेता अपवर्ग-कैवल्य-निर्वाण-ब्रह्मनिर्वाणाद्या—परिभाषाः मूलतो भिन्नभिन्नानभिप्रायानभिप्रेत्यैव पूर्वगुरुभिः प्रवर्तिताः सत्योऽपि कालचक्रे प्रवहमाणे विदुषां शाब्दे प्रयोगे, ग्रन्थकाराणां च लेखनकलायां चिरादेव समानार्थकतां प्राप्ताः सन्ति भाषाविज्ञाननियमानुसारम्। परं मूलत एताः परिभाषाः सुषुप्तेः सोपानभेदेष्वाभासमानस्यात्मनः स्वरूपस्य स्वभावस्य च विचारेण भिन्नभिन्नार्थप्रतिपादकतयैव प्रयुक्ता अभवन्निति सिद्ध्यति परिभाषाणामेतासां यौगिकव्याख्यानुसारम्। रूढिर्हि योगापहारिणी। तत एव चिरादेताः समानार्थकतयैव ग्रन्थकृद्भिः प्रयुक्ताः सन्ति। तदेतद् विम्रष्टव्यं सुधीभिः। समाधेरभ्यासभाजो दार्शनिकगुरवो यतः सुषुप्तेर्भिन्नभिन्नान्येव सोपानान्याश्रितस्यैव स्वात्मनो दर्शनमवाप्तवन्तस्ततस्तेषामुपदेशा अपि भिन्नभिन्नप्रकारकाः इति नात्र दोषदर्शनस्यावकाशः। ततोऽपरोक्षमात्मदर्शनमेव हि भारतीयं दर्शनं बहुशाखाविभिन्नमपि तद्दर्शननिष्ठमेवेति विदाङ्कुर्वन्तु सुधियः।

तत्र वास्तविकतया शुद्धा या तुर्यदशोचिता दार्शनिकी दृष्टिरसौ पराद्वैतशैव-दर्शन-गुरूणामेव। तैः पातञ्जलयोगापेक्षयोत्कृष्टतरस्यागमिकस्य शाक्तशाम्भवादिरूपस्य साक्षात् स्वात्मदर्शनोपायभूतस्य शैवयोगस्याभ्यासतः तुर्यतदतीतदशयोरवस्थितस्य स्वात्मनः स्वरूपस्य साक्षात्कारमवाप्य तदनुसारमेव तस्यैव पराद्वैतसिद्धान्तस्योपदेशनं प्रतिपादनं च कृतं यदनुसारं बन्धो मोक्ष इत्युभयं पारमेश्वरलीलाविलासात्मकमेव। परमेश्वरः स्वयं जीवरूपतया जगद्रूपतया च स्वात्मानं नटवदवभासयति। तस्यैषा नाट्यलीला निग्रहानुग्रहात्मकतया द्विरूपा।

निग्रहकृत्यमभिनयन् स्वयमेवानन्तप्रकारकबद्धजीवनिकायरूपतयाऽऽत्मानमव-भासयञ्जगल्लीलामभिनयति, अनुग्रहकृत्यं चाभिनयञ्जीवान् स्वात्मनो वास्तवि-कस्य परमेश्वरतात्मकस्य स्वभावस्य प्रत्यभिज्ञां प्रति प्रेरयति। स्वात्मरूपस्य जगतः स्वतो भिन्नतयावभासं कुर्वन् सृष्टिकृत्यं करोति। सृष्टं जगन्नियतिकृत-नियमानुसारं सञ्चालयन् स्थितिकृत्यमभिनयति। काले काले च तं तं सृष्टं स्थापितं च प्रपञ्चं लयं नयन् संहारकृत्यं करोति नटवदेव। सृष्टान् जीवान् मोहान्धकारगर्त्तेष्वधोऽधो नयन् विलयकृत्यं निग्रहापरपर्यायमभिनयति, गुरुशास्त्रा-द्युपासनोपायेन केषामपि जीवानामुद्धरणं कुर्वंस्तान् भक्तिज्ञान-योगाभ्यासतो सद्गुरूपदेशानुसारं स्वात्मनो वास्तविकस्य परमेश्वरात्मकस्य स्वरूपस्य प्रत्यभिज्ञां प्रत्युन्मुखयँस्तेष्वनुग्रहकृत्यं करोति। सैषा सृष्टि-स्थिति-संहार-निग्रहानुग्रहकृत्य-पञ्चकात्मिका पारमेश्वरी स्वभावभूता लीला, यदाश्रितं सत् सर्वमपि सदसद्रूपं जगत् सदा प्रवाहरूपतया संसरति। एतस्य वास्तविकस्य सत्यस्य साक्षादनुभूत्या स्वात्मनः परमेश्वरतायाः साक्षात् प्रत्यभिज्ञैवास्य पारमेश्वरलीलाविलासस्य चरमं फलम्। तथाविधं तज्जीवनफलमास्वादयन्नेव साधको वस्तुतः कृतकृत्यो भवति, शरीरपातानन्तरं च परिपूर्णां परमेश्वरतां रसयति परमेश्वरेण साकं पूर्णमभेदमवाप्नुवन्। इत्येषास्त्युत्कृष्टतमा दार्शनिकी दृष्टिर्भारतीयानां दर्शन-गुरूणाम्। एतदनुसारं संसारस्यावभासकारिणी याऽसौ माया नासौ परमेश्वरस्य कापि बाह्या उपाधिः। किञ्च बाह्या वाऽबाह्या वा, सद्रूपावाऽसद्रूपा वा निर्वचनीया वाऽनिर्वचनीया वा, कथमसौ ब्रह्मतत्त्वं स्वभावतः शुद्धं सज्जीवेश्वर-जगद्रूपतयाऽवभासयितुं क्षमेत। चेत्तथा कर्तुं समर्थाऽभविष्यत्, तदा तस्या एवोत्-कृष्टत्वं सिद्धयेदकिञ्चित् करस्य ब्रह्मतत्त्वस्यापेक्षया। किञ्च सद्रूपा वाऽसद्रूपा वा। निर्वचनीया वाऽनिर्वचनीया वा यदि सा ब्रह्मणो भिन्ना माया क्वाप्यभविष्यत् तदा द्वैतवाद आपतेत्। एतैः कारणैरसौ मायावादो नैव यथार्थदर्शनवादः। केवलं कलहायमानैर्विज्ञानवादिभिः साकं कलहकरणसाधनभूत एवासौ वादो न तुर्य-दर्शनानुभूतिनिष्ठ इति वेद्यं सुधीभिः। तत एव गौडपादाचार्येण सुभगोदयस्तुतौ, शङ्कराचार्येण च सौन्दर्यलहर्यां शैवस्य पारमैश्वर्यवादस्यैव माहात्म्यं गीतमस्ति। शाङ्करेषु मठेष्वद्यापि शैव्याः श्रीविद्योपासनायाः परम्परा प्रचलति। भासुरानन्द-नाथतुल्यैर्वेदान्तगुरुभिरपि प्रकर्षं प्रापिताऽऽगमिकी परमेश्वरता स्वग्रन्थेषु। माया-वादश्च केवलं विज्ञानवादिभिः साकं कलहप्रपञ्चे एवोपयोगी, न स्वात्मविज्ञानो-पार्जने। ततो नासौ माया ब्रह्मणो बाह्या काप्युपाधिरपितु तस्य स्वात्मभूता-ऽसम्भवस्य सम्भवत्वकारिणी स्वातन्त्र्यात्मिका शक्तिरेवेति हि सैद्धदर्शन-सिद्धान्तः।

इत्थं सर्वास्वपि दर्शनविद्यासूत्कृष्टैषा परा दर्शनविद्या यदनुसारं परमेश्वर एव हि सर्वं जगत्, किञ्च यदनुसारं विश्वमपि जगत् परमेश्वरे शुद्ध चिद्रूपतया,

पारमैश्वर्यशक्तिरूपतया च सदा विद्यमानमेव सत् तदैश्वर्यलीलयैव सृष्टि-स्थिति-संहार-विधानानुग्रहलीलाविषयतामुपयाति। एवं विधानस्य दर्शनतत्त्वस्य ज्ञानं विज्ञानं च पुराकाले ऋषीणां सकाशेऽविद्यत। प्राप्ते च कलिकाले यदा ते ऋषयः कलापिग्रामप्रमुखानि मानवदृष्ट्या अदृश्यानि स्थानानि प्रति प्रयातास्त-दाऽस्याः शैव्याःदर्शनविद्याया उच्छेद इव जातः पृथिव्याम्। विरलविरला अधिकारिजनास्तेषामृषीणामनुग्रहतोऽस्याः प्रयोगप्रक्रियां यदा कदाचिदवाप्त-वन्तः। तैश्च तत्र तत्र स्वकीयेषु स्तोत्रादिषु मनाक् प्रतिपादिता परमरहस्यात्मिक-यैव शैल्या। तत्र तत्र मनाक् समुन्मेषं प्राप्तवत्येषा पराऽऽध्यात्मविद्याऽस्मादृशैर्जनैः सैद्धदर्शनमिति नाम्ना क्वचित् क्वचित् स्मृताऽस्ति। एतेषां सैद्धदर्शनग्रन्थानां मध्ये महाकवि श्रीवत्स-कृता चिद्गगनचन्द्रिका, श्रीसिद्धनाथापरपर्याय-श्रीशम्भुनाथकृतं क्रमस्तोत्रं, श्रीस्वतन्त्रानन्दनाथविरचितो मातृकाचक्रविवेकः, श्रीविरूपाक्षनाथविरचिता विरुपाक्षपञ्चाशिका इत्यादीनि ग्रन्थरत्नानि लोके-ऽद्यापि लभ्यन्ते। सर्वाण्यप्येवंविधानि शास्त्राणि रहस्यमय्या शैल्या विरचितानि रहस्यसाधनोपायपरैरेव सम्यगवबोध्यानि सन्ति।

१. उतत्वः पश्यन्न ददर्श वाचमुतत्वः शृण्वन्न शृणोत्येनाम् ।
उतोत्वस्मै तन्वं विसस्रे जायेव पत्य उशती सुवासाः ॥
—ऋग्वेदः १०.७१.४

२. सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखायः सख्यानि जानते भद्रैषा लक्ष्मीर्निहिताधि वाचि ॥
—ऋग्वेदः १०.७१.२

These Verses in the Vedas hint at the fact that the Vedic seer had the profound sense of appreciation for the concealment of meaning which lends charm to speech (Vak). He knew also well that this hidden meaning can be comprehended and admired not by everyone who looks or hears speech but by a few who have rare quality of probing deep into the outer cover of it.

By the analysis of the Vedic verses it becomes abundantly clear that the seed of Pratiyamana (suggested meaning) and later that of the theory of Dhvani was sown even as early as the composition of the Rigveda. When we study the Dhvanyaloka of Anandavardhana, we meet the same idea of the vedic seer echoed in the Karika of the Dhvanyaloka. Anandavardhana like the Vedic seer admits that not every body who reads or hears the Dhvani Kavya is able to grasp and appreciate the beauty of Dhvani. It is only a few called the Sahridayas (connoisseurs) gifted with the aesthetic sensibility who are worthy of comprehending it. He says that the Pratiyamana Artha is not understood by merely learning grammar and dictionary. It is understood only by those who have insight into the true significance of poetry.[3] He, therefore, ridicules Mimamsakas and Tarkikas (logicians) that their proficiency in deliberations and dispositions of linguistic expression, however great it may be, is of no use in the comprehension of the Pratiyamana Artha, which remains covered by the wrapper of surface meaning of words and is grasped only by connoisseurs who have an ability of peeping into it.

The dictionary or lexical meaning of a word analysed by the grammarians and Mimamsakas has no charm and attraction. In Dhvani-kavya the meaning of word viewed in

---

३. शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते ।
वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम् ॥

—ध्वन्यालोकः, १.७

its context attains beauty and dimension and is far more superior to the derivative or lexical meaning given by grammar or dictionary. A dictionary or grammatical meaning of word detached from any particular context is dead because it is detached from the living flow of speech. A dictionary or grammar is a cemetary of the dead. There in ceremonial order lie the bodies of words waiting to be given a new lease of life by the poets of Dhvani.

Anandavardhana in the Dhvanyaloka fully realised this circumstantial value of word-meaning and he and stepping into his shoes Mammata too; both are, therefore, often seen passing strictures against those who do not look at the meaning of words in their proper context.

It is usual with linguistics and etymologists to look at words as completely divorced from their associations and context and take them at their face value. But Anandavardhana realised that taking the word away from its surroundings and context is to kill it by robbing it of its colour and glow. A word has an aura of meaning which is given to it by the context. Those who are not aware of the context in which word is used cannot fully grasp the inner meaning of word which is termed as Pratiyamana by him and is, therefore, compared with the charm and glamour of lovely damsels.[4]

As already pointed out the seed of this idea of Pratiyamana can be traced as far back as the Rigveda itself. Some Vedic verses pregnant with the idea of Pratiyamana Artha might have inspired Anandavardhana but it appears that it was the great grammarian Bhartrihari, the supermost authority on the linguistic expression, who cast a wide shadow of influence over him in the formulation of his theory of

---

४. प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत्तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥
—ध्वन्यालोकः १.४

Dhvani. An ordinary observer would think that the system of Dhvani in Sanskrit Poetics stands wide apart from the system of grammar expounded by Bhartrihari. But the careful study of the Vakyapadiya and the Dhvanyaloka reveals that both are to some extent linked with each other as both Bhartrihari and Anandavardhana deal with problems relating to linguistic expression, both have common meeting ground and the observations of Bhartrihari help Anandavardhana to arrive at some conclusions in his Dhvanyaloka.

Bhartrihari, considered the expression element as of paramount importance since, as he says, "this is the absolute reality serving as a substratum of the great illusion represented by the Universe."[5] This observation of Bhartrihari receives a developed form in the system of Anandavardhana which by postulating the Vyanjana function of the language emphasises the importance of expression in the poetic composition.[6] Vyanjana is an art of poetry by which a creative artist is able to transfer his mind to the receptive reader.

The significance of the context, the very embryo of the theory of Dhvani, is time and again stressed by Bhartrihari. He says that what one understands from other people's words is very much coloured by one's own background. The meaning understood from words depends upon the culture of the listener and can differ according to tune and place.[7]

---

५. अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम् ।
विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः ॥
—वाक्यपदीयम्, १.१

६. उक्त्यन्तरेणाशक्यं यत् तच्चारुत्वं प्रकाशयन् ।
शब्दो व्यञ्जकतां बिभ्रद् ध्वन्युक्तेर्विषयी भवेत् ॥
—ध्वन्यालोकः १.१५

७. (i) यथेन्द्रियं संनिपतद्वैचित्र्येणोपदर्शकम् ।
तथैव शब्दादर्थस्य प्रतिपत्तिरनेकधा ॥

The reflection of this idea of Bhartrihari can very well be seen in between the lines of the Dhvanyaloka wherein Anandavardhana observes that the denotation of every word is constant because right up from childhood, when one first picks up language to the last, the meaning of each word is not so constant. The reason is that it is adventitious. Its apprehension is there only when all circumstances such as context combine in conveying it, otherwise it will not be apprehended at all.[8]

The very foundation on which the sublime edifice of Dhvani-system is built is the concept of *Vyakti*—Manifestation. This concept of *Vyakti* that anything existing within is revealed as a pot existing in darkness is revealed by the light of the lamp, is found deep rooted in the Vakyapadiya. While discussing the cognition of Sphota by Sounds (Nada), Bhartrihari admits that there is the relation of the manifester and manifested between particular sounds (Nada) and the word (sphota). This relation is termed by him as '*Vyangya Vanjakabhava*'.[9] Bhartrihari further observes

---

वक्त्राऽन्यथैव प्रक्रान्तो भिन्नेषु प्रतिपत्तृषु ।
स्वप्रत्ययानुकारेण शब्दार्थः प्रविभज्यते ॥

—वाक्यपदीयम्, २.१३४-३५

(ii) वाक्यात् प्रकरणादर्थादौचित्याद्देशकालतः ।
शब्दार्थाः प्रविभज्यन्ते न रूपादेव केवलात् ॥ —तत्रैव २.३१

८. (i) वाचकत्वं हि शब्दविशेषस्य नियत आत्मा । व्युत्पत्तिकालादारभ्य तदविनाभावेन तस्य प्रसिद्धत्वात् । स त्वनियतः, औपाधिकत्वात् । प्रकरणाद्यवच्छेदेन तस्य प्रतीतेरितरथा त्वप्रतीतेः । —ध्वन्यालोकः, पृ० ३६७

(ii) वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसंनिधेः ।
प्रस्तावदेशकालादेर्वैशिष्ट्यात् प्रतिभाजुषाम्
योऽर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा ॥

—काव्यप्रकाश: ३.२१-२२

९. ग्रहणग्राह्ययोः सिद्धा योग्यता नियता यथा ।
व्यङ्ग्यव्यञ्जकभावेन तथैव स्फोटनादयोः ॥

—वाक्यपदीयम् १.९७

that just as light has two powers, one that of being revealed and the other that of being the revealer, similarly all words have two distinctive powers.[10] Anandavardhana reflects this idea of Bhartrihari when he states that when one sense conveys another through suggestion, the first sense retains its individuality while conveying the other just like a lamp.[11] It appears that not only the concept lying behind the term Vyakti is adopted by Anandvardhana from Bhartrhari but also even the term '*Vyangya Vyanjakabhava*', which he is seen to use frequently in his work the Dhvanyaloka while elaborating his novel theory of Dhvani.[12] Since *Vyakti*—the idea of manifestation—is the vital element transfusing blood into the arteries of Dhvani system, it is very pertinent that Mahimabhatta, an anti Dhvani theorist, in order to demolish the structure of Dhvani first hits vehementaly at this very notion,[13] which according to him is the gene from which the whole organism of Dhvani doctrine has grown and developed.

There is yet another striking similarity between the thinkers (Bhartrihari and Anandavardhana). Bhartrihari pointing to the inherent power of word observes that the power of the conveyer, the symbol and the power of being the conveyed, the symbolised are always inherent in the 'Shabda-tattva' and it is they (the powers) which are actualised or

---

१०. ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा।
तथैव सर्वशब्दानामेते पृथगवस्थिते ॥

—वाक्यपदीयम्, ५.१५

११. व्यञ्जकत्वमार्गे यदाऽर्थोऽर्थान्तरं द्योतयति तदा स्वरूपं प्रकाशयन्नेवासावन्यस्य प्रकाशकः प्रतीयते प्रदीपवत्........स्वरूपं प्रकाशयन्नेव परावभासको व्यञ्जक इत्युच्यते।

—ध्वन्यालोकः, पृ० ३५२

१२. व्यङ्ग्यव्यञ्जकभावेऽस्मिन् विविधे सम्भवत्यपि। —ध्वन्यालोकः ४.५

१३. प्राणभूता ध्वनेर्व्यक्तिरिति सैव विवेचिता।
ध्वनेः शक्त्यन्तराभावात् व्यक्तेश्चानुपपत्तितः ॥ —व्यक्तिविवेकः, पृ० ४५५

manifested when we try to say something.[14] Taking clue from Bhartrihari Anandavardhana developed this latent power of word in his Dhvani system in the shape of Vyanjana and emphasised that the word possessing this inherent capacity of conveying grander meaning, Pratiyamana, is to be carefully recognised by the master poets as well as connoisseurs.[15]

In analysing the nature of poetic experience Dhvani system asserts that it is an indivisible totality incapable of being analysed into component parts.[16] This seems to be the clear reflection of the doctrine of indivisibility propounded by Bhartrihari that there are no phonemes in the word nor are there parts in the phoneme. There is no absolute difference of the words from the sentence.[17]

Anandavardhana while analysing the various kinds of Dhvani says that there is a variety of Dhvani where in the sequence existing between the expressed sense and the suggested sense is not noticeable and there is an other variety of Dhvani where the sequence is noticeable.[18] This notion of

---

१४. प्रकाशकप्रकाश्यत्वं कार्यकारणरूपता।
अन्तर्मात्रात्मनस्तस्य शब्दतत्त्वस्य सर्वदा ॥
—वाक्यपदीयम्, २.३२

१५. सोऽर्थस्तद्व्यक्ति सामर्थ्ययोगी शब्दश्च कश्चन।
यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः ॥
—ध्वन्यालोकः, १.८

१६. प्राधान्यञ्च यद्यपि ज्ञप्तौ न चकास्ति 'बुद्धौ तत्त्वावभासिन्यां झगित्येवावभासते' (ध्वन्यालोकः १.१२) इति नयेनाखण्डचर्वणाविश्रान्तेः। —ध्वन्यालोकलोचनम् पृ० १८६

१७. पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च।
वाक्यात् पदानामत्यन्तं प्रविवेको न कश्चन ॥
—वाक्यपदीयम्, १.७३

१८. (क) असंलक्ष्यक्रमोद्योतः क्रमेण द्योतितः परः।
विवक्षिताभिधेयस्य ध्वनेरात्मा द्विधा मतः ॥
—ध्वन्यालोकः, २.३

(ख) येषामपि स्वरूपविशेषप्रतीतिनिमित्तं व्यञ्जकत्वं यथा गीतादिशब्दानां तेषामपि स्वरूपप्रतीतेर्व्यङ्ग्यप्रतीतेश्च नियमभावी क्रमः। —ध्वन्यालोकः पृ० ३३८

sequence is also found in the Vakyapadiya. Bhartrihari says that just as there is a definite sequence in the transformation of milk or of the seed in the same way there is a definite sequence in which the cognitions of perceivers take place in regard to the word (i.e. sentence)[19] Anandavardhana close at the beds of Bhartrihari realises the significance of sequence in his system and this 'Anupurvi-niyama' of Bhartrihari forms the foundation stone of his main division of Dhvani into Samlakshyakrama-Vyangya and Asamlakshyakrama Vyangya. As there is a definite sequence in the transformation of milk or of the seed; that sequence (krama) is also there in the comprehension of the suggested sense. Sometimes it is noticeable as in the case of a seed and sometimes it is not noticeable as it is in the case of milk.

When the Dhvani theorists state that a word according to the situation and adventitious circumstances (upadhi) in which it is placed can be termed expressive (Vacaka), or Indicative (lakshaka) or suggestive[20] (Vyanjaka) while Gangayam (In the river Ganges) remaining the same as is the case in the statement Gangayam Ghoshah (The hamlet (is) in the river Ganges), they simply echo the doctrine of Upadhi emunciated by Bhartrihari that the word (sphota) is actually one but it is adventitious circumstances (upadhi) due to which it appears manifold.[21]

It is, therefore, evident that Anandavardhana has reaped a rich harvest of the principles propounded by Bhartrihari and has made a profitable utilisation of them in establishing his system of Dhvani. Abhinavagupta, the great commentator of Dhvanyaloka, visualised the wide shadow

---

१९. यथानुपूर्वीनियमो विकारे क्षीरबीजयोः ।
तथैव प्रतिपत्तृणां नियतो बुद्धिषु क्रमः ।।

—वाक्यपदीयम्, १.६१

२०. स्याद् वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा । —काव्यप्रकाशः, २.१

२१. एकमेव समाम्नातं भिन्नं शक्ति व्यपाश्रयात् । —वाक्यपदीयम् १.२

cast by Bhartrihari over Anandavardhana. He henceforth quoting the Karikas from the Vakyapadiya proves that not only the concepts and notions lying behind Dhvani system but even nomenclature is also borrowed from him.[22]

Thus, the spirit of Bhartrihari pervades through out the Dhvanyaloka and Dhvani system and it is but appropriate that Anandavardhana and subsequent Dhvani theorists like Mammata etc pay a glowing tribute to him and his fellowmen grammarians.[23]

It is evident that the structure of the Dhvani system which had its root in the Vedic hymns was later on erected on the foundation of the Sphota system of the grammarians. It is, therefore, pertinant that Dhvani theorists always hold grammarians in high esteem and pay them respect with honorific title—प्रथमेविद्वांस: ।

## Select Bibliography

1. Iyer, K.A., Subramania, Vakyapadiya of Bhartrihari with the Vritti and the Paddhati of Vrishabhadeva, D.C.P.R I. Poona, 1966.
2. Abhyankar, K.V. & Limaye, V.P., Vakyapadiya of Bhartrihari, University of Poona, Poona, 1969.

---

२२. श्रोत्रशष्कुलीं सन्तानेनागता अन्त्या: शब्दा: श्रूयन्ते इति प्रक्रियायां शब्दजा: शब्दा: श्रूयमाणा इत्युक्तम् । तेषां घण्टानुरणनरूपत्वं तावदस्ति, ते च ध्वनिशब्देनोक्ता: । तथाह तत्र भवान् भर्तृहरि:—'य: संयोगविभागाभ्यां करणैरुपजन्यते ।
स: स्फोट: शब्दजा: शब्दा ध्वनयोऽन्यैरुदाहृता: ।' एवं घण्टानिह्राद स्थानीयोऽनुरणनात्मोपलक्षितो व्यङ्ग्योऽप्यर्थो ध्वनिरिति व्यवहृत: ।······अस्माभिरपि प्रसिद्धेभ्य: शब्दव्यापारेभ्योऽभिधातात्पर्यलक्षणाख्येभ्योऽतिरिक्तो व्यापारो ध्वनिरुक्त: । एवं चतुष्कमपि ध्वनि: । —ध्वन्यालोकलोचनम् पृ० २४०-४४

२३. (क) परिनिश्चित निरपभ्रंशशब्दब्रह्मणां विपश्चितां मतमाश्रित्यैव प्रवृत्तोऽयं ध्वनिव्यवहार:—ध्वन्यालोक: तृतीय उद्योत: पृ० ३७५

(ख) बुधैर्वैयाकरणै: प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहार: कृत: तथैवान्यैरपि तन्मतानुसारिभिर्न्यग्भावितवाच्य व्यङ्ग्यव्यञ्जनक्षमस्य शब्दार्थयुगलस्य । —मम्मट:, काव्यप्रकाश: १.४

3. Potter, Simeon, Modern Linguistics, Andre Deutsch 12-14, Carlisle Street, London, 1957.
4. Raja, K. Kunjunni, Indian Thories of Meaning, Adyar Library, Madras, 1969.
5. Sastri, Kuppuswami S, The Dhvanyaloka of Anandavardhana with the Locana Commentary and the Kaumudi commentary on Locana by Uttungodaya, K.S.R.I. Madras, 1944.
6. Krishnamoorthy K., Ananda Vardhava's Dhvanyaloka (translated into English with notes) Oriental Book Agency, Poona, 1955.
7. Mishra, Madhusudana, The Vyakti Viveka of Shri Rajanaka Mahimabhatta, Banaras, 1936.
8. Jhalkikar Vamanacarya, Kavya Prakasha of Mammata, B.O.R.I., Poona, 1933.

—o—

# वेदाङ्गानि

—आचार्यफुल्लेलश्रीरामचन्द्रः

अथ मानवस्योन्नत्यवनत्योः हेतुभूते कार्याकार्ये अनुशासत् वेद एव प्रथमं शास्त्रम्; अन्येषां शास्त्रता तु तेषां वेदसंबन्धायत्तैवेति सुनिश्चितोऽयमास्तिकानामाशयः। वेदस्यास्य शास्त्रतां सार्थकीकर्तुं सुपरिनिष्ठितं वेदार्थज्ञानं नितरामावश्यकम्। अपरिज्ञातोऽर्थो वेदः कथं वानुशिष्यात् धर्माधर्मौ? अत एव "स्वाध्यायोऽध्येतव्यः" इति श्रुत्या विहितस्य वेदाध्ययनस्य किं स्वर्गादिकं किञ्चिददृष्टं फलम् उत अन्यद्वा किंचिद्दृष्टमिति संशये "लभ्यमाने फले दृष्टे नादृष्टपरिकल्पना" इति न्यायेन अध्ययनविधिनानस्वर्गाद्यर्थमध्ययनं विधीयते; किंत्वर्थज्ञानोद्देशेनैवाध्ययनं विधीयते" इति निर्णीतं संप्रदायविद्भिः। प्रसिद्धा एव हि वेदार्थस्य ज्ञानं प्रशंसन्त्यः, निन्दन्त्यश्चाज्ञानं बह्वृचो ऋचः निरुक्तादिषूदाहृताः—

"स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम्।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा॥"
"यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्॥"
(निरु० १.६.१८)

"अधेन्वा चरति माययैष वाचं शुश्रुवान् अफलामपुष्पाम्"
(निरु० १.६.१९)

इत्याद्याः। युक्तमेव किलेदम्—यतः लोकेऽपि धातुपाठादिसहिताम् अखिलामप्यष्टाध्यायीं जिह्वाग्रे धारयन् तदर्थानभिज्ञश्च पुमान् न खलु कमपि प्रयोगं साधयितुमीष्टे नापिवार्हति वैयाकरणाभिधामधिगन्तुम्। अतश्च निश्चितप्रायमेवेदं यदर्थज्ञानविहीना केवलवेदाक्षरावगतिः केवलं महते भारायैवेति।

"आम्नायस्य क्रियार्थत्वात्" केवलशब्दग्रहणमिव अर्थमात्रज्ञानमपि निष्फलमेव यदि वेदबोधितानि कर्माणि नानुष्ठीयन्ते वेदमन्त्रोच्चारणपूर्वकम्। कर्मविधानज्ञानमात्रेणैव कर्माचरणफलस्य प्राप्ति बोधयतां "तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते, य उ चैनमेतं वेद" इत्यादीनां वाक्यानाम् अर्थवादतैवेष्टव्या, अन्या वा गतिः कल्पनीया; विधानज्ञानमात्रेणैव फलप्राप्तौ महता श्रमेण साध्ये कर्मणाम् आचरणे कस्याप्यप्रवृत्तेः। अत एव विधानज्ञानमात्रेण वाचिकायाः मानसिक्या एव वा ब्रह्महत्यायाः तरणं भवेत्, न तु कायिकया इति प्रत्यपादि ऋग्यजुर्वेदभाष्ययोः श्रीमद्भिः सायणाचार्यैः—"ब्रह्महत्याया अपि मानस्याः स्वल्पाया वेदन-

मात्रेण तरणं, कायिक्यास्तु महत्या: अश्वमेधेनेति नास्त्यानर्थक्यम्" इति, अल्प-प्रयाससाध्येन वेदनेन तत्सिद्धौ बह्वायास साध्यमनुष्ठानं व्यर्थं स्यादिति चेन्न; तरणीयाया: ब्रह्महत्याया: मानसिकवाचिकत्वादिभेदेन तारतम्योपपत्तेः, मनसा संकल्पिता, वाचाभ्यनुज्ञाता, परहस्तेन कारिता, स्वयं कृता, पुनः पुनः कृता चेत्येवं तारतम्येन व्यवस्थिता ब्रह्महत्या अनेकविधा। अतस्तरणमप्यनेकविधम् यथा स्वर्गो बहुविधस्तद्वत्" इति च विशदीकुर्वद्भिः वैदिकान् मन्त्रांश्च पठता वर्णस्वर-मात्रादिविषये नितरामवहितेन भवितव्यम्; अन्यथा ह्यसावनर्थमृच्छेदिति प्रति-पादयत्—

"मन्त्रोहीन: स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्॥"

इति वाक्यं भगवता पतञ्जलिना महाभाष्ये उदाहृतं सुविदितमेव। तदेवम् अस्पृष्ट-दोषलेशया परिशुद्धया विधया मन्त्राणामध्ययनम्, अर्थावबोध:, कर्मणामाचरणम् इति त्रयाणामपि सममेव प्राधान्यमङ्गीक्रियते संप्रदायविद्भिः वैदिकवाङ्मयविषये, यदर्थमेव च प्रवृत्तिः षण्णां वेदाङ्गानाम्। तेषु च द्वे द्वे विशेषत: एकैकं प्रयोजनं साधयत: इति अतिरोहितमिदं प्रेक्षावताम्। अक्षरग्रहणपठनादिषु शिक्षा छन्दसोः, अर्थावबोधे निरुक्तव्याकरणयोः, कर्मणां चानुष्ठाने कल्पज्योतिषयोरिति।

"छन्द: पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥"

(पा० शि० ४१, ४२)

इति वेदस्य तत्तदङ्गतया रूपितानां शिक्षादीनां मुण्डकोपनिषदादिष्वपि निर्देश: दृश्यते—"द्वे विद्ये वेदितव्ये इति ह स्म ब्रह्मविदो वदन्ति परा चैवापरा च। तत्रापरा ऋग्वेदो, यजुर्वेदोऽथर्ववेद:, शिक्षा, कल्पो, व्याकरणं, निरुक्तं, छन्दो ज्योतिषमिति" इत्यादिना।

एवं बहो: कालात् पूर्वमेव लब्धप्रचाराणामेतेषां षण्णां शिक्षादीनां शास्त्राणां वेदवत् प्रामाण्यमङ्गीक्रियते न तु पुनः वेदत्वम्, तेषामपौरुषेयत्वात्; एतेषां च तत्तन्मुनिप्रणीतत्वात्। अतश्च एतेषामङ्गत्वमप्यौपचारिकमेव; यत: यथा शरीरा-वयवानां हस्तपादादीनां शरीरान्तर्गतत्वं न तथैषां वेदाङ्गानां वेदान्तर्गतत्वम्। अत एव च "अङ्ग्यन्ते ज्ञायन्ते अमीभिः इति अङ्गानि" इति व्युत्पत्त्या वेदाङ्गानाम् अर्थज्ञानाद्युपकारकत्वरूपम् अङ्गत्वं प्रतिपाद्यते विद्वद्भिः।

वस्तुतस्तु अद्य लब्धप्रचाराणां शिक्षाकल्पव्याकरणादीनां तत्तन्मुनिविरचित-

त्वेऽपि तेषां मूलं वेदेष्वेवाधिगन्तुं शक्यते यदुपबृंहणरूपाण्येव अद्योपलभ्यमानानि वेदाङ्गानि, प्रायो वेदार्थप्रतिपादनपराण्येव ब्राह्मणान्युपलभ्यन्ते । अत एवाहुः सायणाचार्याः तैत्तिरीयब्राह्मणभाष्यस्य प्रारम्भे—"यद्यपि संहितायां" इषेत्वोर्जेत्वा "इत्यादीनां दर्शपूर्णमासमन्त्राणाम् आदौ समाम्नातत्वात् तद्व्याख्यानरूपे ब्राह्मणे पौरोडाशिककाण्डमादौ पठितव्यम्...... " इत्यादि (तै०ब्रा०भा० प्रथमभागः पत्रम्—१)

शिक्षासंबद्धान् वर्ण-स्वर-मात्रा-साम-सन्तानादीन् नाममात्रनिर्देशेन संगृह्णन् तैत्तिरीयोपनिषदन्तर्गतः शिक्षाध्यायः अन्येष्वपि वेदभागेषु लुप्तेषु लभ्यमानेषु वा तेषां विवृतिं सूचयति। गोपथब्राह्मणे च कानिचिन्निरुक्तव्याकरणशास्त्रसंबद्धानि पारिभाषिकाणि पदानि उपलभ्यन्ते—"ओंकारं पृच्छामः को धातुः ? किं प्रातिपदिकम् ? किं नामाख्यातम् ? किं लिङ्गम् ? किं वचनम् ? का विभक्तिः ? कः प्रत्ययः ? कः स्वरः ? उपसर्गो निपातः, किं वा व्याकरणम् ? को विकारः ? को विकारी ? कतिमात्रः ? कतिवर्णः ? कतिपदः ? कः संयोगः ? किं स्थाननादानुप्रदानम्" इत्यादिष ।

केषांचित् पदानां निर्वचनानि वेदेषु सूचितान्युपलभ्यन्ते । ब्राह्मणभागेषु च केषुचित् स्पष्टतया प्रतिपादितानि । (१) "यज्ञेन यज्ञमयजन्त देवाः" (ऋ०वे०), (२) "पूर्वीरश्नन्तावश्विना" (ऋ०वे०), (३) धान्यमसिधिनुहि देवान् (यजु०) इत्यादिषु श्रुतिवचनेषु सूचितैव व्युत्पत्तिः—"यजयाचयतविच्छप्रच्छरक्षोऽनङ्" (पा०सू०), "अश्विनौ यत् व्यश्नुवते सर्वम्" (निरुक्तम्), "धिनातेर्धान्यम्" (निरुक्तम्) इत्यादिरीत्या व्याकरणे निरुक्ते च प्रदर्श्यंते "स्पष्टतयैव केषांचित् पदानां व्युत्पत्तिं" प्रदर्शयन्ति दृश्यन्ते वाक्यानि वेदेषु—"तद्दध्नो दधित्वम्" (तै०स० २.५.३३), "उदानिषुर्महीरिति तस्मादुदकमुच्यते" (अथर्व० ३.१३.१), "यदाजिमायन् तदा ज्यानामाज्यत्वम्" (ताण्ड्य० ७.२.१), "रथं मर्या क्षेप्लातारीत् तदाज्यानामाज्यत्वम्" (ताण्ड्य० ७.६.४), "ततो बृहदनु प्रजायत बृहन् मर्या इदं स ज्योगन्तरभूदिति तद् बृहतो बृहत्त्वम्" (ताण्ड्य ब्रा० ७.६.५) इत्यादीनि ।

तानि तानि फलान्युद्दिश्य कर्तव्यानां कर्मणां, तत्सम्बद्धानां द्रव्यदेवतादीनां च प्रतिपादकेषु ब्राह्मणेषु कर्मविधानरीतिरपि सूचिता वर्तते यामेव विशदीकुर्वन्ति कल्पसूत्राणि । अरुणपराशरशाखाब्राह्मणस्य कल्परूपतां निरदिक्षन् भट्टपादाः कल्पसूत्राधिकरणे ।

छन्दःशास्त्रसंबद्धानि नामानि पारिभाषिकपदानि च ऋग्वेदादिषुपलभ्यन्ते । गायत्री उष्णिक् च सवितुः, अनुष्टुभ् सोमात्, बृहती बृहस्पतेः, विराट् च मित्रावरुणाभ्यां संबभूवुरिति, त्रिष्टुभ्जगत्यौ च इन्द्रविश्वेदेवैः सृष्टे इति च प्रतिपादितम् ऋग्वेदे (१०.१४.१६; १०.१३०; ४-६)। प्रधानतमेषु एषु छन्दस्सु

सप्तसु प्रतिच्छन्दः चतुर्णां चतुर्णां वर्णानां वृद्धिर्भवतीति प्रतिपादितमथर्ववेदे अष्टमे काण्डे, एवम् ऋग्वेदादिषु तत्र तत्र नक्षत्रनाम्नां, संवत्सरप्रारम्भादीनां च निर्देशः दृश्यते। तदेवं शिक्षादीनां षण्णामपि वैदिके वाङ्मये तत्र तत्र सूक्ष्मरूपेण कुत्रचित् विस्तृततया च निर्देशः निरूपणं च दृश्येते यान्येवानुसृत्य कालान्तरे सर्वज्ञाः मुनयः स्वतन्त्ररूपेण वेदाङ्गग्रन्थान् जग्रन्थुः। अतः मुख्यमेव वेदाङ्गानां वेदाङ्गत्वम् उचितमिति प्रतीमः।

एकैकस्य वेदस्य षट् षट् अङ्गानि पृथक्तया सन्तीति अभिप्रयन्तीव केचित्। अत एव—

"अमुष्य विद्या रसनाग्रनर्तकी त्रयीव नीताङ्गगुणेन विस्तरम्।
अगाहताष्टादशतां जिगीषया नवद्वयद्वीपपृथग्जयश्रियाम्॥"

इति नैषधीयचरितगतस्य श्लोकस्य व्याख्यायां—"त्रयीपक्षे तु एकैकवेदस्यैकैकाङ्ग-वैशिष्टयेन षाड्विध्याच्चाष्टादशत्व लाभः" इति प्रत्यपादि मल्लिनाथसूरिणा। निरुक्तव्याकरणच्छन्दोज्योतिषाणां विषये मतस्यास्य पुष्टिं कर्तुं नोपलभ्यते ग्रन्थ-जातम्। शिक्षाकल्पसंबद्धाः पुनर्ग्रन्थाः भिन्नवेदसंबद्धाः कतिचिदुपलभ्यन्ते।

अथैतेषाम् अङ्गानां स्वरूपं संक्षेपेण विवृणुमः।

शिक्षाः—स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्येत, उपदिश्यते, सा शिक्षा तेषु तेषु वेदेषु केषांचिद्वर्णानामुच्चारणे भेदः दृश्यते। उदाहरणतया रेफेण ऊष्मभिश्च सहितस्य मूर्धन्यस्य षकारस्य खकारस्येवोच्चारणं भवति शुक्लयजुर्वेदे। एता-दृशानुच्चारणभेदान् विवृण्वन्त्यः शिक्षाः श्लोकसूत्रादिरूपैः बह्व्यः उपलभ्यन्ते।

(१) पाणिनीयं मतमनुसृत्य केनापि विरचिता पाणिनीयशिक्षा श्लोक-षष्ट्यात्मिका प्रसिद्धा, (२) याज्ञवल्क्यशिक्षा, (३) वासिष्ठविशिक्षा, (४) माण्ड-व्यशिक्षा इति शिक्षात्रयं शुक्लयजुर्वेदसंबद्धम्। सामवेदसंबन्धिनी नारदीयशिक्षा, अथर्ववेदसंबद्धा माण्डूक्यशिक्षा एवमन्याश्च कौण्डिन्यशिक्षादयः उपत्रिंशत् शिक्षाः उपलभ्यन्ते येषां पठनेन ज्ञायते कीदृशं वा निर्दुष्टोच्चारणम् अध्ययनं कृतं प्राचीनैः भारतीयैः इति। प्रोफ़ेसर वर्मप्रभृतिभिः पण्डितैः "Critical Studies in the Phonotic observation of Indian Grammarians" इत्यादिषु ग्रन्थेषु शिक्षाणामेवासां वैज्ञानिकता, भाषोत्पत्तिविकासयोः ज्ञाने तासां महानुपयोगश्च सप्रमाणं सम्यक् प्रतिपादितौ।

प्रातिशाख्यानि शिक्षाणां मूलग्रन्थाः इत्यभिप्रयन्ति विबुधाः। एकैकया वेदशाखया संबद्धत्वात् एतेषां 'प्रातिशाख्यानि' इति नाम। परन्तु एकैकस्याः शाखायाः एकैकं प्रातिशाख्यमिति न नियमः, यतः एकप्रातिशाख्यगतानि सूत्राणि, तदुक्ताः नियमाश्च अनेकासु शाखासु योज्यन्ते इति प्रतिपादितं कात्यायनीय-

वाजसनेयिप्रातिशाख्यभाष्ये अनन्तभट्टेन तत्र हि—

"उदाहरणवाक्यानि दीयन्ते कण्वशाखिनाम्।
अलाभे परकीयाणि सूत्रकारानुशासनात्॥"

इति प्रतिज्ञाय एवं लिखति अनन्तभट्टः—

"शाखायां शाखायां प्रतिशाखम्। प्रतिशाखं भवति प्रातिशाख्यम् इति समाख्यया, समग्रोदाहरणलाभेन च माध्यन्दिनशाखीयमेवेदं प्रातिशाख्यम् इति गम्यते। अतः काण्वशाखोदाहरणं कथमिति चेत्, सत्यम्, माध्यन्दिनीयमेवेति न नियमः। किंतु काण्वादिपञ्चदशशाखानुगतम्; यतः तासु शाखासु नियमः स्वल्पभेददर्शनेन तल्लक्षणस्यासकृदुक्ततया बहूपकारायैव तन्त्रेणाचार्यप्रवृत्तेः। तथा च पञ्चदशसु शाखासु एकमेव कात्यायनसूत्रम् इति" इति।

केषांचित् प्रातिशाख्यानां "पार्षदसूत्राणि" अथवा पारिषदसूत्राणि", इत्यपि नाम। पण्डितपरिषत्सु लब्धप्रचारत्वाच्चास्य नाम्नः प्रवृत्तिः। शौनकाचार्यकृतं ऋक्प्रातिशाख्यम्, कात्यायनकृतं वाजसनेयिप्रातिशाख्यम्, 'तैत्तिरीयप्रातिशाख्यम्' अन्यानि च सामवेदादिसंबद्धानि पुष्पसूत्ररकतन्त्रादीनि, अथर्ववेदप्रातिशाख्यादीनि च प्रसिद्धानि। प्रातिशाख्येषु एषु न शिक्षागता एव विषयाः, व्याकरणशास्त्रसंबद्धा अपि केचित् उपलक्ष्यन्ते ये पाणिनिनापि स्वीकृताः।

**कल्पसूत्राणि**

"वेदविहितानां कर्मणाम् आनुपूर्व्येण कल्पकं शास्त्रं कल्पः।" "कल्पस्तु आश्वलायनापस्तम्बबोधायनादिसूत्रम्। कल्प्यते समर्थ्यते यागप्रयोगोऽत्रेति व्युत्पत्तेः" (ऋ०भा०भू०, पृ० २५), श्रौतसूत्रम्, गृह्यसूत्रम्, धर्मसूत्रम्, शुल्वसूत्रं चेति प्रधानतया चातुर्विध्यं कल्पसूत्रस्य, तत्र श्रौतसूत्रैः वेदोक्तानां श्रौताग्नि साध्यानां यज्ञादीनां विधानं वर्ण्यते। गृह्यसूत्रैश्च उपनयनविवाहादिकर्मणाम् गृह्याग्निसाध्यानाम्। वर्णाश्रमादिसंबद्धाः धर्माः धर्मसूत्रैः, वेदि प्रमाणनिर्माणादिकं च शुल्वसूत्रैः प्रतिपाद्यते। प्रतिवेदं विभिन्नानि कल्पसूत्राणि उपलभ्यन्ते यदनुसारेणाद्यापि तत्तत्कर्माण्यनुष्ठीयन्ते।

**व्याकरणम्**—प्रकृतिप्रत्ययादिविभागप्रदर्शनेन पदस्वरूपतदर्थनिर्णयाय-नितरामुपयुज्यते व्याकरणम्। पुरा किल वागव्याकृतासीत्, तस्याश्च प्रकृतिप्रत्ययादिरूपेण विभागः तत्प्रथमतया इन्द्रेण कृत इति समाम्नायते ऐन्द्रवायवग्रह-ब्राह्मणे—"वाग्वै पराच्यव्याकृतावदत्ते देवा इन्द्रमब्रुवन् इमां नो वाचं व्याकुर्विति। सोऽब्रवीद्वरं वृणै मह्यं चैवैष-वायवे च सह गृहता इति। तस्मादैन्द्रवायवः सह गृह्यते। तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्। तस्मादियं व्याकृता वागुच्यते" (तै०स० ६.६)। व्याकरणशास्त्रस्य च बहूनि प्रयोजनानि वेदाङ्गतया सोदाहरणं

सप्रमाणं च प्रतिपादितानि वार्तिककारेण वररुचिना, भाष्यकारेण च पतञ्जलिना ।

पाणिनीयस्यैव व्याकरणस्य वेदाङ्गत्वम् इति महता आग्रहेण भट्टोजिदीक्षितादयः। परन्तु पाणिनीयस्योद्भवात् पूर्वं किं वा व्याकरणं वेदाङ्गमभवत् इति वक्तव्यं भवेत्। वेदाङ्गं व्याकरणमेव नासीदिति न वक्तुं शक्यते, संप्रदायविरोधात्। पाणिनीयव्याख्याप्रसङ्गे वाररुचं "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्" वार्तिकं व्याचक्षाणेन पतञ्जलिना व्याकरणस्य वेदोपयोगित्वं महता प्रबन्धेन प्रत्यपादि। कुमारिलभट्टेन पतञ्जलिप्रतिपादितानां व्याकरणप्रयोजनानां विषये सुविस्तृतः विचारः प्रवर्तितः व्याकरणाधिकरणे। अत एव पाणिनिव्याकरणस्यैव वेदाङ्गतेति अर्वाचीना मन्यन्तेस्म इत्यभ्यूहितुं शक्यते। यत्र बहूनां शिक्षादीनां परंपरा बहोः कालात् प्रचलति तद्वत् व्याकरणानामपीति वक्तव्यम्; येषु चान्यतमं पाणिनीयम् । व्याकरणाधिकरणस्य एतन्नाम कुमारिलभट्टेन कृतायाः सुविस्तृतायाः चर्चायाः फलमिति प्रतिभाति । जैमिनिसूत्रशाबरभाष्ययोः परिशीलने अस्य नाम साधुपदप्रयुक्तमधिकरणम् इत्येवासीदिति ज्ञायते ।

**निरुक्तम्**

पञ्चाध्यायात्मकस्य निघण्टोः, यत्र केषांचिद्वैदिकानां शब्दानामर्थानुसारेण संग्रहः कृतः, द्वादशाध्यायात्मकस्य निरुक्तस्य च रचयिता एक एव यास्क इति केचिदभिप्रयन्ति। अन्ये तु तत्कर्त्रोः भिन्नतामङ्गीकुर्वन्ति। शब्दस्वरूपपरिज्ञानमिव व्याकरणात्, अर्थपरिज्ञानं, शब्दार्थनिर्वचनपरिज्ञानं च निरुक्तादेव भवति, नान्यस्मात् शास्त्रादिति दुर्गाचार्यः वदति—"प्रधानं चेदम् (निरुक्तं) इतरेभ्यः अङ्गेभ्यः, सर्वशास्त्रेभ्यश्च, अर्थपरिज्ञानाभिनिवेशात्। अर्थो हि प्रधानं, तद्गुणः शब्दः, स च इतरेषु व्याकरणादिषु चिन्त्यते। यथा शब्दलक्षणपरिज्ञानं सर्वशास्त्रेषु व्याकरणात् एवं शब्दार्थनिर्वचनपरिज्ञानं निरुक्तात्" इति ।(दुर्गाचार्यवृत्तिः पृ० ३) सर्वैरपि वेदभाष्यकारैः वेदार्थस्य निर्णये निरुक्तमेव समाश्रीयते इति अतिरोहितमिदं सायणादिकृतभाष्याद्यध्येतॄणाम्। अद्य यास्कविरचितमेव निरुक्तं लभ्यते। परन्तु यास्कात् पूर्वमपि नैके निरुक्तकारा आसन्निति संभाव्यते यतः यास्क एव पुरातनानां द्वादशानां निरुक्तकाराणां नामानि निर्दिशति, आग्रायणौपमन्यवादीनाम् ।

**छन्दः**

छन्दस एव साहाय्येन मन्दमन्दं सुमनोहरं च चलति श्रुतिः। पिङ्गलाचार्यकृतं छन्दः सूत्रमेव वेदाङ्गतया परिगृह्यते। पाणिनीयशिक्षावत् इदं सूत्रमपि केनापि पिङ्गलमतानुसारिणा विरचितं स्यात् । अत एव ग्रन्थस्य प्रारम्भे पिङ्गलस्य स्तुतिः दृश्यते—

"म य र स त ज भ न ल गसंमितं भ्रमति वाङ्मयं जगति यस्य।
स जयति पिङ्गलनागः शिवप्रसादाद्विशुद्धमतिः ॥" इति।

छन्दोग्रन्थस्य प्राधान्यं विवृण्वन् सायणाचार्यः—"तत्र मगणयगणादि साध्यो गायत्र्यादिविवेकः छन्दोग्रन्थमन्तरेण न सुविज्ञेयः। किं च "यो ह वा अविदितार्षेय-च्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वा अध्यापयति वा, स्थाणुं वर्छति, गर्तं वा पद्यति, प्र वा मीयते पापीयान् भवति, तस्मादेतानि मन्त्रे मन्त्रे विद्यात्" (आर्षब्रा० १.१) "इति श्रूयते" इति लिखति ऋग्भाष्यभूमिकायाम्।

**ज्योतिषम्**—तत्तद्वैदिककर्मानुष्ठानयोग्यानां वत्सर-र्तु-नक्षत्रादीनां ज्ञान-मन्तरेण कर्मानुष्ठानं नैव शक्यते इति तत्तत्कालबोधनोपयोगि ज्योतिःशास्त्रं लगधमतानुसारिणा केनापि निर्मितम्। अतीव संक्षिप्तस्यास्य (त्रिचतुरपत्रात्मक-स्य) ग्रन्थस्यान्ते शास्त्रस्यास्य प्राधान्यं ग्रन्थकर्त्रैव विशदीकृतम्—

"यथा शिखा मयूराणां नागानां मणयो यथा।
तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्धनि स्थितम् ॥"
"वेदा हि यज्ञार्थमभिप्रवृत्ताः
कालानुपूर्वाभिहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं
यो ज्योतिषं वेद स वेद यज्ञान् ॥" इति।

वेदरक्षणमेवादौ प्रयोजनीकृत्य लब्धप्रवृत्तीनाम् एतेषामङ्गानां बहुधा वृद्धिः कालान्तरे संपन्ना, विशेषतश्च व्याकरणज्योतिषयोः। ध्वनियन्त्राणां नामापि यदा न श्रुतं तस्मिन् काले कथं वा ते ऋषयः वर्णध्वन्यादिसंबद्धान् विविधानंशान् तथा निर्दुष्टया रीत्या ज्ञातुमशकन्निति विस्मयाविष्टहृदयाः सर्वेऽप्याधुनिका विद्वांसः अधीतशिक्षाप्रातिशाख्यादयः। वेदेषु दृष्टबीजः, प्रातिशाख्येष्वङ्कुरितः, आपि-शल्यादीनां ग्रन्थेषु बद्धस्कन्धः व्याकरणमहावृक्षः मुनित्रयरचनासु अत्यद्भुतं विस्तृता-शाद्यं विराड्रूपम् अभजत यत्किल अनितरभाषासाधारणं दृष्ट्वा आश्चर्यचकिताः केवलां साञ्जलिबन्धं नमोवाकं प्रशासते भाषाशास्त्रविदः। एवं ज्योतिःशास्त्रे, तत्सम्बद्धे गणितशास्त्रे च अतीवाद्भुता समुन्नतिः संपादिता पूर्वैः भारतीयैः मनी-षिभिः। पञ्चमशताब्दीसंबद्धः वराहमिहिरः ततोऽपि वा पूर्वतरा विद्वांसः ग्रीस-देशीयेभ्यः विद्वद्भ्योऽपि कांश्चिद् विषयान् संगृह्य ज्योतिःशास्त्रं भारते वर्धया-मासुरित्याशेरते पण्डिताः। अत एव 'ताबुरि', 'जितुम', 'वाशि', 'वेशि', 'अनफा', 'सुनफा' इत्यादीनि उपचत्वारिंशत् विदेशीयानि किल पदानि उप-लभ्यन्ते अस्मदीयेषु पुरातनेषु ग्रन्थेषु। ज्ञानसमुपार्जनविषये अतीतदेशजात्यादि-भेदा भारतीयानां विद्याश्रद्धैवात्रहेतुः। अत एव वदति वराहमिहिरः बृहत्संहितायाम्—

"म्लेच्छा हि यवनास्तेषु सम्यक् शास्त्रमिदं स्थितम्।
ऋषिवत्तेऽपि पूज्यन्ते किं पुनर्वेदविद्द्विजः॥" इति।

वेदाङ्गानि न केवलं षडेव, ततोऽप्यधिकानि संख्ययेति केचिदभिप्रयन्ति। अत एवाह राजशेखरः काव्यमीमांसायाम्—"शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दोविचितिः, ज्योतिषं च षडङ्गानीत्याचार्याः। उपकारकत्वात् अलङ्कारः सप्तममङ्गमिति यायावरीयः। ऋते च तत्स्वरूपपरिज्ञानात् वेदार्थानवगतिः। यथा—

"द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।
तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्योऽभिचाकशीति॥" इति।

यदि वेदार्थनिर्णयाद्युपकारकत्वं वेदाङ्गताप्रयोजकं तदा प्रधानं वेदाङ्गत्वम् अङ्गीकर्तव्यं पूर्वोत्तरमीमांसयोः। सुविदितमेव खल्विदं विदुषां यथा इदं शास्त्रद्वयं वेदार्थनिर्णयायैव प्रवृत्तम्। परं तु बहोः कालादर्वाक् लब्धप्रतिष्ठत्वादस्य शास्त्रद्वयस्य, अथवा कुतोऽपि वा अन्यस्माद्धेतोः, अनयोः वेदाङ्गेषु परिगणना न कृता प्राचीनैः। उपाङ्गता पुनरनयोः शास्त्रयोः प्रत्यपादि मधुसूदनसरस्वत्यादिभिः—"पुराणन्यायमीमांसा धर्मशास्त्राणि चेति चत्वार्युपाङ्गानि" (प्रस्थानभेदः) इति वदद्भिः।

**पूर्वमीमांसा**—भगवता जैमिनिना प्रणीता द्वादशाध्यायी पूर्वमीमांसा—सहस्रेण न्यायानां कर्मकाण्डप्रधानस्य वेदानां पूर्वभागस्य प्रमेयं निर्धारयितुं प्रवर्तते। अतोऽस्याः वेदाङ्गता निर्विवादैव।

**उत्तरमीमांसा (वेदान्तः)**—भगवता बादरायणेन कृतां शारीरकमीमांसापरनामधेयां चतुरध्यायीमाश्रित्य प्रवृत्ता उत्तरमीमांसा वेदानामान्तिमभागभूतानाम्, अथापि वेदशिरस्त्वेनाभ्यर्हितानाम्, उपनिषदां तात्पर्यं निर्णेतुम् उद्युङ्क्ते। अत एवास्याः वेदान्तशास्त्रमित्यपरं नाम। बहुधा विस्तृतमिदं वेदान्तशास्त्रं वैशाल्येन, विषयवैविध्येन च सर्वाण्यप्यन्यानि शास्त्राणि अतिशेते। जगज्जीवेश्वराणां स्वरूपस्य, तेषां परस्परसंबन्धस्य च प्रतिपादने, मोक्षपदस्य, प्रदर्शने, मोक्षपदस्वरूपस्य निर्धारणे च प्रवृत्तानाम् उपनिषदाम् ऐदंपर्ये बहुधा विप्रतिपद्यमानाः ते ते आचार्याः स्वान् स्वान् सिद्धान्तान्, यानेव अन्ये आचार्याः पूर्वपक्षतापक्षमधितिष्ठापयिषन्ति स्म, महता अभिनिवेशेन प्रत्यपादयन्। अत एव वेदान्तवाक्यकुसुमग्रंथनायोद्दिष्टानां ब्रह्मसूत्राणां विस्तृतव्याख्यारूपाणि उपदशभाष्याण्युपलभ्यन्ते विभिन्नमतप्रतिपादकानि।

अद्योपलभ्यमानेषु भाष्येषु शाङ्करं शारीरकमीमांसाभाष्यमेव प्राचीनतममित्यभिप्रयन्ति विद्वांसः। "श्रीनीलकण्ठाचार्यैः विरचितं विशिष्टंशिवाद्वैतपरं नीलकण्ठभाष्यं शाङ्करभाष्यादपि प्राचीनतरम्; यत्प्रदर्शितामेव रीतिमनुरुध्य

श्रीमद्रामानुजाचार्यादिभिः विष्णुविशिष्टाद्वैत-शक्ति विशिष्टाद्वैतादिकं प्रावर्त्यंत" इति वदतां केषांचिद्वादः नैव क्षोदक्षमः इति संविद्रते बहवो विद्वांसः।

श्री शङ्कराचार्याः प्रधानतया उपनिषदां, तत्सारसंग्रहरूपायाः भगवद्गीतायाश्च प्रामाण्यमूरीकुर्वन्तः निर्गुणस्य, निरुपाधिकस्य च अद्वितीयस्य ब्रह्मण एव पारमार्थिकीं सत्तामभ्युपगच्छन्तः जगतः स्वकारणसत्ताविषमसत्ताकस्वरूपं मिथ्यात्वम् (न पुनः शशशृङ्गादिवत् तुच्छत्वम्), जीवभावस्य चाविद्या मात्रकल्पितत्वं प्रतिपादयन्तः अद्वैतं स्थापयन्ति। तस्मिन काले लब्धप्रतिष्ठानां पूर्वमीमांसक-वैशेषिक-सांख्यादीनां द्वैतवादिनां मतानि प्रतिपदं खण्डयन्तः "एकोऽप्यहमद्वैती प्रमाणमूर्धन्यायाः श्रुतेर्बलेन सर्वानपि मत्प्रतिपन्थिनः द्वैतिनः वादे जेष्यामि" इति प्रतिजानते तैत्तिरीयोपनिषद्भाष्ये—

"चिन्तयसि च त्वम्; न तु निर्णेष्यसि। कि निर्णेतव्यमिति वेदवचनम्? न कथं तर्हि? बहुप्रतिपक्षत्वात्। एकत्ववादी त्वम्; वेदार्थपरत्वात्। बहवो हि नानात्ववादिनो वेदबाह्याः त्वत्प्रतिपक्षाः। अतो ममाशङ्का न निर्णेष्यसीति। एतदेव मे स्वस्त्ययनम्—यन्मामेकयोगिनमनेकयोगिबहुप्रतिपक्षमात्थ। अतो जेष्यामि सर्वान्। आरभे च चिन्ताम्" इति —(ब्रह्मानन्दवल्ली ८.५)।

श्रीशङ्कराचार्येभ्यः पश्चात्तनाः सर्वेऽप्याचार्याः, ऋते च कतिभ्यश्चित् भेदाभेदवाद्यादिभ्यः, प्रायः जगज्जोवसत्यत्ववादिनः द्वैतिन एव। तेषां प्रक्रियाः पुनर्भिद्यन्ते। सर्वेऽप्येते सगुणमेव ब्रह्म अङ्गीकुर्वन्ति। तेषु केचित् शिवस्य, केचित् विष्णोः, अन्ये च शक्तेः, अपरे च श्रीकृष्णादीनां पारम्यं प्रतिपादयन्ति। श्रीशङ्कराचार्येभ्यः प्राक्तनेषु, अर्वाक्तनेषु च द्वैतवादिषु महान् भेदः उपलक्ष्येत। सर्वेऽपि प्राक्तनाः द्वैतिनः सांख्यवैशेषिक-मीमांसकादयः कपिलादिमुनिवचनप्रामाण्येन वा युक्तिबलेन वा स्वं स्वं मतमुपष्टम्भयितुं प्रायतन्त, न पुनः श्रुतिवाक्यप्रदर्शनेन। ईक्षत्यधिकरणादिषु श्रुतीनां सांख्यमताननुगुणत्वप्रदर्शनं च कदाचित्तेऽपि स्वमतसमर्थकतया श्रुतीः प्रदर्शयेयुरिति धियैव कृतं भगवता बादरायणेन। वेदप्रामाण्यमप्रतिहतम् अङ्गीकुर्वाणाः पूर्वमीमांसका अपि क्रियार्थानामेव श्रुतिवचनानां प्रामाण्यमुररीकुर्वन्तः भूतार्थवादिनीनाम् उपनिषदाम् अर्थवादत्वमेव अङ्गीचक्रुः। वैशेषिकादीनां वादस्य तर्कमात्राश्रितत्वं प्रसिद्धमेवं। उपनिषदां परमं प्रामाण्यं प्रतिष्ठाप्य तासां बलेन सर्वानपि तान् द्वैतिनः वादे जेतुं प्रायत्यत श्रीशङ्कराचार्यैः।

श्रीशङ्कराचार्येभ्यः अर्वाक्तनाः श्रीभास्कराचार्य - श्रीनीलकण्ठाचार्य - श्रीमद्रामानुजाचार्य - श्रीमध्वाचार्य - श्रीवल्लभाचार्य - श्रीनिम्बार्काचार्य - श्रीबलदेवाचार्य आचार्याः—"यासामुपनिषदामुपष्टम्भेन भवान् द्वैतवादं निराकर्तुं प्रायतिष्ट तासामपि द्वैत एव तात्पर्यम्" इति श्रीशङ्कराचार्यान् बहुधा अधिक्षिपन्तः ब्रह्मसूत्राणां भाष्याणि व्यरीरचन्। श्रीशङ्कराचार्याः श्रुत्युपष्टम्भेनैव अद्वैतं प्रत्यवस्थापयन्। अन्ये आचार्याः पुनः विविधानां शैव-शाक्त-वैष्णवाद्यागमानां भागवता-

दीनां पुराणानां च श्रुतितुल्यं प्रामाण्यमङ्गीकृत्य तत्तदागमाद्यनुसारेणापि औपनिषद तत्त्वमुपबृंहयितुम् अर्चापूजादिसंप्रदायांश्च प्रवर्तयितुं प्रावर्तन्त। एवं शङ्कराचार्येभ्यः प्राक्तनानाम् अर्वाक्तनानां च द्वैतसंप्रदायानां मध्ये महान् भेदः परिदृश्यते केषुचिदंशेषु। विभिन्नसंप्रदायसमर्थकैः विद्वद्वरेण्यैः वादप्रतिवादरूपेण निर्मितैः परःसहस्रैर्ग्रन्थैः परिपुष्टस्य, विभिन्नप्रस्थानस्य वेदान्तशास्त्राम्बुधेः परं पारमधिगन्तुं न कोऽपि पुरुषायुषेणापि पारयेत्।

एवं स्थिते सिद्धान्तेष्वेषु वेदान्तसंबद्धेषु कस्य वा प्रामाण्यम्, कस्य वा नेति संशीतिरुदियात्। परन्तु अधिकारिभेदम्, अभिरुचीनां भेदं चानुसृत्य प्रवृत्तेष्वाध्यात्मिकविद्यासंप्रदायेषु सर्वेषामेवाप्रतिहतं प्रामाण्यमिति वदामः।

"त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च।
रुचीनां वैचित्र्यादृजुकुटिलनानापथजुषां
नृणामेको गम्यस्त्वमसि पयसामर्णव इव॥"

इति पुष्पदन्तस्योक्तिं स्मरतां न कोऽपि बुद्धिवैषम्यस्यावसरः। विद्वद्भिस्तु यथामति तत्त्वविवेचनं कर्तव्यमेव।

वेदाङ्गानि वेदान्तं च अधिकृत्य प्रवर्त्यमानायाम् अस्याः नवोक्तिप्रणाल्यां (Refresher Course) प्रवेशमधिगन्तुं लब्धावसराः सर्वेऽप्यत्रत्याः अध्यापकाः विद्वत्तल्लजेभ्यः नैकान् नूतनान् शास्त्रीयानंशान् ग्राहं ग्राहम् अध्यापकवरेण्याः भवेयुरित्याशास्महे।

"प्रज्ञा विवेकं लभते भिन्नैरागमदर्शनैः।
कियद्वा शक्यमुन्नेतुं स्वतर्कमनुधावता॥"
"तत्तदुत्प्रेक्षमाणानां पुराणैरागमैर्विना।
अनुपासितवृद्धानां विद्या नातिप्रसीदति॥"

इति भर्तृहर्युक्तदिशा विना महापण्डितानां साहाय्यं कति वा विषयाः केन वा स्वबुद्ध्या उन्नेतुं शक्येरन्? अत एव न्यायदर्शनोक्तं तद्विद्यसंभाषाप्राशस्त्यम् अनुवदन् लिखति चरकाचार्यः—"भिषक् भिषजा सह संभाषेत। तद्विद्यसंभाषा हि ज्ञानाभियोगसंहर्षकारी भवति। वैशारद्यमपि चाभिनिर्वर्तयति। वचनशक्तिमपि चाधत्ते। यशश्चाभिदीपयति। पूर्वश्रुते च सन्देहवतः पुनः श्रवणात् संशयमपकर्षति। श्रुते चासन्देहवतः भूयोऽध्यवसायमभिनिर्वर्तयति। अश्रुतमपि च किंचिदर्थं श्रोत्रविषयमापादयति" इत्यादि (चरकसंहिता-विनयस्थानम्)। एतादृशी तद्विद्यसंभाषा, तद्विद्यश्रवणं च पुनर्नवीकरोतु भवतां समेषां शास्त्रज्ञानमिति जगन्नाथं वेङ्कटाचलपतिं प्रार्थये।

# सामवेदीय ब्राह्मणों में निरूपित यज्ञ-विज्ञान के मूल तत्त्व

-- डॉ० ओमप्रकाश पाण्डेय

श्रौतयागों के अनुष्ठान में, हौत्र एवं आध्वर्यव पक्षों के ही सदृश औद्गात्र पक्ष की भी अत्यन्त महत्त्वपूर्ण भूमिका है। उद्गाता और उसकी मण्डली यज्ञ में सामगान करके उसे सरस और रोचक बनाने में विशेष दायित्त्व का निर्वाह करती है। औदुम्बरी के उत्तर में आसीन उद्गाता प्रस्तोता और प्रतिहर्त्ता प्रभृति अपने सहायकों के साथ विभिन्न स्तोत्रों का जव विहित स्तोमों और विष्टुति-प्रकारों में गान करता है, तब श्रौतयाग केवल नीरस कर्मकाण्ड भर नहीं प्रतीत होते। उद्गातृ-मण्डली के इन कार्य-कलापों का सामवेदीय ताण्ड्य, षड्विंश, सामविधान और जैमिनीय ब्राह्मणों में अत्यन्त विस्तार से निरूपण हुआ है। विविध सोमयाग में क्योंकि सामगान का विशेष गौरव है, इसलिए विविध सोमयाग ही सामब्राह्मणों के विशिष्ट प्रतिपाद्य हैं। अग्निष्टोम संस्थ ज्योतिष्टोम, जो समस्त सोमयागों की प्रकृति है, से प्रारम्भ कर सहस्र संवत्सर-साध्य सत्रयागों तक का इनमें निरूपण है। यज्ञ-संस्था के उद्भव और विकास के सन्दर्भ में, इसीलिए इन ब्राह्मणों का विशेष महत्त्व है।

ताण्ड्य का प्रारम्भ सोमप्रवाक विधि से दिखलाई देता है। इसमें सर्वप्रथम गवामयन संज्ञक सत्र याग का निरूपण है, क्योंकि वह अनेक सोमयागों का समुच्चय है। तदनन्तर अग्निष्टोम और व्यूढ द्वादशाह का वर्णन है। षड्विंश भी ताण्ड्य के अन्तर्गत ही है, जिसका वैशिष्ट्य है अभिचार यागों का प्रतिपादन। दोनों में कुल १८३ क्रतुओं का विवरण है, जिनमें छह एकाह, चार साहस्र, पाँच साद्यस्क्र, चार व्रात्य यज्ञ, पाँच अग्निष्टुत, तीन त्रिवृत्स्तोम, चार चातुर्मास्य, उपहव्यादि पाँच याग, वाजपेय, राजसूय, बीस द्वन्द्वसोम, तेरह अतिरात्र, तीन द्विरात्र, छह त्रिरात्र (इन्हीं में अश्वमेध भी है), चार चतूरात्र, तीन पञ्चरात्र, सात सप्तरात्र, एक अष्टरात्र, दो नवरात्र, चार दशरात्र, दो त्रयोदशरात्र, तीन चतुर्दशरात्र, ऐन्द्रादि याग, दो एकविंशतिरात्र, दो चतुर्विंशतिरात्र, पञ्चविंशतिरात्र से शतरात्र तक सत्ताईस याग, गवामयनादि सात अयन (सत्र), तीन सारस्वत सत्र, दो इष्टचयन, शत-संवत्सरसाध्ययाग, सहस्रसंवत्सरसाध्य विश्वसृजामयन तथा चार अभिचारयाग (श्येन, इषु, संदंश एवं वज्रसंज्ञक) तथा वैश्वदेव त्रयोदशरात्र सम्मिलित हैं। जैमिनीय ब्राह्मण में इससे कुछ भिन्न क्रम अपनाया गया है। उसमें सर्वप्रथम अग्निहोत्र

का निरूपण है। तदनन्तर अग्निष्टोम का विवरण है। अन्य एकाह, अहीन और सत्रयाग इसके बाद निरूपित हैं। सामविधान ब्राह्मण श्रौतयागों के साथ तान्त्रिक परम्परा को भी समेटने के लिए प्रयत्नशील दिखलाई देता है। सामवेदीय ब्राह्मण श्रौतयागों के होत्र एवं आध्वर्यव पक्षों की सामान्यः प्रस्तुति नहीं करते, किन्तु उनके नामकरण, आनुष्ठानिक आख्यानों और विशेष प्रसंगों की मीमांसा में अवश्य रुचि लेते है। इनमें भी ताण्ड्य ब्राह्मण श्रौतयागों के निरूपण में सर्वाधिक उपादेय है, जिसमें ७८१६११ सुत्याक १७८ सोमयाग निरूपित हैं। जैमिनीय की अपेक्षा यह अत्यन्त सुसंपादित और सुरुचिपूर्ण ढंग से याग-विधान का प्रस्तावक है।

साम-ब्राह्मण ग्रन्थों में प्रतिपादित श्रौतयागों का विशद विवरण इन परिमित पृष्ठों में अपेक्षित नहीं है किन्तु इनके यज्ञ-विधान के मूल तत्त्वों का सन्धान अवश्य किया जा सकता है।

**सामवेदीय ब्राह्मणों के अनुसार यज्ञ-संस्था का उद्भव**—यज्ञ-संस्था के उद्भव और विकास की दृष्टि से सामवेदीय ब्राह्मणों में अनेक महत्त्वपूर्ण संकेत प्राप्त होते हैं। यज्ञानुष्ठान के सुसम्पादन की दृष्टि से गार्हपत्य, दक्षिणाग्नि और आह्वनीयाग्नि की स्थापना का प्राथम्य सर्वविदित है। षड्विंश ब्राह्मण (५.१२) के अनुसार ऋग्वेद से गार्हपत्य, यजुर्वेद से दक्षिणाग्नि और सामवेद से आह्वनीयाग्नि की उत्पत्ति हुई—'ऋग्वेदाद् गार्हपत्यो यजुर्वेदाद् दक्षिणाग्निः सामवेदादाह्वनीयः।' इन्हीं अग्नियों से आगे यज्ञपुरुष की उत्पत्ति हुई, जो सहस्र शिरों वाला सहस्रनेत्रों वाला और सहस्र चरणों वाला था। सामविधान ब्राह्मणगत एक आख्यायिका के अनुसार देवगण प्रजापति के पास गये। उनसे उन्होंने पूछा कि हमें स्वर्ग-प्राप्ति कैसे हो सकती है? इस पर प्रजापति ने उन्हें यज्ञानुष्ठान का निर्देश देकर कहा कि इससे तुम स्वर्ग-प्राप्ति कर सकते हो—'ते देवाः प्रजापतिमुपाधावन्। तेऽब्रुवन्। कथं नु वयं स्वर्गं लोकमियामिति। तेभ्य एतान् यज्ञक्रतून् प्रायच्छत्—एतैः लोकमेष्यथ (सामवि० ब्रा० १.३.३)।'

**सोमयागों का वैशिष्ट्य**—सोमयागों का सर्वोपरि महत्त्व निरूपित करते हुए ताण्ड्य में कहा गया है कि देवों ने हविर्यागों से भूलोक पर विजय प्राप्त की, पशुयागों से अन्तरिक्ष को जीता, किन्तु स्वर्ग पर विजय उन्हें तभी प्राप्त हुई, जब उन्होंने सोमयागों का अनुष्ठान किया—'हविर्यज्ञैर्वै देवा इमं लोकमभ्यजयन्नन्तरिक्षं पशूमद्भिः सोमैरमुम्' (तां० ब्रा० १७.१३.१८)।

**अग्निहोत्र का गौरव**—सामवेदीय साहित्य के अन्तर्गत षड्विंश, ब्राह्मण, जैमिनीय ब्राह्मण और छान्दोग्योपनिषद् (जो ताण्ड्य ब्राह्मण की उसी प्रकार अन्तिम भाग है, जैसे बृहदारण्यकोपनिषद् शतपथ ब्राह्मण की) में अग्निहोत्र की विशेष प्रशंसा की गई है। षड्विंश के अनुसार अग्निहोत्र के सम्पादन से सभी यज्ञ स्वयमेव अनुष्ठित हो जाते हैं और उनसे प्राप्य फल भी प्राप्त हो जाता है—'अग्नि-

होत्रे सर्वैर्हवा एतस्य यज्ञक्रतुभिरिष्टं भवति।' जैमिनीय ब्राह्मण के प्रथम प्रपाठक के पूरे पैंसठ खण्डों में अग्निहोत्र का वर्णन है। छान्दोग्योपनिषद् के अनुसार जैसे क्षुधातुर बालक माता के पास जाते हैं, वैसे ही प्राणी अग्निहोत्र की सर्वथा उपासना करते हैं—'यथेह क्षुधिता बाला मातरं पर्युपासत एवं सर्वाणि भूतान्यग्निहोत्रमुपासत' (छा०उप० ५.२४)।

**सोमलता का विकल्प**—सोमयाग के अनुष्ठानार्थ सोमनाम्नी वनस्पति आवश्यक है, किन्तु प्रतीत होता है कि ताण्ड्य ब्राह्मण के प्रवचन-काल में वह लुप्त हो गई थी। इसी कारण ताण्ड्य में सोम के स्थान पर, विकल्प के रूप में क्रमशः पूतीक और अर्जुन का विधान किया गया है—'यदि सोमं न विन्देयुः पूतीकानभिषुणुयुः (९.५.३); 'यदि न पूतीकानर्ज्जुनानि।'

**मानव-जीवन एवं प्रकृति के समानान्तर यज्ञ-योजना**—ताण्ड्यादि ब्राह्मणों के अनुशीलन से ज्ञात होता है कि उनमें मानव-जीवन एवं प्रकृति के अविकल समानान्तर यज्ञ-योजना प्रस्तुत की गई है। यज्ञ जीवन के विभिन्न व्यापारों एवं कार्य-कलापों के साथ-साथ चलता हुआ एक समानान्तर सृष्टि-व्यापार प्रतीत होता है। हमारे इस जागतिक जीवन के स्वप्न, आकांक्षाएँ और कामनाएँ ही यागानुष्ठान के प्रयोजनरूप में अन्वित हुई हैं। इस दृष्टि से सामवेदीय ब्राह्मणों ने यज्ञ के देवता, द्रव्य, मन्त्र और अन्य सभी तथ्यों की मानव-जीवन से यथातथ्य समरूपता प्रदर्शित करने का प्रयत्न किया है। यागानुष्ठान के माध्यम से निरन्तर हम अपने स्वरूप के ही निकट होते जाते हैं और यज्ञ के समानान्तर संसार तथा मानव-जीवन के मध्य पूर्ण समरसता ही हमारा उद्दिष्ट है—यह तथ्य यज्ञों की विधि-वर्णना के समय ब्राह्मणग्रन्थकारों के मन में सदैव निहित रहता है। उदाहरण के लिए एक स्तोत्रिया ऋचा के औचित्य का प्रदर्शन करते हुए कहा गया है कि 'पवस्व वाचो अग्निय' ऋचा में आये 'पवस्व' और 'वाक्' क्रमशः पुरुष तथा स्त्रीरूप हैं। अतएव यह स्तोत्रिया मिथुन भाव को प्रशस्त करने वाली है। मिथुनभाव ही सृष्टि का मूल है। सम्पूर्ण मानव-संस्कृति अन्धकार से आलोक की दिशा में अग्रसर होने की कथा है। दिवाकीर्त्य संज्ञक साम के सन्दर्भ में स्वर्भानु की आख्यायिका के माध्यम से ताण्ड्य ब्राह्मण (४.६.१३) में भी उसी आलोक के प्रति स्पृहा व्यक्त की गई है। एक याग में अभिप्लवषडहों के प्रतिलोम-क्रम से अनुष्ठान का औचित्य-निरूपण करते हुए कहा गया है कि जैसे लोक में ऊँचे वृक्ष पर मूलभाग से ही चढ़ा जाता है, उसी प्रकार याग में भी पहले आरोहण-क्रम अपनाया जाता है, तदनन्तर अवरोहक्रम—'यथा वा इतो वृक्षं रोहन्ति एवमेनं प्रत्यवरोहन्ति स्वर्गमेव तल्लोकं रूढ्वाऽस्मिंल्लोके प्रतितिष्ठन्ति' (तां०ब्रा० ४.८.१०)। हिंकारादि की मानसिक कर्त्तव्यता के प्रसंग में ब्राह्मणकार लोक-प्रामाण्य ही देता है—लोक में जो वाणी

नहीं कह पाती, वह मौन कह देता है—'यद्वै वाचा न समाप्नुवन्ति मनसा तत्समापयन्ति' (तां० ब्रा० ४.६.१०)। इसी प्रकार जैसे लोक में एक ही कार्य को बार-बार करना अप्रिय प्रतीत होता है, वैसे ही एक ही स्तोत्रीय ऋचा की याग में पौनःपुन्येन आवृत्ति अपशस्त है (तां० ब्रा० ६.८.६)।

**द्रव्यमययाग के स्थान पर आत्मयज्ञ को प्रतिष्ठा**—यज्ञ के द्रव्यमयरूप के स्थान पर शनैः शनैः सामवेदीय ब्राह्मणों ने आत्मयज्ञ को प्रतिष्ठित किया है। यद्यपि उपनिषदों में इस प्रवृत्ति को पूर्णता प्राप्त हुई किन्तु इसका प्रारम्भ और बीजारोपण ताण्ड्य ब्राह्मण में ही दिखलाई दे जाता है। सहस्रसंवत्सरसाध्य विश्वसृजामयन याग का ताण्ड्य में जिस प्रकार से वर्णन है, वह किसी द्रव्यात्मक याग के स्वरूप का प्रस्तावक नहीं है। निःसन्देह, प्रतीकात्मकता और मानवीकरण की शैली का आश्रय लेते हुए ताण्ड्यब्राह्मण के प्रवक्ता ने विश्वस्रष्टा देवों के अयन का निरूपण करके आत्मयज्ञ की ही उद्भावना की है। २५वें अध्याय के १८वें खण्ड में निरूपित इस यज्ञ के विवरण में कहा गया है कि तपस्या, ब्रह्म, इरा, अमृत, भूतकाल, भविष्यकाल, ऋतुओं, अन्य आर्तव वस्तुओं, सत्य, ऋत, ओज, कान्ति, यश, ऐश्वर्य (भग), ऊर्जा, वाक्, प्राण, दिष्टि (आन्तरिक श्वसन), बल, आशा, अहोरात्र और मृत्यु ने इस यज्ञ में विभिन्न ऋत्विकों और द्रव्यों का स्थान ग्रहण करके यज्ञ-संपादन किया। आशा को हविष्य वतलाकर जीवन की यज्ञरूपता का ही प्रतिपादन किया गया है।

षड्विंश ब्राह्मण (२.६.२-३) के एक अंश के अनुसार सम्पूर्ण मानवीय जीवन यज्ञरूप है, जिसमें वाणी होतृस्थानीय है, चक्षु अध्वर्यु हैं, मन ब्रह्मा हैं, श्रोत्र उद्गाता हैं, अन्य अंग चमसाध्वर्यु (सहायक ऋत्विक्) हैं, और चक्षुओं के मध्य विद्यमान आकाश ही सदस्य है।

